M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 326

Title: Narsinha Purana

326

नरसिंह पुराण

Narasimha

~~Nrisimha~~ Purana : Title

: : Author

: : Editor

: : Year, Vols.

: : Publisher

326 : : Remarks

घनश्यामस्य जड़ियोपहृतः

नरसिंह पुराणं ।
१

॥ श्रीगणेशाय नमः ॥ ॐ नमो भगवते श्रीलक्ष्मीनृसिंहाय नमः ॥ नारायणं नमस्कृत्य न
रं चैव नरोत्तमं ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ तप्तहाटककेशांत ज्वलत्पावकलो
चन ॥ वज्राधिकनखस्पर्श दिव्यसिंह नमोस्तु ते ॥ १ ॥ पातु वो नरसिंहस्य नखलांगलकोट
यः ॥ हिरण्यकशिपोर्वक्षक्षेत्रासृक्कर्दमारुणाः ॥ २ ॥ हिमवद्वासिनः सर्वे मुनयो वेदपारगाः
॥ त्रिकालज्ञा महात्मानो नैमिषारण्यवासिनः ॥ ३ ॥ येर्बुदारण्यनिरताः पुष्करारण्यवासि
नः ॥ महेंद्राद्रिरता ये च ये च विंध्यनिवासिनः ॥ ४ ॥ धर्म्मारण्यरता ये च दंडकारण्यवासिनः
श्रीशैलनिरता ये च कुरुक्षेत्रनिवासिनः ॥ कौमारपर्वता ये च ये च पंपानिवासिनः ॥ एते चान्ये
च बहवः सशिष्या मुनयोमलाः ॥ ५ ॥ माघमासे प्रयागं तु स्नातुं तीर्थं समागताः ॥ तत्र स्नात्वा
यथान्यायं कृत्वा कर्म्म जपादिकं ॥ ७ ॥ नत्वा तु माधवं देवं कृत्वा च पितृतर्प्पणं ॥ दृष्ट्वा तत्र भर
द्वाजं पुण्यतीर्थनिवासिनं ॥ ८ ॥ तं पूजयित्वा विधिवत्तेनैव च सुपूजिताः ॥ आसनेषु विचि

राम
१

त्रेषु दत्तादिषु यथाक्रमं ॥ ९ ॥ भरद्वाजेन दत्तेषु आसीनास्ते तपोधनाः ॥ नृसिंहाश्रिता कथा
ः सर्वे परस्परमथाब्रुवन् ॥ १० ॥ कथांतेषु ततस्तेषां मुनीनां भावितात्मनां ॥ आजगाम महाते
जास्तत्र सूतो महामतिः ॥ ११ ॥ व्यासशिष्यः पुराणज्ञो लोमहर्षणसंज्ञकः ॥ तान्प्रणम्य यथान्यां
न्यायं स च तैश्चाभिपूजितः ॥ १२ ॥ उपविष्टो यथायोग्यं भरद्वाजमतेन सः ॥ व्यासशिष्यं सुखासी
नं ततस्ते लोमहर्षणं ॥ १३ ॥ तं पप्रच्छ भरद्वाजो मुनीनामग्रतस्तदा ॥ भरद्वाज उवाच ॥ सौनक
स्य महासत्रे वाराहास्या तु संहिता त्वत्तः श्रुता पुरा सूत एतैरस्माभिः रेव च ॥ १४ ॥ सांप्रतं ना
रसिंहाख्यं त्वत्तः पौराणसंहिता ॥ श्रोतुमिच्छाम्यहं सूत श्रोतुकामा इमे स्थिताः ॥ १५ ॥ अतस्त्वां
परिपृच्छामि इह श्रमेतन्महामुने ॥ ऋषीणामग्रतः सूत मतस्तेषां महात्मनां ॥ १६ ॥ कुत एतत्स
मुत्पन्नं केन वा परिपाल्यते ॥ कस्मिन्वा लयमभ्येति जगदेतच्चराचरं ॥ किंप्रमाणं च वै भू
मेर्नृसिंहः केन तुष्यति ॥ कर्म्मणा तु महाभाग तन्मे ब्रूहि महामते ॥ १८ ॥ कथं च सृष्टेरादिः

न॰पु॰
२

स्यात्स्त्रवमातः कथंभवेत् ॥ कथंयुगस्यगणनां किंवास्यात्तुचतुर्युगं ॥१९॥ कोवाविशेषस्तेषुत्र
कोवाचस्त्राकलौयुग ॥ कथमाराध्यते देवो नरसिंहाख्यत्र मानुषे ॥२०॥ क्षेत्राणि कानि पुण्यानि क
चण्याः शिलोच्चयाः नद्यश्च काः पुण्या नृणां पापहराः शुभाः ॥ देवादीनां कथं सृष्टिः मनोर्मन्वन्तरस्य तु
॥ तथा विद्याधरादीनां सृष्टिरादौ कथं भवेत् ॥२२॥ यज्वानः केच राजानः केच सिद्धिं परां गताः ॥ ए
तत्सर्वं महाभाग कथयस्व यथाक्रमं ॥२३॥ सूत उवाच ॥ व्यासप्रसादाज्जानामि पुराणानि तपोधना
: ॥ तं प्रणम्य प्रवक्ष्यामि पुराणं नारसिंहकं ॥२४॥ पाराशर्यं परमपुरुषं विश्वदेवैकयोनिं विद्यावं
तं विपुलमतिं युं वेदवेदांगवेद्यं शाश्वच्छांतं शमितविषयं शुद्धतेजोविशालं वेद ॥ संविभ्रतशमजं
सर्वदाहं नमामि ॥२५ नमो भगवते तस्मै व्यासायामिततेजसे ॥ यस्य प्रसादाद्वक्ष्यामि वासुदेवक
थामिमां ॥२६॥ सुदुर्णतो महानर्थः चयायः परिकीर्तितः विष्णुप्रसादेन विना वक्तुं केन पिशक्य
ते ॥२७॥ तथापि नरसिंहस्य प्रसादाद्वच्मितेधुना ॥ प्रवक्ष्यामि महापुरायं नरराजश्शृणुष्व मे ॥२८॥

राम॰
२

न॰पु॰
३

उत्तानूनायकाः ॥ अंतर्लीनविकारं च तद्द्रष्टुमुपचक्रमे ॥४०॥ तस्मात्प्रधानादुद्भूतः ततः स्वापि महान्
भूतासांसि सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् ॥४१॥ वैकारिकस्तैजसश्च भूतादिश्चैव तामसः त्रि
विधोयमहंकारो महत्तत्त्वादजायत ॥४२॥ यथा प्रधानेन महान् महता स तथावृतः ॥ भूतादिस्तु विकु
र्वाणः शब्दतन्मात्रकं ततः ॥४३॥ ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणं ॥ शब्दमात्रं तथाकाशं भू
तादिस्तु समावृणोत् ॥४४॥ बलवानभवद्वायुः तस्य स्पर्शो गुणो मतः ॥ आकाशं शब्दतन्मात्रं स्पर्शमात्रं
तथावृणोत् ॥४५॥ ततो वायुर्विकुर्वाणो रूपमात्रं ससर्ज ह ॥ ज्योती रूपोद्यतो वायोस्तद्रूपगुणमुच्य
ते ॥४६॥ स्पर्शमात्रात्तु वै वायुः रूपमात्रं समावृणोत् ॥ संभवंति ततोभांसि रसाधाराणि तानि तु ॥४७॥
रसमात्राणि चांभांसि रूपमात्रं समावृणोत् ॥ विकुर्वाणानि चांभांसि गंधमात्रं ससर्जिरे ॥४८॥ तस्मा
ज्जाता मही चेयं सर्वभूतगुणाधिका ॥ संघातो जायते तस्मात्तस्या गंधगुणो मतः ॥४९॥ तस्मिंस्तस्मिं
स्तु तन्मात्रा तेन तन्मात्रका स्मृताः ॥ तन्मात्राण्यविशेषाणि विशेषाः क्रमशोपराः ॥५०॥ भूततन्मा

राम॰
३

एवं तु मुनयः सर्वे विसृष्टाश्च स्वयं स्थिताः ॥ पुराणं नरसिंहस्य प्रवक्ष्यामि यथातथा ॥ २९ ॥ नारा-
यणादिदं सर्वं समुत्पन्नं चरा-चरं ॥ तेनैव पाल्यते सर्वं नरसिंहादिमूर्तिभिः ॥ ३० ॥ तथैव लीयते चांते
हरौ ज्योतिःस्वरूपिणि ॥ यथैव देवः सृजति तथा वक्ष्यामि तच्छृणु ॥ ३१ ॥ पुराणानां हि सर्वेषां नायं सा-
धारणः स्मृतः ॥ श्रोकारयं च मुनेश्रेष्ठ चाप्तिः शोषे त्वं मुनेश्शृणु ॥ ३२ ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वं-
तराणि च ॥ वंशानुचरितं चैव पुराणं पंचलक्षणं ॥ ३३ ॥ आदिसर्गोनुसर्गश्च वंशो मन्वंतराणि
च ॥ वंशानुचरितं चैव वक्ष्याम्यहं तु समासतः ॥ ३४ ॥ आदिसर्गमहं तावत् कथयिष्यामि ते द्विज ॥ य-
स्मादारभ्य देवानां राज्ञां चरितमेव च ॥ ३५ ॥ ज्ञायते सरहस्यश्च परमात्मा सनातनः ॥ प्राक्सृष्टेः प्र-
लयादूर्द्ध्वं नासीत्किंचित् द्विजोत्तम ॥ ब्रह्मसंज्ञमभूदेकं ज्योतिष्मत्सर्वकारणं ॥ नित्यं निरंजनं शांतं
निर्गुणं नित्यनिर्मलं ॥ आनंदसागरं स्वच्छं यं कांक्षंति मुमुक्षवः ॥ सर्वज्ञं ज्ञानरूपत्वादनंतम-
जमव्ययं ॥ ३८ ॥ अविनाशि सदा स्वच्छं व्यक्तं पावकं महत् ॥ ३९ ॥ सर्गकाले तु संप्राप्ते ज्ञात्वाचा-

वर्णि
त्र सर्गे पि महंकारात्तु तामसात्कीर्तितस्ते समासेन प्रवक्ष्याम्यनघ ॥ ५१ ॥ तैजसानींद्रियाण्याहुः देवा
वैकारिका दश ॥ एकादशं मनश्चात्र कीर्तितं तत्त्वचिंतकैः ॥ ५२ ॥ बुद्धींद्रियाणि पंचात्र पंच कर्मेंद्रिया-
णि च ॥ तानि वक्ष्यामि तेषां च धर्माणि कुलपावन ॥ ५३ ॥ श्रवणं चक्षुरक्शौ जिह्वा नासिका चैव पंचमी ॥ श-
ब्दादिज्ञानसिद्ध्यर्थं बुद्धियुक्तानि पंच वै ॥ ५४ ॥ पादोपस्थं हस्तवाणी — वाक् स्त्र द्विज पंचमी ॥ विसर्गानंद-
शिल्पी च गत्युक्ती कर्म तत्स्मृतं ॥ ५५ ॥ आकाशं वायु तेजांसि सलिलं पृथिवी तथा ॥ शब्दादिभिर्गुणै-
र्विप्र संयुक्तान्युत्तरोत्तरैः ॥ ५६ ॥ नानावीर्याः पृथग्भूताः ततस्ते संहतिं विना ॥ नाशक्नुवन्प्र ---
हुसमागम्य कृत्स्नशः ॥ ५७ ॥ पुरुषाधिष्ठितत्वाच्च योगमासाद्य परस्परमपाश्रयात् ॥ एकसंघातलक्ष्या-
प्य --- चैक्यमशेषतः ॥ ५८ ॥ पुरुषाधिष्ठितत्वाच्च अव्यक्तानुग्रहेण च ॥ महदादयो विशेषांतास्त्वंडमु-
त्पादयंति ते ॥ ५९ ॥ तत्क्रमेण विवृद्धं तु जलबुद्बुदवत्स्थितं ॥ भूतेभ्योंडं महाबुद्धे वृहत्तदुदकेश-
यं ॥ ६० ॥ प्राकृतं ब्रह्मरूपस्य विष्णोः स्थानमनुत्तमं ॥ तत्राव्यक्तस्वरूपोसौ विष्णुर्विश्वेश्वरः प्रभुः

६२ ब्रह्मास्वरूपमास्थाय स्वयमेव व्यवस्थितः गर्भोदकं समुद्राश्च तस्यासन्वै महात्मनः अद्रिद्वी-
पसमुद्राश्च सज्योतिर्लोकसंग्रहः तस्मिन्नंडे भवत्सर्वं सदेवासुरमानुषं ६३ रजोगुणयुतो
देवः स्वयमेव हरिः परः ब्रह्मरूपं समास्थाय जगत्सृष्टौ प्रवर्त्तते ६४ सृष्टं च --- नुयुगयां
वत्कल्पविकल्पनान्नरसिंहादिरूपेण रुद्ररूपेण संहरेत् ६५ ब्रह्मणा रूपेण सृजत्यनं-
तो जगत्समस्तं परिपाति विष्णुः रामादिरूपं समुपाश्रयापि तिष्ठत्यापि रुद्रः प्रकरोति नाशं
६६ इति श्रीनरसिंहपुराणे सर्गकथने पञ्चमोऽध्यायः सूत उवाच ब्रह्मा तु
जगत्स्रष्टा नरसिंहः प्रवर्त्तितः यथा ते कथयिष्यामि तं राजन्निबोध मे १ नारायणाख्यो
भगवान्ब्रह्मा लोकपितामहः उत्पन्नः प्रोच्यते विद्वन्नित्योऽसावुपचारतः २ निजेन
तस्य मानेन आयुर्वर्षशतं स्मृतं कालसंख्याविभजनेन तस्यायुः परिगण्यते ३ अनिमेषां
चैव कलानां च राणामचराश्चये कल्पसु सागरादीनां अशेषाणां च सत्तम ४ संख्या-

स्थानं च ते वक्ष्ये मनुष्याणां निबोध मे अष्टादश निमेषास्तु काष्ठैका परिकीर्तितः ५
काष्ठा त्रिंशत्कला ज्ञेया कला त्रिंशन्मुहूर्तकं ६ त्रिंशत्संख्यैरहोरात्रं मुहूर्तैर्मानुषं स्मृतं अ-
होरात्राणि तावन्ति मासः पक्षद्वयात्मकः ७ तैः षड्भिरयनं मासैर्द्वेऽयने दक्षिणोत्तरे अय-
नं दक्षिणं रात्रिर्देवानामुत्तरं दिनं ८ अयनद्वितयं वर्षं मर्त्यानामिह कीर्तितं नृणां मासः पितृ-
णां तु अहोरात्रमुदाहृतं ९ वस्वादीनामहोरात्रं मानुषो वत्सरः स्मृतः दिव्यैर्वर्षसहस्रैस्तु कृ-
तत्रेतादिसंज्ञितं १० चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे चत्वारि त्रीणि द्वे चैकं कृतादिषु
यथाक्रमं ११ दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः तत्प्रमाणैः शतैः संध्या पूर्वा तत्र वि-
धीयते १२ संध्यांशकः तत्तुल्यो युगस्यानन्तरो द्विजा संध्यासंध्यांशयोर्मध्ये यः कालो वर्त्त-
ते द्विज १३ युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञकः कृतं त्रेता द्वापरं च कलिश्चेति चतुर्यु-
गं १४ प्रोच्यते तत्सहस्रं तु ब्रह्मणो दिवसं द्विज ब्रह्मणो दिवसे ब्रह्मन्मनवस्तु चतुर्दश १५

न्भवंति परिमाणं च । तेषां कालकृतं शृणु । सप्तर्षयस्तु शक्रोयमनुस्तत्सूनवोपिपाः । १६ । एक
कालं हि सृज्यंते संहृयंते च पूर्ववत् । चतुर्युगानां संख्या च साधिका ह्येकसप्ततिः । १७ । मन्वंतरं
मनोः कालः शक्रादीनामपि द्विज । अष्टौ शतसहस्राणि दिव्या या संख्यया स्मृतः । १८ । द्विपंचाशत्त
थान्यानि सप्तचान्यानि वै मुने । विंशतिश्च सहस्राणि कालोयं साधिकः स्मृतः । १९ । ब्राह्ममेकमह
र्ज्ञेयं एतद्देवानुकीर्तनं । एतस्माद्दोसमनसा ससृज्ञा देवांस्तथा पितॄन् । २० । गंधर्वान् राक्षसा
न् यक्षान् पिशाचान् गुह्यकांस्तथा । ऋषीन् विद्याधरांश्चैव मनुष्यांश्च पशूंस्तथा । २१ । पक्षि
णः स्थावरांश्चैव पिपीलिकभुजंगमान् । चातुर्वर्ण्यं तथा सृष्ट्वा नियुज्याध्वरकर्मणि । २२
पुनर्दिनांते त्रैलोक्यमुपसंहृत्य स प्रभुः । शेते शेषानंतशायते नावतीं रात्रिमव्ययः ॥ २३ । त
स्यांते भून्महान् कल्पः पाद्म इत्यपि विश्रुतः । यस्मिन्मत्स्यावतारोभूत मंथनं च महोदधे २४
तद्वद्वाराहकल्पश्च तृतीयः परिकल्पितः । यत्र विष्णुः स्वयं जात्वा वाराहं वपुराश्रितः । २५ । उद्धृतं

वसुधां देवीं स्तूयमानो महर्षिभिः स्तूयमानो जगद्धामचराप्रमेयः प्रजाश्च सृष्टा सकला स्तथेशः । ने
मित्तिकाख्ये प्रलये समस्तं संहृत्य शेते हरिरादिदेवः । २६ । इति श्रीनरसिंहपुराणे सर्गचरनाया
द्वितीयोऽध्यायः । श्रीसूत उवाच । तत्र सुप्तस्य देवस्य नाभौ पद्ममभून्महत् । तस्मिन् पद्मे महा
भाग वेदवेदांगपारगः । १ । ब्रह्मोत्पन्नस्तते नोक्तः प्रजाः सृज महामते । एवमुक्त्वा तिरोभावं गतो
नारायणः प्रभुः । २ । तथेत्युक्त्वा स तं देवं विष्णुं ब्रह्मापि चिंतयन् । आस्ते किंचिज्जगद्बीजं नाध्यग
च्छत किंचन । ३ । तावत्तस्य महान् रोषो ब्रह्मणोभून्महात्मनः । ततो बालः समुत्पन्नः तस्याङ्के रोष
संभवः । ४ । स रुदन्वारितस्तेन ब्रह्मणाव्यक्तमूर्तिना । नाम मे देहि चेत्युक्तस्तस्य रुद्र इत्यसौ ददौ । ५
तेनासौ विसृजस्वेति प्रोक्तो लोकमिमं पुनः । अशक्तः सत्र सलिले ममज्ज तपसे द्रुतः । ६ । तस्मिन्
सलिलमग्ने तु पुनरन्यं प्रजापतिं । ब्रह्मा ससर्ज भूतेशो दक्षिणांगुष्ठतोपरं । ७ । दक्षं वामततोंगु
ष्ठे तस्य पत्नी च जायत । स तस्यां जनयामास मनुं स्वायंभुवं प्रभुः । ८ । तस्मात्संभविता सृष्टिः

ना०पु०
६

प्रजानां ब्रह्मणस्तदा ॥ इत्येवं कथितास्सम्यङ्मया ते मुनिसत्तम ॥ सृजतो जगतीं तस्य किं त्वयः
श्रोतुमिच्छसि ॥ ९ ॥ भरद्वाज उवाच ॥ संक्षेपेणैतदाख्यानं च यामे लोमहर्षण ॥ विस्तरेण पु
नर्ब्रूहि आदिसर्गं महामते ॥ १० ॥ सूत उवाच ॥ तथैव कल्पावसाने निशासुप्तोत्थितः
प्रभुः ॥ सत्वोद्रिक्तस्तदा ब्रह्मा शून्यं लोकमवैक्षत ॥ ११ नारायणः परोचिन्त्यः पूर्वेषामपि
पूर्वजः ॥ ब्रह्मस्वरूपी भगवाननादिः सर्वसंभवः ॥ इमं स्वाहाहरं तत्र श्लोकं नारा
यणं प्रति ॥ ब्रह्मस्वरूपिणं देवं जगतः प्रभवात्मकं ॥ १३ ॥ आपो नारा इति प्रोक्ता आपो वै न
रसूनवः ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ १४ ॥ सृष्टिं चिंतायतस्तस्य कल्पादि
षु यथा पुरा ॥ अबुद्धिपूर्वकं तस्य प्रादुर्भूतं तमस्तदा ॥ १५ ॥ तमो मोहो महामो[illegible]मोहस्तामि
स्रो ह्यंधसंज्ञितः ॥ अविद्या पंचपर्वैषा प्रादुर्भूता महात्मनः ॥ १६ ॥ पंचधावस्थितः सर्गो ध्याय
तः प्रतिबोधवान् मुख्यसर्गः स विज्ञेयः सर्गसिद्धिविचक्षणैः ॥ १७ ॥ यत्पुनः रन्यध्यातस्य ध्या

राम०
६

यतः समपद्यत तिर्यक्स्रोतस्तस्मात्तिर्यक्योनिस्ततः स्मृतः ॥ १८ ॥ पश्वादयस्ते विख्याता
उत्पथग्राहिणस्तु ते ॥ तमप्यसाधकं मत्वा तिर्यक्योत्यं चतुर्मुखः ॥ १९ ॥ ऊर्ध्वस्रोतस्ततो
यस्तु सात्विकः समवर्तत ॥ तदा तुष्टोन्यसर्गं च चिंतयामास वै प्रभुः ॥ २० ॥ ततश्चिंतय
तस्तस्य सर्गवृद्धिं प्रजापतेः ॥ अर्वाक्स्रोतः समुत्पन्ना मनुष्याः साधकामता ॥ २१
नव प्रकारा बहुजात मायुन्कार जोविधिकाः ॥ तस्मात्ते दुःखबहुलाः भूयो भूयश्च का
रिणः ॥ २२ ॥ एतत्ते कथिताः सम्यग्विद्वो मुनिसत्तम ॥ प्रथमं महतः सर्गस्तन्मात्राणां द्विती
यकः ॥ २३ ॥ वैकारिकस्तृतीयस्तु सर्ग ऐंद्रियकः स्मृतः ॥ मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थाव
राः स्मृताः ॥ २४ ॥ तिर्यक्स्रोतस्तु यः प्रोक्तः तिर्यग्योनिः स उच्यते ॥ ततोर्ध्वस्रोतसः षष्ठो देवस
र्गस्तु स स्मृतः ॥ २५ ॥ ततोर्वाक्स्रोतसः सर्गः सप्तमो मानुषः स्मृतः ॥ अष्टमो ऽनुग्रहः सर्गः
सात्विकोयउदाहृतः ॥ नवमो रुद्रसर्गस्तु नवसर्गाः प्रजापते ॥ पंचैते वैकृताः सर्गाः प्राकृ

न॰पु॰ ७

तास्तेत्रयःस्मृताः ब्रह्मतावैष्णुतावेवजगतोमूलहेतवः सृजतोब्रह्मणःसृष्टिमुत्पन्नायेमये
रिता तंतंविकारंचपरंपरेशोमायामधिष्ठायसृजत्यनंतः ब्रह्मरूपीपरमात्मसंज्ञःसंपे
र्यमाणोनिखिलात्मविद्यः इतिश्रीनृसिंहपुराणेसृष्टिरचनाप्रकारोनामतृतीयोध्यायः
भरद्वाजउवाच नवधासृष्टिरुत्पन्नाब्रह्मणोव्यक्तजन्मनः कथंसावर्द्धसेसूतएतत्कथय
मेधुना १ सूतउवाच प्रथमंब्रह्मणःसृष्टामरीच्यादयएवच मरीचिरत्रिश्चतथाङ्गिराःपु
लहःक्रतुः २ पुलस्त्यश्चमहातेजाःप्रचेताभृगुरेवच नारदोदशमश्चैववसिष्ठश्चमहाद्युतिः ३
सनकादयोनिवृत्ताख्येतेचधर्मेनियोजिताः प्रवृत्ताख्येमरीच्याद्याःमुक्त्वैकंनारदंमुनिं ४ यो
सौप्रजापतिस्त्वन्योदक्षनामांगसंभवः तस्यदौहित्रवंशेनजगदेतच्चराचरं ५ देवाश्चदानवा
श्चैवगंधर्वोरगपक्षिणः सर्वेदक्षस्यकन्यासुजाताःपरमधार्मिकाः ६ चतुर्विधानिभूतानि
स्थावराणिचराणिच वृद्धिंगतानितान्येवमनुसर्गोद्भवानितु ७ अनुसर्गस्यकर्त्तारोम

राम॰ ७

रीच्याद्यामहर्षयः वसिष्ठांतामहाभागाब्रह्मणोमानसोद्भवाः ८ सर्गंतुभूतानिधियश्चराचरा
णिव्यातानिसर्वंसृजतेमहात्मा सएवपश्चाच्चतुरास्यरूपीमुनिस्वरूपीचसृजत्यनंतः ९
इतिनरसिंहपुराणेचतुर्थोऽध्यायः ४ भरद्वाजउवाच रुद्रसर्गंतुमेब्रूहिविस्तरेणम
हामते पुनःसर्वेमरीच्याद्याःससृजुस्तेकथंपुनः १ मित्रावरुणपुत्रत्वंवसिष्ठस्यकथंभवेत्
ब्रह्मणोमनसःपूर्वंउत्पन्नस्यमहामते २ सूतउवाच रुद्रसृष्टिंप्रवक्ष्यामितत्सर्गंश्चैवसत्त
मः प्रतिसर्गंमुनीनांतुविस्तराद्वदतःशृणु ३ कल्पादावात्मनस्तुल्यंसुतंप्रध्यायतस्ततः प्रा
दुरासीत्प्रभोरंकेकुमारोनीललोहितः ४ अर्द्धनारीनरवपुःप्रचंडोतिशरीरवान् तेजसाभा
सयन्सर्वादिशश्चविदिशश्चसः ५ तंदृष्ट्वातेजसादीप्तंप्रत्युवाचप्रजापतिः विभजात्मान
मद्यत्वंममवाक्यान्महामते ६ इत्युक्तोब्रह्मणाविप्ररुद्रस्तेनप्रतापवान् स्त्रीत्वंचैवपुरुषत्वंच
द्विधाकृद्विधाप्याकरोत ७ बिभेदपुरुषत्वंचदशधाचैकधाचसः तेषांनामानिवक्ष्यामिश्रृणु

मेद्विजसत्तम ॥ ८ ॥ अजैकपादहिर्बुधः कपाली रुद्र एव च ॥ हरश्च बहुरूपश्च त्र्यंबकश्चापराजितः
॥ ९ ॥ वृषाकपिश्च शंभुश्च कपर्दी रैवतस्तथा ॥ एकादशैते कथिता रुद्रास्त्रिभुवनेश्वरा
: ॥ १० ॥ अजैकपाच्चैव तथा रुद्रो विज्ञेय ध्वजराधकं ॥ धातु से व बहुरूपेण पत्नी सैव प्रतिष्ठि
ता ॥ ११ ॥ तप घृत्वा जले घोरमुत्तीर्णः सयदा पुरा ॥ तदा सस्रष्ट्वान्देवो रुद्रस्तत्र प्रताप
वान् ॥ १२ ॥ तपोबलेन विप्रेंद्र भूतानि विविधानि च ॥ पिशाचवदनांश्चैव सिंहोष्ट्रमकरा
ननान् ॥ १३ ॥ वेतालप्रमुखान्भूतानन्यांश्चैव सहस्रशः ॥ विनायकानां मुख्यानां वि
शाखो घर्द्दमेव च ॥ १४ ॥ अन्यत्कार्यं समुद्दिश्य सस्रष्ट्वान्स्कंदमेव च ॥ एवं प्रकारो रुद्रोसौ
मया ते कीर्त्तितः प्रभुः ॥ १५ ॥ अनुसर्गं मरीच्यादेः कथयामि निबोध मे ॥ देवाद्याः स्थावरांतश्च
प्रजाः सृष्टाः स्वयंभुवा ॥ १६ ॥ यस्य च प्रजाः सर्वाः न व्यवर्द्धत धीमतः ॥ स तदा मानसान्पु
त्रान्सदृशानात्मनोसृजत् ॥ १७ ॥ मरीचिमत्र्यंगिरसं पुलस्त्यं पुलहं क्रतुं ॥ प्रचेतसं वसिष्ठं

च भृगुं चैव मरीचिमतिः ॥ १८ ॥ नव ब्रह्माण इत्येते पुराणे निश्चयं गताः ॥ अग्निश्च पितरश्चैव
ब्रह्मपुत्रौ तु मानसौ ॥ १९ ॥ सृष्टिकाले महाभागौ त्वमन स्वयंभुवो ऽन्तौ ॥ शतरूपां च सृष्ट्वा तु
कन्यां समत वे दशौ ॥ २० ॥ तस्माच्च पुरुषाद्देवी शतरूपा व्यजायत ॥ प्रियव्रतोत्तानपादौ प्रसूतिं
देवकन्यकां ॥ २१ ॥ दक्षो प्रसूतिं दत्ताय मनुः स्वायंभुवः सुतां ॥ प्रसूत्यां च तदा दक्षः चतुर्विंशति
कं तथा ॥ २२ ॥ ससर्ज कन्यकास्तांश्च शृणु नामानि मे धुना ॥ श्रद्धा प्रीति धृतिस्तुष्टिः पुष्टिर्मेधा त
था क्रिया ॥ २३ ॥ बुद्धिर्लज्जा वपुः शांतिः सिद्धिः कीर्त्तिस्त्रयोदशी ॥ अपत्यार्थं प्रजग्राह धर्मो दाक्षा
यणीः प्रभुः ॥ २४ ॥ श्रद्धादीनां तु पत्नीनां जाता कामादयः सुताः ॥ धर्मस्य पुत्रपौत्राद्यैः धर्मवंशो वि
वर्द्धितः ॥ २५ ॥ तास्तः सिद्धा यवीयस्य तासां नामानि कीर्त्तये ॥ संभूतिश्चानुसूया च स्मृतिः प्रीतिः क्ष
मा तथा ॥ २६ ॥ सन्नतिश्चापसत्या च ऊर्ज्जा ख्यातिर्द्विजोत्तम ॥ तद्वत्सुत्रं महाभागं मातरिश्चापसत्यव
न् ॥ २७ ॥ स्वाहा यदशमी ज्ञेया स्वधा चैकादशी स्मृता ॥ एताश्च दत्ता दक्षेण ऋषीणां भावितात्मनां ॥ २८ ॥

न॰पु॰ मरीच्यादीनां तु ये पुत्रास्तान्नहं कथयामि ते पत्नी मरीचेः संभूतिः जज्ञे सा कश्यपं मुनिं २९ स्मृतिश्चां
९ गिरसः पत्नी प्रसूता कन्यकास्तथा सिनीमेरीचेःन्तृतिसंः जज्ञे सा कश्यपं सिनीवाली कुहूश्चैव राका
चानुमतिस्तथा ३० अनुसूया तथा चात्रेर्जज्ञे पुत्रानकल्मषान् सोमं दुर्वाससं चैव दत्तात्रेयं
च योगिनं ३१ पितरो ब्रह्मणः सृष्टा व्याख्याता ये मया तव तेभ्यः स्वधा सुते जज्ञे मेनां वैधारिणीं
तथा ३२ प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयंभुवा यथा ससर्ज भूतानि तथा मे शृणु सत्तम
३३ मनसैव हि भूतानि पूर्वं दक्षोसृजन्मुनिः देवानृषींश्च गंधर्वानसुरान्पन्नगांस्तथा ३४ य
दास्य मनसा जाता नाभ्यवर्द्धंत ते द्विज तदा संचिंत्य स मुनिः सृष्टिहेतोः प्रजापतिः ३५ मैथुने
नैव धर्मेण सिसृक्षुर्विविधाः प्रजाः असिक्नीमुदवहत्कन्यां वीरणस्य प्रजापते ३६ षष्टिं दक्षोस राम॰
जत्कन्या वीरण्यामिति नः श्रुतं ददौ स दश धर्माय कश्यपाय त्रयोदश ३७ सप्तविंशति सोमा ९
य चतस्रोरिष्टनेमिने द्वे चैव बहुपुत्राय द्वे चैवांगिरसे तथा ३८ द्वे कृशाश्वाय विदुषे तदपत्या

नि मे शृणु विश्वेदेवास्तु विश्वायाः साध्या साध्यान्वसूयत ३९ मरुत्वत्यां मरुत्वंतो वसोस्तु
वसवः स्मृताः भानोस्तु भानवो देवा मुहूर्त्तायां मुहूर्त्तजाः ४० लंबायाश्चैव घोषाख्यो नागवी
थिश्च जामिजा पृथिवीविषयं सर्वं मरुत्वत्यामजायत ४१ संकल्पायासंकल्पः पुत्रो जज्ञे म
हामते ये त्वनेकवसुप्राणा देवा ज्योतिपुरोगमाः ४२ वसवोष्टौ समाख्यातास्तेषां नामानि
मे शृणु आपो ध्रुवश्च सोमश्च धर्म्मश्चैवानिलोनलः ४३ प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकी
र्तिताः तेषां पुत्राश्च पौत्राश्च शतशोथ सहस्रशः ४४ साध्यायैश्च बहवः प्रोक्तास्तत्पुत्राश्च सह
स्रशः अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा खसा ४५ सुरभिर्विनता चैव तथा क्रोधवशा इ
रा कद्रूर्मुनिश्च धर्म्मज्ञ तदपत्यानि मे शृणु ४६ अदित्यां कश्यपाज्जाताः पुत्रा द्वादश शोभनाः
तान्हं नामतो वक्ष्ये शृणुष्व गदतो मम ४७ भगोंशश्चार्यमा चैव मित्रोथ वरुणस्तथा सवि
ता चैव धाता च विवस्वांश्च महामते ४८ त्वष्टा पूषा तथैवेंद्रो द्वादशो विष्णुरुच्यते दित्याः पुत्र

न०पु० १०

द्वयं जज्ञे कश्यपादितिनेः श्रुतं ॥ ४९ ॥ हिरण्याक्षो महाकायो वाराहेण तु यो हतः ॥ हिरण्यकशिपुः श्चै
श्चैव नरसिंहेन यो हतः ॥ ५० ॥ अन्ये च बहवो दैत्या दितिपुत्राश्च दानवाः ॥ अरिष्टायां तु गंधर्वा जि
ज्ञिरे कश्यपात्तथा ॥ ५१ ॥ सुरसायामथोत्पन्ना विद्याधरगणा बहु ॥ गा वै स जनयामास सुरभ्यां
कश्यपो मुनिः ॥ ५२ ॥ विनतायां तु द्वौ पुत्रौ प्रख्यातौ गरुडारुणौ ॥ गरुडो देवदेवस्य विष्णोरमितते
जसः ॥ ५३ ॥ वाहनत्वमियात्प्रीत्या त्वरुणः सूर्यसारथिः ॥ ताम्रायां कश्यपाज्जाताषट्पुत्रास्ता
न्निबोध मे ॥ ५४ ॥ अश्वा उष्ट्रा गर्दभाश्च हस्तिनो गवया मृगाः ॥ क्रोधायां जज्ञिरे तद्वतये भूम्यां दुष्ट।
जातयः ॥ ५५ ॥ इरा वृक्षलतावल्लीतृणजातीश्च जज्ञिरे ॥ स्वसा तु यक्षरक्षांसि मुनिरप्सरसस्तथा
५६ ॥ कद्रूपुत्रा महानागा दंदशूका विषोल्बणाः ॥ सप्तविंशतिया प्रोक्ताः सोमपत्न्योथ सुव्रता ५७ राम० १०
५ तासां पुत्रा महासत्त्वा बुधा— च वन्न द्विज ॥ अरिष्टनेमिपत्नीनामपत्यानीह षोडश ॥ ५८ ॥ बहुपु
त्रस्य विदुषश्चत्वारो विद्युदादयः ॥ प्रत्यंगिरसुताश्रेष्ठा ऋषयो ऋषिसंस्कृताः ॥ ५९ ॥ कृशाश्व

स्य तु देवर्षेर्देवाश्च ऋषयः सुताः ॥ एते युगसहस्रांते जायंते पुनरेव हि ॥ ६० ॥ एते कश्यपदायादा
ः कीर्तिताः स्थाणुजंगमाः ॥ स्थितौ स्थितस्य देवस्य नरसिंहस्य धर्मतः ॥ ६१ ॥ एता विभूतयो विप्र म
या ते परिकीर्तिताः ॥ कथिता दक्षकन्यानां मया तेपत्यसंततिः ॥ ६२ ॥ श्रद्धावान्संस्मरेदेतान्यः
स संतानवान्भवेत् ॥ सर्गानुसर्गौ कथितौ मया ते समासतः सृष्टिविवृद्धिहेतोः ॥ पठंति ये वि
ष्णुपराः सदा नराः इदं द्विजास्ते विमला भवंति ॥ ६३ ॥ इति श्रीनरसिंहपुराणे सृष्टिकथने पंच
मोध्यायः ॥ सूत उवाच ॥ सृष्टिस्ते कथिता विष्णोर्मया सजगतो द्विज ॥ देवदानवयक्षाद्या
यथोत्पन्ना महात्मना ॥ १ ॥ यमुद्दिश्य त्वया पृष्टः पुराहं मुनिसंनिधौ ॥ मित्रावरुणपुत्रत्वं वसिष्
स्य कथं त्विति ॥ २ ॥ तदिदं कथयिष्यामि पुण्याख्यानं पुरातनं ॥ शृणुष्वैकाग्रमनसा भरद्वाज वि
शेषतः ॥ ३ ॥ सर्वधर्मार्थतत्त्वज्ञः सर्ववेदविदां वरः ॥ पारगः सर्वविद्यानां दक्षो नाम प्रजापतिः ॥
४ ॥ तेन दत्ताः सुताः कन्याः सर्वाः कमललोचनाः ॥ सर्वलक्षणसंपूर्णाः कश्यपाय त्रयोदश ॥ ५

न०पु० ११ तासां नामानि वक्ष्यामि तन्निबोधत ममाधुना । अदितिर्दितिर्दनुः कालामुहूर्त्ता सिंहिका मुनिः
६ इरा क्रोधा च सुरभिर्विनता सुरसा स्वसा । कद्रूश्च सरमा चैव या नु देवशुनी स्मृता ७
दक्षस्यैता दुहितरस्ताः प्राजापत्यस्य पायसः । तासां ज्येष्ठा वरिष्ठा च अदितिर्नाम नामतः
८ अदितिः सुषुवे पुत्रान् द्वादशाग्निसमप्रभान् । तेषां नामानि वक्ष्यामि शृणुध्वं गदतो
मम ९ यैरियं वासरं नक्तं वर्त्तते क्रमशः सदा । भगोंऽशस्त्वर्यमा चैव मित्रोऽथ वरुणस्त
था १० सविता चैव धाता च विवस्वांश्च महामते । त्वष्टा पूषा तथैवेन्द्रो विष्णुर्द्वादशमः स्मृत
: ११ एते च द्वादशादित्या लालयन्ते चर्षयन्ति च । तस्याश्च मध्यमः पुत्रो वरुणो नाम नामत
: १२ लोकपालो इति ख्यातो वारुण्यां दिशि शस्यते । पश्चिमस्य समुद्रस्य पती यो दिशि राजते राम० ११
१३ जातरूपमयः श्रीमान् अस्तो नाम शिलोच्चयः । सर्वरत्नमयैः शृङ्गैः धातुप्रस्रवणान्वि
तैः १४ संयुक्तो जातिशैलेशो नानारत्नमयः शुभः । महादरीगुहाभिश्च सिंहशार्दूलनादि

तः १५ नानाविविक्तभूमीषु मयैः सिद्धगन्धर्वसेवितः । यस्मिन् गते दिनकरे तमसापूर्यते जगत्
१६ तस्य शृङ्गे महादिव्या जाम्बूनदमयी शुभा । ऐस्यां वरुण आदित्यो दीप्यमानः स्वतेजसा
रम्या मणिमयैः स्तम्भैर्विहिता विश्वकर्मणा ७ पुरी विश्वावती नाम समृद्धा भोगसाधनैः । तस्यां
वरुण आदित्यो दीप्यमानः स्वतेजसा १८ पाति सर्वानिमान् लोकान् नियुक्तो ब्रह्मणा स्वयं
उपास्यमानो गन्धर्वैस्तथैवाप्सरसां गणैः १९ दिव्यगन्धानुलिप्ताङ्गो दिव्याभरणभूषितः । क
दाचिद्वरुणो याति मित्रेण सहितो वनं २० ऊरुह्वेत्रे शुभे रम्ये सदा ब्रह्मर्षिसेविते । नानापुष्पफ
लोपेते नानातीर्थसमाकुले २१ आश्रमा यत्र दृश्यन्ते मुनीनामूर्ध्वरेतसां । तस्मिन् तीर्थे स
मासित्य बहुपुष्पफलोदके २२ चीरवल्काजिनधरौ चेरतुस्तप उत्तमं । तत्रैकस्मिन् वनो
द्देशे विमलो ह्रदः शुभः २३ बहुगुल्मलताकीर्णो नानापक्षिनिषेवितः । नानातरुनल
लोनलिन्या चोपशोभितः २४ पौण्डरीक इति ख्यातो मीनकच्छपसेवितः । ततस्तु मित्रावरुणौ

न०पु०
१२

तपोवनचारिणौ । तं तु देशं गतौ देवौ विचरंतौ यदृच्छया । ताभ्यां तत्रांतरा दृष्टा उर्वशी तु वराप्सरा । स्ना
यंती सहितान्याभिः सखीभिः सा वरानना । गायंती च हसंती च विश्वस्ता निर्जने वने २६ गौरीक
मलगर्भाभा स्निग्धकृष्णशिरोरुहा । पद्मपत्रविशालाक्षी रक्तोष्ठी मृदुभाषिणी २७ शंखकुंदे
दुधवलैर्दंतैरविरलैः समैः । सुभ्रूः सुनाशा सुनखी सुललाटा मनस्विनी २८ सिंहवत्क्षामम
ध्यांगी पीनोरुजघनस्तनी । मधुरालापचतुरा सुमध्या चारुहासिनी । २९ रक्तोत्पलकरतला
सुपदी विनयान्विता । पूर्णचंद्रनिभा बाला मत्तद्विरदगामिनी । ३० दृष्ट्वा तस्यास्तु तद्रूपं तौ देवौ
विस्मयं गतौ । यस्या हास्येन लास्येन स्मितेन जल्पितेन च । ३१ मृदुना वायुना चैव सीतानिले
सुगंधिना । मत्तभ्रमरगीतेन पुंस्कोकिलरुतेन च । ३२ सुस्वरेण हि गीतेन उर्वश्या मधुरेण राम० १२
च । इंगितौ च कटाक्षेण चस्कंदतुस्तावुभावपि । ३३ निमेः शापात्प्रोक्तस्य स्वदेहान्मुनिसत्तमः ।
वसिष्ठ मित्रावरुणात्मजासीन्मित्रस्य देवस्य पितामहोक्तः । ३४ त्रिधा समपतद्रेतः कमलेप

स्थले जले । अरविंदे वसिष्ठस्तु जातस्तु मुनिसत्तमः ३५ स्थले त्वगस्त्यः संभूतो जले मत्स्यो महाद्युति
ः स तत्र जातो मतिमान् वसिष्ठः कुंभे त्वगस्त्यः सलिले च मत्स्यः ३६ स्थानत्रये तत्पतितं समानं मि
त्रस्य यस्माद्वरुणस्य रेतः । एतस्मिन्नेव काले तु गता सा उर्वशी दिवं ३७ उपेत्य तान् ऋषीन् देवौ ग
तौ स्वयः स्वमाश्रमं । यमावपितु तप्येते पुनरुग्रं परं तपः ३८ तपसा प्राप्तुकामौ तौ परं ज्योतिः
सनातनं । तपस्यंतौ सुरश्रेष्ठौ ब्रह्मागत्येदमब्रवीत् । ३९ । मित्रावरुणकौ देवौ पुत्रवंतौ महाफलौ
सिद्धिर्न विप्यतातिशया युवयोर्वै स्तवीपुनः । ४० स्वाधिकारेण रक्षेयेतामधुना लोकसाक्षिकौ
इत्युक्त्वांतर्दधे ब्रह्मा तौ स्थितौ स्वा तौ स्वाधिकारकौ ४१ एवं ते कथितं विप्र वसिष्ठस्य महात्मनः
मित्रावरुणपुत्रत्वमगस्त्यस्य च धीमतः । ४२ इदं पुंसीयमाख्यानं चारुणं पापनाशनं । पुत्रका
मास्तु ये केचित् शृण्वंतीदं शुचिव्रताः । ४३ अचिरादेव पुत्रांस्ते लभंते नात्र संशयः । यश्चैत
त्पठते नित्यं हव्यकव्येषु द्विजोत्तमः । ४४ देवाश्च पितरस्तस्य प्राप्नुयांति परं सुखं । यश्चैतच्छृणु

न॰पु॰
१३

यान्तितंघातरुन्धायमानवः ४५ विहंतेसमुखंन्नमोविस्नुलोकंसगच्छति इदंतेतदाख्या
नमिदंमयेरितंपुरातनंवेदविदेरुदाहितं एतिष्यतेयस्तुश्रृणोतिसर्वदासपातिशुद्धोहरिलो
कमंजसा ४६ इतिश्रीनरसिंहपुराणेपुंसवनाख्यानंनामषष्ठोध्यायः ६ श्रीभरद्वाज
उवाच मार्कंडेयेनमुनिनाकथंमृत्युःपराजितः एतदाख्याहिमेसूततत्वयैतच्छ्रुतंपुरा १
सूतउवाच इदंतुमहाख्यानंभरद्वाजशृणुष्वमे श्रृण्वंतुऋषयश्चैमेपुराहत्तंब्रवीम्यहं २
कुरुक्षेत्रेमहापुण्येव्यासपीठेवराश्रमे तत्रासीनंमुनिवरंकृष्णद्वैपायनंमुनिं ३ कृ
तस्नानंकृतजप्यंमुनिशिष्यैःसमावृतं वेदवेदार्थतत्वज्ञंसर्वशास्त्रविशारदं ४ प्र
णिपत्यायथान्यायंशुकःपरमधार्मिकः इममेवार्थमुद्दिश्यतंपप्रच्छकृतांजलिः ५ य राम॰
मुद्दिश्यंवयंदृष्टास्त्वयात्रमुनिसंनिधौ नरसिंहस्यतत्क्षेत्रेनृतीर्थनिवासिनी ६ शुकउ १३
वाच मार्कंडेयेनमुनिनायथामृत्युःपराजितः तथातेकथयिष्यामिश्रृणुवत्समहामते

कथंमृत्युःपराजितः एतदाख्याहिमेतातश्रोतुमिच्छामितेधुना ७ व्यासउवाच मार्कंडेये
नमुनिनायथामृत्युःपराजितः तथातेकथयिष्यामिश्रृणुवत्समहामते ८ श्रृण्वंतुमुनय
श्चैमेकथ्यमानंमयाधुना मच्छिष्याश्चैववत्स एवंतुमहदाख्यानमुत्तमं ९ भृगोःख्यात्यांसमुत्प
न्नोमृकंडुर्नामवैसुतः सुमित्रानामवैपत्नीमृकंडोस्तुमहात्मनः १० धर्मज्ञाधर्मनिरतापतिशु
श्रूषणेरता तस्यांतुसुतोजातोमार्कंडेयोमहामतिः ११ भृगुपौत्रोमहाभागोबाल्येपिमहाम
तिः ववृधेवत्सरोबालःपित्रातत्रकृतक्रियः १२ तस्मिन्वैजातमात्रेतुआगमीकश्चिदब्रवीत्
वर्षेद्वादशमेपूर्णेमृत्युरस्यभविष्यति १३ श्रुत्वातन्मातृपितरौदुःखितौतौबभूवतुः विदू
यमानहृदयौतामिरीक्ष्यमहामते १४ तथापितत्पितातस्ययत्नात्कालेक्रियांततः चकारसर्वां
मेधावीउपनीतोगुरोर्गृहे १५ वेदानेवाध्यसन्नास्तेगुरुशुश्रूषणोद्यतः स्वीकृत्यवेदशास्त्रा
णिसपुनर्गृहमागतः १६ मातापित्रोर्नमस्कृत्यपादयोर्विनयान्वितः तस्थौतत्रगृहेधी

न॰पु॰
१४

सान्मार्कंडेयो महामतिः ॥ १७ ॥ तं निरीक्ष्य महात्मानं सत्त्वज्ञं च विचक्षणं ॥ दुःखितौ तौ स्थितौ तत्र त-
न्मातपितरौ शुक ॥ १८ ॥ तौ दृष्ट्वा दुःखमापन्नौ मार्कंडेयो महामतिः ॥ उवाच वचनं तत्र किमर्थं दुः-
खमीदृशं ॥ १९ ॥ सदैव तत्कुरुषे मातस्तात तेन सह धीमता ॥ वक्तुमर्हसि दुःखस्य कारणं मम हर्षतः
॥ २० ॥ इत्युक्ता तेन पुत्रेण माता तस्य महात्मनः ॥ कथयामास तत्सर्वं स्वागमीयदुवाच ह ॥ २१ ॥ या
तच्छ्रुत्वा सो मुनिः प्राह मातरं पितरं पुनः ॥ पित्रा सार्द्धं त्वया मातर्न कार्यं दुःखमण्वपि ॥ २२ ॥ अ-
पनेष्यामि मृत्युं तपसा नात्र संशयः ॥ यथा चाहं चिरायुः स्यां तथा कुर्यामहं तपः ॥ २३ ॥ इत्यु-
क्त्वा तौ समाश्वास्य पितरौ वनमभ्यगात् ॥ अश्लीवृन्दं नाम वनं नानाऋषिनिषेवितं ॥ २४ ॥ तत्रा-
सौ मुनिभिः सार्द्धमासीनं स्वपितामहं ॥ भृगुं ददर्श धर्मज्ञं मार्कंडेयो महामतिः ॥ २५ ॥ अभिवाद्य राम॰
यथान्यायं भक्तीश्वेव सधार्मिकैः ॥ कृतांजलिपुटो भूत्वा तस्थौ तस्यु रसतो दसी ॥ २६ ॥ गतायुषं १४
ततो दृष्ट्वा पौत्रं ज्ञानवतां वरः ॥ भृगुराह महाभागं मार्कंडेयं तं तदाशिषं ॥ २७ ॥ किमागतोसि

पुत्रात्र पितृस्ते कुशलं पुनः ॥ मातुश्च बांधवानां च किमागमनकारणं ॥ २८ ॥ इत्येवमुक्तो भृगुणा
मार्कंडेयो महामतिः ॥ उवाच सकलं तस्मै आदेशि वचनं तदा ॥ पौत्रस्य वचनं श्रुत्वा भृगुस्तं
पुनरब्रवीत् ॥ एवं सति महाबुद्धे किं त्वं कर्म चिकीर्षसि ॥ ३० ॥ मार्कंडेय उवाच ॥ भूतापहारि-
णं मृत्युं जेतुमिच्छामि सांप्रतं ॥ शरणं त्वां प्रपन्नोस्मि तदुपायं वदस्व नः ॥ ३१ ॥ भृगुरुवाच ॥ नारा-
यणमनाराध्य तपसा महता सुत ॥ को जेतुं शक्नुयान्मृत्युं तस्मात्तं तपसार्चय ॥ ३२ ॥ तमनंतम-
जं विष्णुमनंतं पुरुषोत्तमं ॥ भक्तप्रियं सुरश्रेष्ठं भक्त्या त्वं शरणं व्रज ॥ ३३ ॥ तमेव शरणं पूर्वं गत-
वान्नारदो मुनिः ॥ तपसा महता वत्स नारायणमनामयं ॥ ३४ ॥ तत्प्रसादान्महाभाग नारदो ब्रह्मणः
सुतः ॥ जरामृत्युं विजित्यासौ दीर्घायुर्वर्द्धते सुखं ॥ ३५ ॥ तमच्युतं पुंडरीकाक्षं नारसिंहं जनार्द्दनं ॥ कः कु-
र्यान्मानवो वत्स मृत्युसेनानिवारणं ॥ ३६ ॥ तमनंतमजं विष्णुं कृष्णं जिष्णुं श्रियः पतिं ॥ गोविंदं गो-
पतिं देवं सततं शरणं व्रज ॥ ३७ ॥ नरसिंहं महादेवं यदि पूजयसे सदा ॥ वत्स जेतासि मृत्युं त्वं सत-

तं नात्र संशयः ॥ २८ ॥ व्यास उवाच ॥ उक्तः पितामहेनेवं भृगुणा पुनरब्रवीत् ॥ मार्कंडेयो महातेजा
विनयानतकंधरः ॥ २९ ॥ मार्कंडेय उवाच ॥ आराध्यः कथितस्तात विष्णुर्विश्वेश्वरः प्रभुः ॥ कथं कु
त्र मया कार्यस्त्वच्च तदाराधनं गुरो ॥ येन सोममृत्युं मृत्युमपोपनेष्यति ॥ भृगुरुवाच ॥ तुंगभद्रेति वि
ख्याता या नदी सह्यपर्वते ॥ तत्र नंदवटे वत्स त्वं प्रतिष्ठाप्य केशवं ॥ आराधय जगन्नाथं गंधपुष्पादि
भिः क्रमात् ॥ ३२ ॥ हृदि कृत्वेंद्रियग्रामं मनः संयम्य तत्त्वतः ॥ पुंडरीके देवेशं शंखचक्रगदाधरं ॥
३३ ॥ ध्यायन्नेकमनावत्स द्वादशाक्षरमव्ययः ॥ श्लोकः ॥ ॐ नमो भगवते वासुदेवाय ॥ इमं मंत्रं
द्विजपतो देवदेवस्य शार्ङ्गिणः ॥ प्रीतो भवति विश्वात्मा मृत्युं येनापनेष्यति ॥ व्यास उवाच ॥ इत्यु
क्तस्तं प्रणम्याथ स जगाम तपोवनं ॥ ३५ ॥ सह्यपादोद्भवायास्तु तुंगभद्रायास्तटमुत्तमं ॥ नानाद्रु
मलताकीर्णं नानापुष्पोपशोभितं ॥ ३६ ॥ गुल्मवेणुलताकीर्णं नानामुनिजनाकुलं ॥ तत्र विष्णुं प्र
तिष्ठाप्य गंधपुष्पादिभिः क्रमात् ॥ ३७ ॥ पूजयामास देवेशं मार्कंडेयो महामुनिः ॥ पूजयित्वा हरिं

तत्र तपस्तेपे सुदुश्चरं ॥ ३८ ॥ निराहारो मुनिस्तत्र वर्षमेकमतंद्रितः ॥ माघे कृष्णे त्वासन्ने दिने त
त्र महामतिः ॥ ३९ ॥ स्नात्वा यथोक्तविधिना कृत्वा विष्णोस्तथार्चनं ॥ हृदि कृत्वेंद्रियग्रामं विशुद्धेनांतरा
त्मना ॥ ४० ॥ आसनं स्वस्तिकं बध्वा कृत्वासौ प्राणसंयमं ॥ ॐकारोच्चारणाद्धीमान् कृत्वा संसविकाशये
त् ॥ ४१ ॥ तन्मध्ये रविसोमाग्निमंडलानि यथाक्रमं ॥ कल्पयित्वा हरेः पीठं तस्मिन्देशे सनातनं ॥ ४२
पीतांबरधरं कृष्णं शंखचक्रगदाधरं ॥ भावपुष्पैः समभ्यर्च्य मनस्तत्र स्थिरं निवेश्य च ॥ ४४ ॥ ब्रह्म
रूपं हरिं ध्यात्वा नतो मंत्रमुदीरयेत् ॥ ॐ नमो भगवते वासुदेवाय ॥ व्यास उ ॥ इत्येवं ध्यायतस्तस्य
मार्कंडेयस्य धीमतः ॥ ४५ ॥ मनस्तत्रैव संलग्नं देवदेवे जगत्पतौ ॥ ततो यमाज्ञया तत्र आगता यम
किंकराः ॥ ४६ ॥ पाशहस्तास्तु तं नेतुं विष्णुदूतैस्तु ते हताः ॥ शूलैः प्रहन्यमानास्तु द्विजं नु त्वायमुस्त
दा ॥ ४७ ॥ वयं निवर्त्स्य गच्छामो मृत्युः करे वागमिष्यति ॥ विष्णुदूतः ॥ यत्र नः स्वामिनो माम लोकनाथस्य
शार्ङ्गिणः ॥ ४८ ॥ को यमस्तत्र मृत्युर्वा कालः कलयतां वर ॥ व्यास उवाच ॥ आगत्य स्वयमेवात्र मृ

न०पु०
१६

तुः पार्श्वंमहात्मनः ॥ मार्कंडेयस्यचन्नामविष्णुकिंकरशंकया ॥ ४९ ॥ नेष्युद्यम्याशुमुशलानायसान
विष्णुकिंकराः ॥ विष्णुस्तयाहनिष्पामोमृत्युमद्येतिसत्स्थिता ॥ ५० ॥ ततोविष्णार्पितमनामार्कंडेयोमहा
मतिः ॥ तुष्टावप्रणतोभूत्वादेवदेवंजनार्दनं ॥ ५१ ॥ विष्णुनेवोदितंयत्तत्स्तोत्रंकर्णेमहात्मनः ॥ सु
भावितेनमनसातेनतुष्टावमाधवं ॥ ५२ ॥ मार्कंडेयउवाच ॥ नारायणंसहस्राक्षंपद्मनाभंपुरातनं
प्रणतोस्मिहृषीकेशंकिंमेमृत्युःकरिष्यति ॥ ५३ ॥ गोविंदंपुंडरीकाक्षमनंतमजमव्ययं ॥ केशवंचप्र
पन्नोस्मिकिंमेमृत्युःकरिष्यति ॥ ५४ ॥ वासुदेवंजगद्योनिंभानुवर्णमतींद्रियं ॥ दामोदरंप्रपन्नोस्मि
किंमेमृत्युःकरिष्यति ॥ ५५ ॥ शंखचक्रधरंदेवंछन्नरूपिणमव्ययं ॥ अधोक्षजंप्रपन्नोस्मिकिंमे
मृत्युःकरिष्यति ॥ ५६ ॥ वाराहंवामनंविष्णुंनरसिंहंजनार्दनं ॥ माधवंचप्रपन्नोस्मिकिंमेमृत्युःक
रिष्यति ॥ ५७ ॥ पुरुषंपुष्करंपुण्यंक्षेमबीजंजगत्पतिं ॥ लोकनाथंप्रपन्नोस्मिकिंमेमृत्युःकरि
ष्यति ॥ ५८ ॥ भूतात्मानंमहात्मानंयज्ञयोनिमयोनिजं ॥ विश्वरूपंप्रपन्नोस्मिकिंमेमृत्युःक०

राम०
१६

५९ ॥ सहस्रशिरसंदेवंव्यक्ताव्यक्तंसनातनं ॥ महायोगंप्रपन्नोस्मिकिंमेमृत्युः ॥ ६० ॥ इत्युदीरि
तमाकर्ण्यस्तोत्रंतत्रमहात्मनः ॥ अपयातस्ततोमृत्युर्विष्णुदूतैश्चपीडितः ॥ ६१ ॥ इतितेनजि
तोमृत्युर्मार्कंडेयेनधीमता ॥ प्रसन्नेपुंडरीकाक्षेनृसिंहेनास्तिदुर्लभं ॥ ६२ ॥ मृत्युंजयमिदंपु
ण्यंमृत्युप्रशमनंशुभं ॥ मार्कंडेयहितार्थायस्वयंविष्णुरुवाचह ॥ ६३ ॥ यइदंपठतेभक्त्यात्रिकालं
नियतःशुचिः ॥ नाकालेतस्यमृत्युःस्यान्नरस्याच्युतचेतसः ॥ ६३ ॥ हृत्पद्ममध्येपुरुषंपुरा
णंनारायणंशाश्वतमादिदेवं ॥ संचिंत्यसूर्यादपिराजमानंमृत्युंसयोगीजितवांस्तदैव ॥ ६५ ॥ इ
तिश्रीनरसिंहपुराणेमार्कंडेयमृत्युंजयोनामसप्तमोऽध्यायः ॥ श्रीः ॥ स ॥ व्यासउवाच ॥
मृत्युश्चकिंकराश्चैवविष्णुदूतैःप्रपीडिताः ॥ स्वराज्ञस्तेतुनिर्वेदंगत्वासंतुकुश्मुर्न्नशंमृत्युकिं
कराऊचुः ॥ शृणुराजन्वचोस्माकंतवाग्रेयद्ब्रवीमहे ॥ त्वदादेशाद्वयंगत्वामृत्युसंस्थाप्यहरतः
२ ॥ ब्राह्मणस्यसमीपंचत्वगोःपौ० त्रस्यसत्तम ॥ तंध्यायमानंकमपिदेवमेकाग्रमानसं ॥ ३ ॥ गंतुं

न॰पु॰ नश्चक्रास्तत्पार्श्वं वयं सर्वे महामते । यावत्तावन्महाकायैः पुरुषैः मुद्गरोद्यतैः ॥ ४ ॥ वयं निहत्य स्त
१७ स्थानान्मत्कस्तत्रागतः पुनः । अस्मान्निर्भर्त्स्य तत्रायं तैर्नारैर्मुद्गरोद्यतैः ॥ ५ ॥ एवमत्र तमानेतुं
ब्राह्मणं तपसि स्थितं । अशक्ता वयमेवात्र मत्कं नासह वै यम ॥ ६ ॥ तद्ब्रवीमि महाभाग यद्ब्र
ब्राह्मणस्य तु । देवं कं ध्यायते विप्रः के वा ते वै येऽर्हता वयं ॥ ७ ॥ व्यास उ॰ इत्युक्तः किंकरैः सर्वै
ः मत्कं नाच महामते । ध्यात्वा क्षणं महाबुद्धिः प्राह वैवस्वतो यमः ॥ ८ ॥ यम उ॰ शृणुध्वं नु किंक
राः सर्वे मत्कस्यात्र च मे वचः । सत्यमेतत्प्रवक्ष्यामि ज्ञानयोग ध्यानमार्गतः ॥ ९ ॥ नगौः
पौत्रो महाभागो मार्कण्डेयो महामतिः । स ज्ञात्वा ह्यात्मनः कालं गतो मत्कं जिगीषया ॥ १० ॥
त्वगुणोक्तेन मार्गेण सततेये परमं तपः । हरिमाराध्य मेधावी जपत्वैवाद्वादशाक्षरं ॥ ११ ॥ कार्येणैव राम॰
मनसा ध्यायते हृदि केशवं । सततं योगयुक्तस्तु स मुनिस्तत्र किंकराः ॥ १२ ॥ हरिध्यानमहाद १७
स्याबलं तस्य महामुनेः । नाम्नैव प्राप्तकाले तस्य वर्जं पश्यामि किंकराः ॥ १३ ॥ हृदिस्थे पुंडरीका

क्षे सततं भक्तवत्सले पश्यंतं विष्णुभक्तं तु कोहिंस्यात्तु केशवाश्रयं ॥ १४ ॥ तेपि वै पुरुषा विष्णोर्यै
र्यूयं ताडिता भृशं । अतऊर्ध्वं न गंतव्यं यत्र वै वैष्णवास्थिताः ॥ १५ ॥ न चित्रं ताडनं तत्र अहं मन्ये
नै॰क॰ महात्मभिः । भवतां जीवनं चित्रं यत्तैर्दत्तं पापबुद्धिः ॥ १६ ॥ नारायणपरं विप्रं कस्त्वं वीक्षितुमुत्स
हेत् । युष्माभिश्च महाया यैर्मार्कण्डेयं तैहेरःस्थिय ॥ १७ ॥ नरसिंहं महादेवं ये नराः पर्युपासते
तेषां पार्श्वं न गंतव्यं युष्माभिर्मम शासनात् ॥ १८ ॥ व्यास उवाच ॥ स एवं किंकरानुक्त्वा मत्कं च
पुरतः स्थितं । यमो निरीक्ष्य च जनं नरकस्थं न्यायादितं ॥ १९ ॥ कृपया परया युक्तो विष्णुभक्त्या वि
शेषतः । जनस्यानुग्रहाय यितेनोक्ता वाग्गिमाः शृणु ॥ २० ॥ उदके नाप्यजाने तु ब्राह्मणं पूजितः
प्रभुः । यो ददाति स्वकं लोकं स त्वया किं न पूजितः ॥ २१ ॥ नरसिंहो हृषीकेशः पुंडरीकनिभेक्षणः
स्मरणान्मुक्तिदो नॄणां स त्वया किं न पूजितः ॥ २२ ॥ इत्युक्त्वा नारकान्सर्वान्पुनराह स किंकरा
न् वै वैवश्वतो यमः साक्षाद्विष्णुभक्ति विहंगितः ॥ २३ ॥ नारदाय स विश्वात्मा प्राहैवं विष्णुरव्ययः

न०पु०
१९

ऽप्रमेयो वै सर्वेभ्यश्च सिद्धेभ्यः सततं श्रुतं ॥२५॥ तद्वः प्रीत्या प्रवक्ष्यामि हरिवाक्यमनुत्तमं ॥ शिक्षा
र्थं किंकराः सर्वे शृणुत प्रणता हरेः ॥२६॥ हे कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः ॥ ज
लं भित्त्वा यथा पद्मं नरकादुद्धराम्यहं ॥२७॥ पुंडरीकाक्ष देवेश नरसिंह त्रिविक्रम ॥ त्वामहं श
रणं प्राप्त इति यस्तं समुद्धरे ॥२८॥ त्वां प्रपन्नोऽस्मि शरणं देव देव जनार्दन ॥ इति यः शरणं प्राप्तस्तं
क्लेशादुद्धराम्यहं ॥२९॥ व्यास उवाच ॥ इत्युदीरितमाकर्ण्य हरिवाक्यं यमेन च ॥ नारकाः कृष्ण कृष्ण
कृष्णेति नरसिंहेति चुक्रुशुः ॥३०॥ यथा यथा हरेर्नाम कीर्तयंति स्म नारकाः ॥ तथा तथा हरेर्भ
क्तिमुद्वहंतोऽब्रुवन्निदं ॥३१॥ नरके पच्यमानस्य यमेन परिभाषितं ॥ किं त्वया नार्चितो देवः केश
वः क्लेशनाशनः ॥३१॥ नारका ऊचुः ॥ नमो भगवते तस्मै केशवाय महात्मने ॥ यन्नाम
कीर्तनात्सद्यो नरकाग्निः प्रशाम्यति ॥३२॥ भक्तप्रियाय देवाय रक्षाय हरये नमः ॥ लोकनाथ
य शांताय यज्ञेशायादिमूर्तये ॥३३॥ अनंतायाप्रमेयाय नरसिंहाय ते नमः ॥ नारायणाय गु

राम०
१९

रवे शंखचक्रगदाभृते ॥३४॥ वेदप्रियाय महते विक्रमाय नमो नमः ॥ वाराहायाप्रतर्क्याय वेदां
गाय महीभृते ॥३५॥ नमो द्युतिमते नित्यं ब्राह्मणाय नमो नमः ॥ वामनाय बहुज्ञाय वेदवेदांगधा
रिणे ॥३६॥ बलिबंधनदक्षाय वेदपालाय ते नमः ॥ विष्णवे सुरनाथाय व्यापिने परमात्मने ॥३
७॥ चतुर्भुजाय शुद्धाय शुद्धद्रव्याय ते नमः ॥ जामदग्न्याय रामाय दुष्टक्षत्रांतकारिणे ॥३८॥ रा
माय रावणांताय नमस्तुभ्यं महात्मने ॥ अस्मानुद्धर गोविंद पूतिगंधान्नमोऽस्तु ते ॥३९॥ व्यास उ
इति संकीर्तिते विष्णौ नारकैर्भक्तिपूर्वकं ॥ तदा ता नारकीं पीडां गता तेषां महात्मनां ॥४०॥ दिव्य
रूपधराः सर्वे दिव्यवस्त्रविभूषिताः ॥ दिव्यगंधानुलिप्तांगा दिव्याभरणभूषिताः ॥ ४१ ॥ तानारोप्य
विमानेषु दिव्येषु हरिपूरुषाः ॥ तर्जयित्वा यमभटान् नीतास्ते केशवालयं ॥४२॥ नारकेषु च
सर्वेषु तेनीतेषु हरिपूरुषैः ॥ विष्णुलोकं यमो भूयो नमश्चक्रे तदा हरिं ॥४३॥ यन्नामकीर्तनाद्धा
ता नरकाः केशवालयं ॥ तं नमामि सदा देवं नरसिंहं महागुरुं ॥४४॥ तस्यैव नरसिंहस्य विष्णोर

मिलतेजसः ॥ प्रणामं येपि कुर्वीति तेषामपि नमो नमः ॥ ४५ ॥ इति नरसिंहपुराणे यमगीता नामा
ष्टमोऽध्यायः ॥ ॥ श्रीव्यास उवाच ॥ अहममरगणार्चितेन धात्रा यम इति लोकहिताहिते न
युक्तः ॥ हरिगुरुविमुखान्प्रशास्मि मर्त्यान्हरिचरणप्रणतान्नमस्करोमि ॥ १ ॥ सुगतिमभिलषा
मि वासुदेवादहमपि भागवते स्थितांतरात्मा ॥ मधुवधवशगोस्मि न स्वतंत्रः प्रभवति संयमने म
मापि कृष्णः ॥ २ ॥ भगवति विमुखस्य नास्ति सिद्धिर्विषममृतं भवतीति नेदमस्ति ॥ वर्षशतमपीह प
च्यमानं व्रजति न कांचनतामयः कदाचित् ॥ ३ ॥ नहि शशिकलुषच्छविः कदाचित् विरमति नो र
वितामुपैति चंद्रः ॥ भगवति च हरावनन्यचेता भृशमलिनोपि विराजते मनुष्यः ॥ ४ ॥ सुरगुरुदृढ
प्रसादकन्नहि हरिचरणौ स्मरतापवर्गदाता हेतोः ॥ स्थूलमिदमुपलभ्य मानुषत्वं सुकृतशतेन वृथें
द्रियार्थहेतोः ॥ ५ ॥ रमयति कुरुते नमोऽस्य मार्गं स दहति चंदनमात्रमस्य हेतोः ॥ मुकुलितकरकु
ड्मलैः सुरेंद्रैः सततनमस्कृतपादपंकजाय ॥ ६ ॥ अविहतगतये सनातनाय जगति जनिनिवारके

नमोस्त्वजाय ॥ इति घोषयति यमपुरे सदुंदुभीन्भ्रमयति सदिक्षांसयुग्मताडितान् ॥ ७ ॥ यम
दूतश्रवबद्धचित्रगुणापाः यत्र कृत्वा जहति विष्णुभक्तान्सुहृदे स्वपुरुषमभिवीक्ष्य पाश
हस्तं वदति यमः किल तस्य एवतांगणानां ॥ ८ ॥ परिहर हरिहर प्रपन्नान् प्रभुरहमन्यनराणां न वैष्ण
वानां ॥ यमाष्टकमिदं पुण्यं पठते यः शृणोति वा मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ९ ॥ इतीद
मुक्तं यमवाक्यमुत्तमं मयाधुना ते हरिभक्तिवर्द्धनं ॥ पुनः प्रवक्ष्यामि पुरातनीं कथां भृगोस्तु पौत्रेण च
यापुराकृता ॥ १० ॥ इति श्रीनरसिंहपुराणे नवमोऽध्यायः ॥ ९ ॥ श्रीव्यास उवाच ॥ जित्वैवमात्मनो
मृत्युं तपसा शंसितव्रतः ॥ स जगाम पितुर्गेहं मार्कंडेयो महामतिः ॥ १ ॥ कृत्वा विवाहं धर्मेण गो
र्वाक्याद्विशेषतः ॥ सर्वैर्दृशिरसं पुत्रमुत्पाद्य च विधानतः ॥ २ ॥ दृष्ट्वा यज्ञैस्तु देवेशं नारायणमनाम
यं श्राद्धेन तु पितॄन् निष्ठाश्चान्नदानेन चातिथीन् ॥ ३ ॥ प्रयागमासाद्य पुनः स्नात्वा तीर्थे गरीयसि मा
र्कंडेयो महातेजास्तेपे च परमं तपः वटतले ॥ ४ ॥ यस्य प्रसादेन पुरा जितवान्मृत्युमात्मनः

तं देवं द्रष्टुमिच्छंस्तेपे परमं तपः ॥ ५ ॥ वायुभक्षश्चिरं कालं तपसा शोषयंस्तनुं ॥ एकदा तु
महातेजा मार्कंडेयो महामतिः ॥ ६ ॥ आराध्य माधवं देवं गंधपुष्पादिभिः शुभैः ॥ अग्रे मग्यम
ना स्थित्वा हृदये तमनुस्मरन् ॥ ७ ॥ शंखचक्रगदापाणिं तुष्टाव गुरुडध्वजं ॥ मार्कंडेय उवाच ॥ न
रं नृसिंहं नरनाथमच्युतं प्रलंबबाहुं कमलायतेक्षणं ॥ दिवीश्वरैरर्चितपादपंकजं नमामि वि
ष्णुं पुरुषं पुरातनं ॥ ८ ॥ जगत्पतिं क्षीरसमुद्रमंदिरं तं शार्ङ्गपाणिं मुनिवृंदवंदितं ॥ श्रियः पतिं
श्रीधरमीशमीश्वरं नमामि गोविंदमनंतवर्चसं ॥ ९ ॥ अजं वरेण्यं जनदुःखनाशनं गुरुं पुराणं
पुरुषोत्तमं प्रभुं ॥ सहस्रसूर्यद्युतिमंतमच्युतं नमामि भक्त्या हरिमाद्यमाधवं ॥ १० ॥ पुरस्कृतं पुण्य
वतां परां गतिं क्षितीश्वरं लोकपतिं प्रजापतिं ॥ परं पराणामपि कारणं हरिं नमामि लोकत्रयक
र्मसाक्षिणं ॥ ११ ॥ भोगे त्वनंतस्य पयोदधौ सुरः पुरा हि शेते जगतां वनानादिकृत् ॥ क्षीरोदवीचीक
णिकांबुनोक्षितं तं श्रीनिवासं प्रणतोस्मि केशवं ॥ १२ ॥ अनंतमव्यक्तमतींद्रियं विभुं स्वे स्वे

रूपे स्वयमेव संस्थितं योगीश्वरैरेव सदा नमस्कृतं नमामि भक्त्या सततं जनार्दनं ॥ १३ ॥ आ
नंदमेकं विरजं चिदात्मकं वृंदालयं योगिभिरेव पूजितं ॥ अणोरणीयांसमवृद्धिमक्षयं नमामि भ
क्तप्रियमीश्वरं हरिं ॥ १४ ॥ व्यास उ० ॥ इति स्तोत्रावसाने तं वायुर्वाचाशरीरिणा ॥ मार्कंडेयं महाभाग
नीयत्र तपसि स्थितं ॥ १५ ॥ किमर्थं क्लिश्यते ब्रह्मन् त्वया येव न दृश्यते ॥ माधवः सर्वतीर्थेषु याव
न्न स्नानमाचरेत् ॥ १६ ॥ इत्युक्तः प्रत्युवाचेदं तया वाचा महामतिः ॥ यत्कृत्वा सर्वतीर्थेषु स्नानं
चैव कृतं भवेत् ॥ १७ ॥ तद्वद त्वं मम प्रीतात्मा योसि सोसि नमोस्तु ते ॥ वायुरुवाच ॥ स्तोत्रेणानेन
विप्रेंद्र स्तुहि नारायणं प्रभुं ॥ १८ ॥ नान्यथा सर्वतीर्थानां फलं प्राप्स्यसि सुव्रत ॥ मार्कंडेय उवाच ॥
तद्देवाख्याहि भगवन् स्तोत्रं तीर्थफलप्रदं ॥ १९ ॥ येन जप्तेन सकलं तीर्थस्नानफलं लभेत् ॥ वा
युरुवा० ॥ जय जय देवदेव जय माधव केशव जय दामोदराच्युत जय सर्वेश्वरानंत जय लोकगुरो
जय जय शंखगदापाणे जय भूधर सूकर ॥ जय यज्ञेश वाराह जय भूधर भूधर भूमिप जय यो

न॰पु॰ २१

गीशयोगजययोगप्रवर्त्तक ॥ जयजययोगप्रवर्त्तक जयजयधर्म्मप्रवर्त्तक ॥ कृतप्रियजययज्ञेश
यज्ञांगज्ञांगजयवंदितद्विज जयजयनारदसिद्धिदं ॥ जयपुण्यवतांगते ॥ जयवैदिकसंपूज्यजय
वैदिकभाजन जयचतुर्भुज श्रीजयदेवजयदैत्यभयावह ॥ जयसर्वज्ञसर्वात्मन् जयशंकरशा
श्वतः जयविष्णोमहादेवजयनित्यमधोक्षज प्रसादं कुरु देवेश दर्शयाद्य स्वकां तनुं ॥ व्यासउवाच
इत्येवं कीर्तितस्तेन मार्कंडेयेन धीमता ॥ प्रादुर्बभूव भगवान्पीतवासा जनार्दनः ॥ २० ॥ शंख
चक्रगदापाणिः सर्वाभरणभूषितः ॥ तेजसा द्योतयन्सर्वा दिशो विष्णुः सनातनः ॥ २१ ॥ तं दृ
ष्ट्वा सहसा भूमौ चिरप्रार्थितदर्शिनं ॥ प्रयातः शिरसावस्मिन्तस्मात्सन्मृगुनंदनः ॥ २२ ॥ निपत्यो
त्थितश्च पुनः स्वांगं भक्त्या महात्मनः ॥ प्रबद्धसंपुटकरो गोविंदं पुनरस्तुवत् ॥ २३ ॥ मार्कंडेयउवाच
नमोस्तु तो देवदेव महाविघ्न महाकाय महाप्राज्ञ महादेव महाकीर्त्ते ब्रह्मेन्द्र चंद्ररुद्रार्चितपाद
युगल श्रीपद्महस्त संमर्दितदैत्यदेह ॥ अनंतभोगशय्यार्पित सनक सनत्कुमार नारदाद्यै

राम॰ २१

योगिभिः नाशाग्रन्यस्तलोचनैरनवरतमभिचिंतितमोक्षमोक्षतत्त्व गंधर्वविद्याधरयक्षकिंनर
किंपुरुषैरहरहोगीयमानदिव्ययशः ॥ नरसिंह नारायण पद्मनाभ गोविंद ॥ गोवर्द्धनगुहानि
वास योगीश्वर देवेश्वर जलेश्वर महेश्वर ॥ योगधर महामायाधर विद्याधर यशोधर कीर्तिधर श्री
धर त्रिगुणनिवास त्रितत्त्वधर ॥ त्रेताग्निधर ॥ त्रिनाचिकेत त्रिसुपर्ण त्रिदंडधर ॥ स्निग्धमेघाभार्चि
तद्युतिविराजित ॥ पीतांबरधर ॥ किरीटकटककेयूरहारमणिरत्नांशुदीप्तिविद्योतितसर्वदिशा
कनकमणिकुंडलमंडितगंडस्थल मधुसूदन विश्वमूर्ते लोकनाथ यज्ञेश्वर यज्ञप्रिय तेजोम
यभक्तिप्रिय ॥ वासुदेव मम दुरितापहाराद्य पुरुषोत्तम नमोस्तु ते ॥ व्यासउवाच ॥ इत्युदीरितमाकर्ण्य
भगवांल्लोकजनार्दनः ॥ देवदेवः प्रसन्नात्मा मार्कंडेयमुवाच ह ॥ २४ ॥ श्रीभगवानुवाच ॥ तुष्टोस्मि
वतो वत्स तपसा महता मुने ॥ स्तोत्रेणापि महाबुद्धे निष्पापोसि सांप्रतं ॥ २५ ॥ वरं वरय विप्रेंद्र वरदो
हं तवाद्यतः ॥ नातप्ततपसा ब्रह्मन् द्रष्टुं साध्योहमंजसा ॥ २६ ॥ मार्कंडेयउवाच ॥ कृतकृत्योस्मि देवे

न॰पु॰
२२

शासां प्रवर्तनं तव दर्शनात् त्वद्भक्तिमचलां मे कामं मम देहि जगत्पते २७ यदि प्रसन्नो भगवान् मम माधव
आयतिं चिरंपरायुष्य हृषीकेश वै येन त्वां विरमर्चये २८ श्रीभगवानुवाच मत्युक्ते निर्जितः पूर्वं
चिरायुष्ट्वं ततो भवेत् भक्तिरस्तु च जाले मे वैष्णवी मुक्तिदायिनी २९ इदं तीर्थं महाभाग त्वन्नाम्ना
ख्यातिमेष्यति पुनस्त्वं द्रक्ष्यसे मां वै क्षीराब्धौ योगशायिनं ३० व्यास उवाच इत्युक्त्वा पुंडरीकाक्षस्त
त्रैवांतरधीयत मार्कंडेयोपि धर्म्मात्मा चिंतयन्मधुसूदनं ३१ अर्च्चयन्देवदेवेशं जपन्नूर्द्ध
नमन्नपि वेदशास्त्राणि पुण्यानि पुराणान्यखिलानि च मुनीनां श्रावयामास गाथाश्चैव तपोध
न इतिहासानि पुण्यानि पितृतत्वं च सत्तम ३३ ततः कदाचित्पुरुषोत्तमोक्तं वचः स्मरन् शास्त्र
विशारदां वरिष्ठः भ्रमन्समुद्रं स जगाम द्रष्टुं हरिं सुरेशं मुनिरुग्रतेजाः श्रमेण युक्तं स्थिरकालसंच
मात्मभागी स्तुवन्नो हरिं भक्तिमुद्वहन् क्षीरोदमासाद्य हरिं सुरेशं नागेंद्रभोगे कृतनिद्रमेकं ३४
इति श्री नरसिंहपुराणे मार्कंडेयचरित्रे दशमोध्यायः १० प्रणिपत्य जगन्नाथं चराचरगुरुं

राम॰
२२

हरिं मार्कंडेयोपतुष्टाव भोगपर्यंकशायिनं १ मार्कंडेय उवाच प्रसीद भगवन्विष्णो प्रसीद पुरु
षोत्तम प्रसीद देवदेवेश प्रसीद गरुडध्वज २ प्रसीद विष्णो लक्ष्मीश प्रसीद धरणीधर प्रसी
द लोकनाथाद्य प्रसीद परमेश्वर ३ प्रसीद सर्वदेवेश प्रसीद कमलेक्षण प्रसीद मंदरधर प्रसी
द मम केशव ४ जय कृष्ण जयाचिंत्य जय विष्णो जयाव्यय जय विश्व जयाव्यक्त जय विष्णो नमो
स्तु ते ५ जय देव जयाजेय जय सत्य जयाक्षर जय काल जयेशान जय सर्व नमोस्तु ते ६ जय सर्व
द सर्वेश जय शर्म्मद शाश्वत जय कामद भक्तानां प्रभविष्णो नमोस्तु ते ७ नमः कमलनाभाय
नमः कमलमालिने लोकनाथ नमस्तेस्तु वीरभद्र नमोस्तु ते ८ नमस्त्रैलोक्यनाथाय चतुर्मूर्त्ते जग
त्पते नमो देवाय नमो नारायणाय ते ९ नमस्ते वासुदेवाय नमस्ते पीतवाससे नमस्ते नरसिं
हाय नमस्ते शार्ङ्गधारिणे २० नमः कृष्णाय रामाय नमश्चक्रायुधाय च नमः शिवाय देवाय नमस्ते भु
वनेश्वर २१ नमो वेदांतवेद्याय नमोनंताय विष्णवे नमस्ते सकलाध्यक्ष नमस्ते श्रीधराच्युत २२

लोकाध्यक्ष जगन्नाथ परमात्मन्नमोस्तुते ॥ त्वं माता सर्वलोकानां त्वमेव जगतः पिता ॥ २३ ॥ त्वमा
र्त्तानां सुहृन्मित्रं प्रियस्त्वं पितामहः ॥ नमस्ते पुंडरीकाक्ष पुराणपुरुषोत्तमः ॥ २४ ॥ अंजनाभ हृ
षीकेश मायामय नमोस्तुते ॥ मामुद्धर महाबाहो मग्नं तं जन्मसागरे ॥ २५ ॥ नारायण कृपण
दीपनं पतितं भवसागरे ॥ मां समुद्धर गोविंद वरदेश नमोस्तुते ॥ २६ ॥ नमस्ते लोकनाथा
य हरये च धराय च ॥ देवदेव नमस्तेस्तु श्रीवत्सांक नमोस्तुते ॥ २७ ॥ कृस्त्वं कृस्त्वं कृपालस्त्वं म
गतीनां गतिर्जीवानां संसारार्णवमग्नानां प्रसीद मधुसूदन ॥ २८ ॥ त्वमेकमाद्यं पुरुषं पुराण
जगत्पतिं कारणमच्युतं प्रभुं ॥ जनार्दनं जन्मजरार्तिनाशनं सुरेश्वरं सुंदरमिंदिरावरं ॥ २९ ॥
बृहद्भुजं श्यामलकोमलं शुभं वराननं वारिजपत्रनेत्रं तरंगभंगायतकुंतलं हरिं सुकांतमी
शं प्रणतोस्मि शाश्वतं ॥ ३० ॥ सा जिह्वा या हरिं स्तौति तच्चित्तं यत्त्वदर्पितं ॥ तावेव केवलौ श्ला
घ्यौ यौ त्वत्पूजाकरौ करौ ॥ ३१ ॥ जन्मांतरसहस्रेषु यन्मया पातकं कृतं ॥ तन्मे हर त्वं गोवि

द वासुदेवेति कीर्त्तनात् ॥ ३२ ॥ व्यास उवाच ॥ इति स्तुतस्ततो विष्णुर्मार्कंडेयेन धीमता ॥ उ
वाच प्रहृष्टो विश्वात्मा तं मुनिं गरुडध्वजः ॥ ३३ ॥ श्रीभगवानुवाच ॥ प्रीतोस्मि तपसा विप्र स्तुत्या च त्व
गुनंदन ॥ वरं वृणीष्व भद्रं ते प्रार्थितं ह्यस्ति ते वरं ॥ मार्कंडेय उवाच ॥ त्वत्पादपद्मे देवेश भक्तिं मे
देहि सर्वदा ॥ यदि तुष्टोसि मां पाप मन्यादेकं वृणोम्यहं ॥ ३५ ॥ स्तोत्रेणानेन देवेश यस्त्वां स्तोष्य
ति नित्यशः ॥ स्वर्लोके वसतिस्तस्य देहि देव जगत्पते ॥ ३६ ॥ दीर्घायुस्त्वं च यद्भक्त्या मे तपतः
पुरा ॥ तत्सर्वं सफलं जातं इंद्रादीनां तव दर्शनात् ॥ ३७ ॥ वस्तुमिच्छामि देवेश तव पादांबुजमच्यु
त ॥ अत्रैव भगवन्नित्यं जन्ममृत्युविवर्जितः ॥ ३८ ॥ श्रीभगवानुवाच ॥ मय्यस्तु ते मुनिश्रेष्ठ
भक्तिरव्यभिचारिणी मत्प्रसादान्मुनिर्जीवत्वं वत्स कालेन सत्तम ॥ यस्त्विदं पठते स्तोत्रं सायं प्रात
स्तवेरितं ॥ मयि भक्तिं दृढां कृत्वा मम लोके समोदते ॥ ४० ॥ यत्र यत्र मुनिश्रेष्ठ स्थितस्त्वं मां स्मरि
ष्यसि ॥ तत्र तत्र समेष्यामि प्रियलोकक्षयं वशोस्मि ते ॥ ४१ ॥ व्यास उवाच ॥ इत्युक्त्वा तं मुनिश्रेष्ठं मार्कं

ड्येयं समाधवः ॥ विरराम स सर्वत्र यत्र पतितस्तु यतस्ततः ॥ ४२ ॥ इति ते कथितं विप्र चरितं तस्य धीम
तः ॥ मार्कंडेयस्य च मुनेर्यत्ते नैवोक्तं पुरा मम ॥ ४३ ॥ ये विष्णुभक्ताश्चरितं पुराणं भृगोस्तु पुत्रस्य
पठंति मर्त्याः ॥ ते मुक्तपापा नरसिंहलोके वसंत्यनंतेर त्रिपूज्यमानाः ॥ ४४ ॥ इति श्रीनर
सिंहपुराणे मार्कंडेयचरित्रं नाम द्वादशोऽध्यायः ॥ छ ॥ ॥ सूत उवाच ॥ श्रुत्वेमाममृतां
तां पुण्यां सर्वपापप्रणाशनीं ॥ अवितृप्तः स धर्मात्मा शुको व्यासमभाषत ॥ १ ॥ शुक उवाच
अहोतीव तपश्चर्या मार्कंडेयस्य धीमतः ॥ येन दृष्टो हरिः साक्षात् येन मृत्युः पराजितः ॥ २ ॥ न
तृप्तिरस्ति मे तात श्रुत्वेमां पावनीं कथां पुण्यां पापहरां तात तस्मादन्यन्नु मे वद ॥ ३ ॥ नराणामिह दृढ
चित्तानां च कार्यं नेह कुर्वतां ॥ यत्पुण्यं मुनिभिः प्रोक्तं तन्मे वद महामते ॥ व्यास उवाच
नराणां दृढचित्तानां इह लोके परत्र च ॥ पुण्यं यत्स्यान्मुनिश्रेष्ठ तन्मे निगदतः शृणु ॥ ५ ॥ अ
त्रैवोदाहरंतीममितिहासं पुरातनं ॥ स्वस्रा सह संवादं यमस्य च महात्मनः ॥ ६ ॥ विवस्वा

न्दितेः पुत्रः तस्य पुत्रौ सुवर्चसौ ॥ जज्ञाते स यम श्रेष्ठ यमी चापि यवीयसी ॥ ७ ॥ तौ तत्र
संविवर्द्धते पितुर्भवन उत्तमे ॥ क्रीडमानौ स्वभावेन स्वच्छंदगमनावुभौ ॥ ८ ॥ यमीय
मं समासाद्य स्वसा भ्रातरमब्रवीत् ॥ यम्युवाच ॥ न भ्राता भगिनीं योऽपि कामयंतीं न का
मयेत् ॥ ९ ॥ भ्रातृत्वेन किं तस्य स्वसुर्यो न पतिर्भवेत् ॥ अन्नंतईव स सज्जेयो न तनूतः
कथंचन ॥ १० ॥ अनाथां नाथमिच्छंतीं स्वसारं यो न नाथति ॥ कांक्षंतीं भ्रातरं नाथं भर्त्तारं
यस्तु नेच्छति ॥ ११ ॥ भ्रातेति नोच्यते लोके स पुमान् मुनिसत्तम ॥ यत्कार्यमहमिच्छामि त्वमे
व कुरु तद्देव हि ॥ १२ ॥ अनाथाहं मरिष्यामि त्वामिच्छंती विचेतना ॥ कामदुःखमसह्यं तु भ्रात
ः किं त्वं न चेच्छसि ॥ १३ ॥ कामाग्निनाभिसंतप्ता तव पार्श्वं गमा चिरं ॥ कामार्त्तायाः स्त्रियः कांत
वशगो भव मा चिरं ॥ १४ ॥ स्वेन कायेन मे कायं संयोजयितुमर्हसि ॥ यम उवाच ॥ किमिदं लो
कविद्विष्टं धर्मं भगिनि भाषसे ॥ १५ ॥ अकार्यमिह कः कुर्यात्पुमान्भद्रे सचेतनः ॥ न

तेसंयोजयिष्यामिकायंकायेननामिनि ॥ १६ ॥ नत्वातामदनार्त्तायाः स्वसुःकामंवचयदति ॥ म
हापातकमित्याहुःस्वसारंयोधिगच्छति ॥ १७ ॥ पशूनामेषधर्म्मःस्यात्तिर्यग्योनिवतांशुभे
॥ यमीउ ॥ एकस्थानेयथापूर्वंसंयोगोनोनदुष्यति ॥ १८ ॥ मातृगर्भेतथैवायंसंयोगोनोन
दुष्यति ॥ किंभ्रातरघनापत्यंममनेच्छसिशोभनं ॥ १९ ॥ ननुस्वसारंनिरृतिर्हिगच्छति
नित्यशः ॥ यमउवाच ॥ स्वयंभुवाप्यनिंद्येनलोकवृत्तमनिंदितं ॥ २० ॥ प्रधानपुरुषाचीर्णं
लोकोयमनुवर्त्तते ॥ तस्मादनिंदितंधर्म्मंप्रधानपुरुषश्चरेत् ॥ २१ ॥ निंदितंवर्जयेद्धन्ना
त्एतद्धर्मस्यलक्षणं ॥ यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः ॥ २२ ॥ सप्रमाणंकुरुतेलोक
स्तदनुवर्त्तते ॥ अतिपापतमंह्येतन्मन्येसुभगेवचनंतव ॥ २३ ॥ विरुद्धंसर्वधर्म्मेषुलोकेषु
चविशेषतः ॥ मत्तोन्योयोग्यवरेविशिष्टरूपशीलतः ॥ २४ ॥ तेनसार्द्धंप्रमोदस्वनतेभ
र्त्ताभवाम्यहं ॥ नाहंस्पृशामितत्वांतेनतुंमदृढव्रतः ॥ २५ ॥ मुनयःपापमाहुःस्वयं

स्वसारंनिगृह्णति ॥ यमीउ ॥ दुर्लभंनचपश्यामिलोकेरूपमिहेदृशं ॥ यत्तेरूपंवयश्चैवदृश्यापि
व्यांकप्रतिष्ठितं ॥ २६ ॥ नविजानामितेचित्तंकुतंएतत्प्रतिष्ठितं ॥ आत्मरूपगुणेयेतांन
कामयसिमोहितां ॥ २७ ॥ यमउ ॥ अन्यंआश्रयस्वसुश्रोणिदेवंदेव्यसितेक्षणे ॥ चित्तंमेनिर्म
लंभद्रेविष्णोरुद्रेचसंस्थितं ॥ २८ ॥ अतःपापंतुमैनेच्छामिधर्म्मचित्तोदृढव्रतः ॥ २९ ॥ व्यास
उवाच ॥ असकृत्प्रोच्यमानोपितयावैवंदृढव्रतः ॥ कृतवान्नयमोकार्यंतेनदेवत्वमाप्तवा
न् ॥ ३० ॥ नराणांमेवचित्तानामेवंपापमकुर्वतां ॥ अनंतंफलमित्याहुस्तेषांस्वर्गफलंभवे
त् ॥ ३१ ॥ एतत्तुयाम्युपाख्यानंपूर्ववृत्तंसनातनं ॥ सर्वपापहरंपुण्यंश्रोतव्यंमनुजैर्यथा
॥ ३२ ॥ यश्चैतत्पठतेनित्यंहव्यकव्येषुब्राह्मणः ॥ संतृप्ताःपितरस्तस्यनविशंतियमालयं ॥ ३
३ ॥ यश्चैतत्पठतेनित्यंपितृणामनृणोभवेत् ॥ वैवस्वतीभ्यस्तीव्राभ्योयातनाभ्यःप्रमुच्यते
॥ ३४ ॥ पुत्रैतद्धाख्यानमतुलंमंमयात्तवोदितंवेदपदार्थनिश्चितं ॥ पुरातनंपापहरंसदान्न

णं किमन्यद्ध्येववद्दामि शंस मे ॥ ३५ ॥ इति श्रीनरसिंहपुराणे यमीयमसंवादो नाम त्रयो
दशोध्यायः ॥ श्रीशुक उवाच ॥ वि‑ चित्रेयं कथा तात वैदिकी मे त्वयेरिता ॥ अन्यां पुण्य
तमां ब्रूहि कथां पापप्रणाशनीं ॥ १ ॥ व्यास उवाच ॥ हंत ते कथयिष्यामि पुरावृत्तमनुत्तमं ॥ पति
व्रतायाः संवादं कस्यचित् ब्रह्मचारिणः ॥ २ ॥ कश्यपो नीतिमान्नाम ब्राह्मणो वेदपारगः ॥
सर्वशास्त्रार्थतत्त्वज्ञो व्याख्याने परिनिष्ठितः ॥ ३ ॥ स्वधर्मकार्यनिरतः परधर्मपराङ्मुखः ॥
ऋतुकालाभिगामी च स्वग्निहोत्रपरायणः ॥ ४ ॥ सायंप्रातर्महाभाग हुत्वाग्निं तर्पयेद्द्विजा
न् ॥ अतिथीनागतान् गेहे नरसिंहं च पूजयन् ॥ ५ ॥ तस्य पत्नी महाभागा सावित्री नाम ना
मतः ॥ पतिव्रता महाभागा पत्युः प्रियहिते रता ॥ ६ ॥ भर्तुः शुश्रूषणेनैव दीर्घकालमनिं
दिता ॥ नंदिग्रामे वसन् धीमान् स्वानुष्ठानपरायण ॥ ८ ॥ परोक्ता नमापन्नाकं व्या
णी गुणसम्मता ॥ ७ ॥ तया सह स धर्मात्मा मध्यदेशे महामतिः ॥ ८ ॥ अथ कौशलिको

विप्रो यज्ञशर्म्मा महामतिः ॥ तस्य भार्या च वसाध्वी रोहिणी नाम नामतः ॥ ९ ॥ सर्वलक्षणसं
पन्ना पतिशुश्रूषणे रता ॥ सा च सूता सुतं त्वेकं तस्माद्यज्ञशर्म्मणः भर्तुरनिंदिता ॥ तथा पाशि
लोक वरदस्तिस्तु तो जीतविचक्षणः ॥ १० ॥ जातकर्म्म तदा चक्रे तस्यात्ता पुत्रस्य मंत्रतः ॥ द्वाद
शेहनि तस्यैव देवशर्मेति बुद्धिमान् ॥ पुण्याहं वाचयित्वा तु नाम चक्रे यथाविधि ॥ उपनिः क्रमणं
चैव चतुर्थे मासि यत्नतः ॥ तथान्नप्राशनं षष्ठे मासि चक्रे तथा विधि ॥ १३ ॥ संवत्सरे ततः पूर्णे चूडा
कर्म्म च मंत्रवित् ॥ कृत्वा गर्भाष्टमे वर्षे व्रतबंधं चकार सः ॥ १४ ॥ सोपनीतो यथान्यायं पित्रा वेदम
धीतवान् ॥ स्वीकृते धावी साधुभिः प्रेरितः पुनः ॥ प्रेतकार्याणि कृत्वा तु देवशर्म्मा गतः सुतः ॥ गंगा
दि पुण्यतीर्थेषु स्नानं कृत्वा यथाविधि ॥ १७ ॥ तमेव प्राप्तवान् ग्रामं यत्रास्ते सा पतिव्रता ॥ संप्राप्य वि
श्रुतः सोपि ब्रह्मचारी महामते ॥ १८ ॥ भिक्षाटनं तु कृत्वा सो जपत्वेदमतंद्रितः ॥ कुर्वन्नेवाग्नि
कार्यं तु नंदिग्रामे वसत् द्विवान् ॥ १९ ॥ मृते तस्मिन्नरि तन्माता पुत्रे च व्रजिते तु सा ॥ दुःखा दुःखम

न॰पु॰
२७

वृथा ध्यानं निरर्थकं विना ॥ २० ॥ अपस्नात्वा तु नद्यां च ब्रह्मचारी स्वकर्पटं ॥ द्रितीवसार्यशोषार्थं
जपन्नासीत वाग्यतः ॥ २१ ॥ काकी बकाका तद्दृक्षे परिगृह्य पक्कर्म्मतु: ॥ तौ दृष्ट्वात्कर्षयामास देवं
शर्म्मा तु तौ द्विजः ॥ २२ ॥ विष्ठामुत्सृज्य वस्त्रे तु जग्मतुः तस्य तत्कर्मनात् ॥ रोषेण वीक्षयामास स्वेच्छया तो
पक्षिणौ तु सः ॥ २२ ॥ तद्रोषवह्निनादग्धौ भस्मानि पतितौ खगौ ॥ सदृष्ट्वा तौ पक्षिणौ विस्मयं ग
तः ॥ २३ ॥ तपसा नमया कश्चित्सदृशोस्ति मही तले ॥ इति मत्वा गतो भिक्षामटितुं ग्राममंजसा
॥ २४ ॥ अटन्ब्राह्मणगेहेषु ब्रह्मचारी तपःस्थिया ॥ प्रविष्टस्तत्र ऽहं वसगहे यत्र पतिव्रता सावित्री
ता ॥ २५ ॥ तं दृष्ट्वा याचमाना पितेन निक्षांपतिव्रता ॥ वाग्यता पूर्वविज्ञाय भर्तुर्नत्वानुशासनं
॥ २६ ॥ ततः क्रोधेन रक्ताक्षो ब्रह्मचारी पतिव्रतां ॥ सावित्री तु निरीक्ष्येनं हसती सा तमब्रवीत् राम॰ २७
॥ २७ ॥ नाशयामास तत्सा हि त्वयपक्षिनवारिणा ॥ आश्वास्य स्वपतिं सा तु भिक्षां दातुं प
चक्रमे ॥ २७ ॥ न काको न बका कोहं त्वक्रोधेन तु यौ वे मतौ ॥ नदीतीरे तु कोपात्मन

नरभिक्षां प्रदृष्टुमसि ॥ २९ ॥ तयैवमुक्तः सावित्र्या भिक्षामादाय सोऽगतः ॥ चिंतयन्मनसा तस्या
शक्तिं इरार्थं देदिना ॥ ३० ॥ यत्नाश्रमे महे स्थाप्य जिभिक्षापात्रं प्रयत्नतः ॥ पतिव्रतामुक्तां तु प्र
हस्ते निर्गते पतौ ॥ ३१ ॥ पुनरागम्य तत्रेऽहं तामुवाच पतिव्रतां ॥ ब्रह्मचारी ॥ ब्रूहि तन्महामा
गेप्ठ्तोमे यथार्थतः ॥ ३२ ॥ विप्रकृष्टार्थविज्ञानं कथमाप्तं नवान्नवत् ॥ इत्युक्ता तेन सा साध्वी
सावित्री तु पतिव्रता ॥ ३३ ॥ तं ब्रह्मचारिणं प्राह इच्छंतं गृहमेत्य वै ॥ श्रृणु प्रावदितो ब्रह्मन्यन्मा
त्वं परिपृच्छसि ॥ ३४ ॥ तत्रेहं संप्रवक्ष्यामि स्वधर्म्मपरिरक्षितं ॥ स्त्रीणांतु पतिशुश्रूषा धर्म्म एष प
रिस्थितः ॥ ३५ ॥ तमेवाहं सदा कुर्यां नान्यमस्मि महामते ॥ दिवारात्रमसंदिग्धं शुश्रूषया परितोष
णं ॥ ३६ ॥ कुर्वत्या मम संजातं विप्रकृष्टार्थदर्शनं ॥ अन्यच्चते प्रवक्ष्यामि निबोध त्वं यदि छसि
॥ ३७ ॥ पिता या यावरः शुद्धः तस्यादेद मधीत्य वै ॥ मृते पितरि कृत्वा तु प्रेतकार्यमिहागतः ॥ ३
८ ॥ उत्सृज्य मातरं वृद्धां स्नानां तपस्विनी ॥ अनाथां विधवां मत्र नित्यं स्वोदरपोषकः ॥ ३९

न॰पु॰ २८

यथा गर्भे धृतः पूर्वं परिपालितो लालितः स्तथा ॥ तां त्यक्त्वा विपिने धर्मं चरन् विप्र न लज्जसे ॥ य
या तव कृतं ब्रह्मन् न बालेमजनिम्नंतनः ॥ दुःखितां तां गृहे त्यक्त्वा किं न वेत्सि पिनेटतः ॥ ४१ ॥ मा
तृदुःखेन नते वक्त्रं पूतिगंधमिदं भवत् ॥ पित्रैव संस्कृतो यस्मात् तस्मात्क्लिन्नंहृदियं ॥ ४२ ॥ पश्चा
दग्धः सुदुर्बुद्धे पापात्मन् संप्रतं त्वया ॥ तृष्णा स्नानं तृष्णा तीर्थं तृष्णा हुतं ॥ ४३ ॥ सती जीवति दु

दत्तकथा

पा ब्रह्मन् यस्य माता सुदुःखिता ॥ योऽर्हे सततं भक्त्या मातरं मातृवत्सलः ॥ ४४ ॥ तस्येह
तुष्टिं तं सर्वफलं समभुत्र चेह च ॥ मातुश्च वचनं ब्रह्मन् पालितं येन नरोत्तमैः ॥ ४५ ॥ ते मान्या
ते नमस्कार्या इह लोके परत्र च ॥ अतस्त्वं तत्र गत्वाद्य यत्र माता च वर्तिता ॥ ४६ ॥ तां त्वं स

राम॰ २८

यतावतीत ऽस्मात परंतप ॥ क्रोधं परित्यजेनं त्वं दृष्टादृष्टविघातकं ॥ ४७ ॥ तपो कुरु वधे
शुद्धि पद्धि लोरात्मशुद्धये ॥ यथ्यातथ्येन कथितमेतत्सर्वं मया तव ॥ ४८ ॥ ब्रह्मचारिन् कु
रुष्व त्वं यदीच्छसि सतां गतिं ॥ इत्युक्त्वा विरराम पक्षि द्विजपुत्रं पतिव्रता ॥ ४९ ॥ सा पिता

महत्त्वयोऽपि सावित्री तु ह्रासमापयन् ॥ अज्ञानात्कृतपापस्य क्षमस्व त्वं वरवर्णिनि ॥ ५० ॥ म
या तवाहितं यत्कृतं क्रोधनिरीक्षणं ॥ तत्क्षमस्व महाभागे हितमुक्तं पतिव्रते ॥ ५१ ॥ त्वत्र
गत्वा मया यानि कर्माणि तु शुभव्रते ॥ कार्याणि तानि मे ब्रूहि यथा मे सुगतिर्भवेत् ॥ ५२
ते नैवमुक्ता सा प्राह तं धृष्टं पतिव्रता ॥ यानि कार्याणि वक्ष्यामि त्वया कर्माणि मे शृणु ॥
॥ ५३ ॥ शुश्रूषा मातापित्रोर्यातत्र निश्चयमेहहन्निना ॥ अत्र वा तत्र वा वसन् भार्याग्निं च पद्धिणोः य
ज्ञशर्म्मसुता कन्या भार्या ते भविष्यति ॥ तां गृहीत्वा च धर्मेण गते त्वयि सदास्पति ॥ पुत्रस्तेन भविता
तस्यामेकः संततिवर्द्धनः ॥ यायावरवनाढ्यत्तिः पितृवन्ने भविष्यति ॥ ५६ ॥ पुनर्मृतायां भार्यायां
भविता त्वं त्रिदंडकाः ॥ नरसिंहप्रसादेन वैष्णवं पदमाप्स्यसि ॥ ५७ ॥ मोक्षमेतत्तु कथितं मया
तव हि सद्धितः ॥ मन्यसे नान्यतं त्वेतत् कुरु सर्वद्रिमेवचः ॥ ५८ ॥ ब्राह्मण उवाच ॥ गच्छामि मातृ
रस्या भर्त्रे घे वाक्षि पतिव्रते ॥ करिष्ये त्वद्वचः सर्वं तत्र गत्वा शुभेक्षणे ॥ ५९ ॥ इत्युक्त्वा गतवा

नवृत्तन्देवशर्म्मा ततस्त्वरन्॥ संरक्षमतिरंयत्नात् क्रोधमोहविवर्जितः ६०॥ कृत्वा विवाहमुत्पा
द्य पुत्रं वंशकरं शुभं॥ पत्न्यार्य्यश्च संन्यस्य समलोष्टाश्मकांचनः॥६१॥ नरसिंहप्रसादेन परां सिद्धि
मवाप्तवान्॥ पतिव्रताशक्तिरियं तवेरिता धर्म्मश्च मातुः परिरक्षणं परं॥६२॥ संसारवृक्षं च निहत्य
बंधनं छित्वा च विष्णोः पदमेति मानवः॥६३॥ ॥इति श्रीनरसिंहपुराणे ब्रह्मचारिसंवादो नाम
चतुर्द्दशोध्यायः॥१४॥ ॥श्रीव्यास उवाच॥ शृणु वत्स महाबुद्धे शिष्याश्चेतां परां कथा॥ मयोच्यमा
नां शृणुध्वं तु सर्वपापप्रणाशनी॥१॥ पुरा द्विजवरः कश्चित् वेदशास्त्रविशारदः॥ पत्न्या यो
गतस्तीर्थपुण्यस्नातु यथाविधि॥२॥ तपः सुतप्तं वै जनेनिःस्पृहो दारकर्म्मणि॥ निराहार
प्रवसितो जपस्थानपरायणः॥३॥ स्नात्वा स गंगां यमुनां सरस्वतीं पुण्यां वितस्तां मृप गोमतीं
च॥ गयां सदा मासाद्य पितॄन् पितामहान् संतर्पयन् सगतवान् महेंद्रं॥ तत्रापि कुंडे प्रभुगिरो म
हामतिः स्नात्वा उदक्षान् रघुनंदनं तं॥४॥ कृत्वा पितॄन्प्रस्तुतपै वन्नत्रिं व्रजन्नचनपापेहरं प्रवि

ष्टः॥ धारां पतंतीं महतीं शिलोच्चयात् संवार्यमाणां ल्वनुनारसिंहे॥५॥ शिरस्यशेषाघविनाशनी
तदा विशुद्धदेहः स बभूव विप्रः वंध्याच जैसकृमर्नतमच्युतं तमर्चे॥ मुनींद्रैरसिपिपूजितं सदा॥६॥
स्नाराध्य पुण्ये गिरिसंज्ञविवैः शुभैः॥ तत्रैव सिद्धिं लघिकां समंस्थितः॥ सनारसिंहो बहुकालपूज
यातुष्टः सुनिश्चागत माहतत्क्षं॥७॥ स्ननाश्रमित्वं गृहस्थंगकारणं स्नतो गृहाणाश्रममुत्तमं द्विज॥ स्व
नाश्रमीति द्विजवेदपारगैरपित्वहं नानुगृह्णामि चा॥ तथापि निशांतव वीसत्तम॥ त्वयि प्रस
न्ने नमयेत्युदीरितं॥ तेनैव मुक्तः परमेश्वरेण द्विजोपि बुध्या प्रविचिंत्य वाक्यं॥९॥ हरेरलंध्यं नर
सिंहमूर्तेः विधिं च कृत्वा प्रपतिर्बभूव॥ त्रिदंड्रकृष्णपवित्रपाणिनाऽमुत्पत्तीर्थं त्वग्रहारिणि स्थि
तः॥१०॥ जपन्सदा मंत्रमयास्तदोषं सावित्रीमीशं हृदये स्मरन्हरिं॥ यथा कथंचित् प्रतिक्रम
णकंपैः स्नानिनुष्ठेवनवासवासी॥११॥ स्नम्नर्चविविक्तं नरसिंहमुत्तिं ध्यात्वा च नित्यं हृदि शुद्धमा
र्गं विविक्तदेशे विपुले कुशासने निवेश्य सर्वं हृदये स सर्वं॥१२॥ बाह्यं समस्तं गुणमिंद्रियाणां

न॰पु॰
३०

विज्ञाप्यमेदं जगदस्य नंते ॥ विज्ञायमानं दममजं विशालं सत्यात्मकं क्षेमपदं वरेण्यं ॥ संचिंत्य तस्मि
न्नविहाय देहं बन्धूवसुकः परमात्मकैरूपी ॥ इमां कथां मुक्तिपरां यथोक्तां पठंति ये नारसिं
हं स्मरंतः ॥ १४ ॥ प्रयागतीर्थे वमेव यत्फलं जंतनुः प्राप्य ने यांति हरेः परं महत् ॥ १५ ॥ इत्ये
तदुक्तं तव पुत्र पृच्छतः ॥ पुरातनं पुण्यतमं पवित्रकं संसारवृक्षस्य विनाशनं परं पुनः किमि
च्छसि वांछितं वद ॥ १६ ॥ इति श्रीनरसिंहपुराणे पंचदशोऽध्यायः ॥ १५ ॥ श्रीशुक उवा
च ॥ श्रोतुमिच्छाम्यहं तात संप्रतं मुनिभिः सह ॥ संसारवृक्षं सकलं येनेदं परिवर्त्तते ॥ १ ॥ वक्तु
महसि मे तात त्वयैतत्सूचितं पुरा ॥ नान्यो वेत्ति महाभाग संसाराचारलक्षणं ॥ २ ॥ व्यास उवाच
शृणुष्वैव तु शिष्याः सकलाः वत्सत्वं शृणु यावतः ॥ संसारवृक्षं वक्ष्यामि येन चेदं समावृतं ॥
४ ॥ सूत उवाच ॥ स पुत्रेणैवमुक्तस्तु शिष्याणां मध्यगो नच ॥ कृष्णद्वैपायनः प्राह संसा
रतरुलक्षणं ॥ २ ॥ अव्यक्तमूलप्रभवस्तस्यादेवेतपोत्थितः ॥ बुद्धिस्कंधमयश्चैव

राम॰
३०

इंद्रियांकुरकोटरः ॥ ५ ॥ महाभूतविशालश्च विशेषः पत्रशाखवान् ॥ धर्माधर्मसुपुष्पश्च सु
खदुःखफलोदयः ॥ ६ ॥ आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः ॥ एतद्ब्रह्मपरं चैव ब्रह्मवृ
क्षस्य तस्य तत् ॥ ७ ॥ इत्येवं कथितं वत्स संसारवृक्षलक्षणं ॥ वृक्षमेनं समारूढा मोहमायांति दे
हिनः ॥ ८ ॥ संसरंतीह सततं सुखदुःखसमन्विताः ॥ प्रायेण प्राकृतात्मानो ब्रह्मज्ञानपराङ्मु
खाः ॥ ९ ॥ छित्त्वैनं न व्रजंति नो यांति ब्रह्मज्ञानमहासिना ॥ कर्मक्रियेमहापाशैर्नैनं कुंदंति दुःखि
ताः ॥ १० ॥ एतं छित्त्वा च भित्त्वा च ज्ञानेन परमासिना ॥ ततोमरत्वं ते यांति यस्मान्नावर्त्तते पुनः ॥
११ ॥ देहदारमयैः पाशैः दृढं बद्धोपि मुच्यते ॥ ज्ञानमेव परं पुंसां श्रेयसामपि वांछितं ॥ १२ ॥
तोषणं नरसिंहस्य ज्ञानहीनः पशुः पुमान् ॥ आहारनिद्राभयमैथुनानि समानमेतत्पशु
भिर्नराणां ज्ञानं नराणामधिकं हि लोके ज्ञानेन हीनः पशुभिः समानः ॥ १४ ॥ इति श्रीनर
सिंहपुराणे षोडशोऽध्यायः ॥ श्रीशुक उवाच ॥ संसारे वृक्षमारुह्य द्वंद्वपाशशतैर्दृढैः ॥ बध्य

त्मानंसुखैश्वर्यपतिस्तीर्येतिसागरे १ यःकामक्रोधलोभैस्तुविषयैःपरिपीडितःबद्धःस्वकर्म्मभि
र्गुणैःपुत्रदारेषणादिभिः २ सकेननिस्तरत्याशुदुस्तरंभवसागरं इत्यास्माख्याहिमेतातत
स्यमुक्तिःकथंभवेत् ३ व्यासउवाच शृणुवत्समहाभाग यंज्ञात्वामुक्तिमाप्नुयात् तंश्रव
क्ष्यामितेदिव्यंनारदेनकृतंपुरा नरकैरौरवेघोरेधर्म्मज्ञानविवर्जनं स्वकर्म्मभिर्महदुःखं
ज्ञासादृश्ययमालये ५ महापापफलंघोरंसंप्राप्ताःपापकर्म्मिणः इत्युक्त्वानारदःशीघ्रंगत्वा
यत्रत्रिलोचनः ६ गंगाधरंमहादेवंशंकरंशूलपाणिनं प्रणम्यविधिवद्देवंनारदःपरिपृच्छ
ति ७ नारदउवाच यःसंसारेमहाद्वन्द्वैःकामभोगैःशुभाशुभैः शब्दादिविषयैर्बद्धःपीड्य
मानःषडूर्मिभिः कथंतुमुच्यतेक्षिप्रमस्मात्संसारसागरात् भगवान्ब्रूहिमेतत्त्वंश्रोतुमि
च्छामिशंकर तस्यतद्वचनंश्रुत्वानारदस्यत्रिलोचनः उवाचतमृषिंराजन्प्रसन्नवदनो
हरः ९ महेश्वरउवाच ज्ञानामृतंचगुह्यंचरहस्यंऋषिसत्तम वक्ष्यामिशृणुदुःखघ्नंसर्व

बंधभयापहं ११ तृणादिचतुरस्यांतंभूतग्रामंचतुर्विधं चराचरंजगत्सर्वंप्रसुप्तंयस्यमायया
तस्यविष्णोःप्रसादेनयदिकश्चित्प्रबुध्यते सनिस्तरतिसंसारंदेवानामपिदुस्तरं १३ भोगैश्वर्य
मदोन्मत्तस्तत्त्वज्ञानपराङ्मुखः संसारसुमहापंकेजीर्णगौरिवमज्जति १४ यस्त्वात्मानंनिबध्नाति
कर्म्मभिःकोशकारवत् तस्यमुक्तिंनपश्यामिजन्मकोटिशतैरपि १५ तस्मान्नारदसर्वेशंदे
वानांदेवमव्ययं आराधयेत्सदासम्यग्ध्यायेद्विष्णुंसमाहितः १६ यस्तंविश्वमनाद्यंतमाद्यं
स्वात्मनिसंस्थितं सर्वज्ञममलंविष्णुंसदाध्यायन्विमुच्यते १७ निर्विकल्पंनिराकाशंनिःप्र
पंचंनिरामयं वासुदेवमजंविष्णुंसदाध्यायन्विमुच्यते १८ निरंजनंपरंशांतमच्युतंभूत
भावनं देवगर्भंविभुंविष्णुंसदाकीर्त्यविमुच्यते १९ सर्वपापविनिर्मुक्तमप्रमेयमलक्षणं
निर्वाणमनघंविष्णुंसदाध्यायन्विमुच्यते २० अमृतंपरमानंदंसर्वपापविवर्जितं
ब्रह्मण्यंशंकरंविष्णुंसदासंकीर्त्यमुच्यते २१ योगेश्वरंपुराणंचस्मरणंस्वमशरीरंगुहाशयं

न्मात्मम — विष्णुं सदा ध्यायन् विमुच्यते ॥ २२ ॥ अनाममोत्रमद्वैतं चतुर्थं परमं पदं ॥ तं स
र्वरूपं तं विष्णुं सदा ध्यायन् विमुच्यते ॥ २३ ॥ अरूपं सत्यसंकल्पं शुद्धमा॰ मा ॥ माकाशव
त्परं ॥ एकाग्रमनसा विष्णुं सदा ध्यायन् विमुच्यते ॥ २४ ॥ सर्वात्मकं स्वभावस्थं आत्मचैत
न्यरूपकं ॥ शुभ्रमेकाक्षरं विष्णुं सदा ध्यायन् विमुच्यते ॥ २५ ॥ विश्वाद्यं विश्वगोप्तारं वि
श्वाद्यं सर्वकारणं ॥ स्थानत्रयातिगं विष्णुं सदा ध्यायन् विमुच्यते ॥ २६ ॥ सर्वदुःखक्षयक
रं सर्वशांतिकरं हरिं ॥ आनंदमयः पुरुषः कीर्तनाद्देव मुच्यते ॥ २७ ॥ ब्रह्मादिदेवगंधर्वै
ःमुनिभिः सिद्धचारणैः ॥ योगिभिः सेवितं विष्णुं सदा ध्यायन् विमुच्यते ॥ २८ ॥ विष्णौ प्रतिष्ठि
तं विश्वं विष्णुर्विश्वे प्रतिष्ठितः ॥ विश्वेश्वरमजं विष्णुं कीर्तनाद्देव मुच्यते ॥ २९ ॥ संसारबंध
नान्मुक्तिमिच्छन्कामम्मशेषतः ॥ भक्त्यैव वरदं विष्णुं सदा ध्यायन् विमुच्यते ॥ ३० ॥ व्या
स उवाच ॥ नारदेन पुरा पृष्टः एवं सहषभध्वजः ॥ यदुवाच तदा तस्मै तन्मया कथितं त

व ॥ ३१ ॥ तमेव सततं ध्याहि निर्बीजं ब्रह्मकेवलं ॥ अवाप्स्यसि ध्रुवं तात शाश्वतं परमव्ययं ॥
३२ ॥ श्रुत्वा सुरऋषिर्विष्णोः प्राधान्यमिदमीश्वरात् ॥ स विष्णुं सम्यगाराध्य परां सिद्धिमवाप्त
वान् ॥ ३३ ॥ यश्चेमं पठते चैव नरसिंहकृतमानसः ॥ शतजन्मकृतं पापमपि तस्य प्रणश्यति
३४ ॥ विष्णोस्तवमिदं पुण्यं महादेवेन कीर्तितं ॥ प्रपत्राद्यः पठेन्नित्यं स मम तत्त्वं स गच्छति ॥ ३४
ध्यायंति ये नित्यमनंतमच्युतं हृत्पद्ममध्ये स्वयं कीर्तयंति ये ॥ उपासकानां प्रभुमीश्व
रं परं ते यांति सिद्धिं परमां तु वैष्णवीं ॥ ३६ ॥ इति श्रीनरसिंहपुराणे विष्णोस्तवराजनि
रूपणे सप्तदशोध्यायः ॥ १७ ॥ श्रीशुक उवाच ॥ किं जपन्मुच्यते तात सततं विष्णु
तत्परः ॥ संसारदुःखात्सर्वेषां हिताय वद मे पितः ॥ १ ॥ व्यास उ॰ ॥ अष्टाक्षरं प्रवक्ष्यामि म
न्त्राणां मंत्रमुत्तमं ॥ यं जपन्मुच्यते मर्त्यो जन्मसंसारबंधनात् ॥ २ ॥ हृत्पुंडरीकमध्य
स्थं शंखचक्रगदाधरं ॥ एकाग्रमनसा ध्यात्वा विष्णुं कुर्याज्जपं ततः ॥ ३ ॥ एकांते निर्जने स्था

ने विष्णोरग्रे वाजलंति के ॥ जपेदष्टाक्षरं मंत्रं चित्ते विष्णुं निधाय वै ॥ ४ ॥ अष्टाक्षरस्य मंत्रस्य ऋषि
र्नारायणः स्वयं छंदश्च देवी गायत्री परमात्मा च देवता ॥ ५ ॥ शुक्लवर्णं च ओंकारं नकारं रक्तमु
च्यते ॥ मोकारं वर्णतः कृष्णं नाकारं रक्तमुच्यते ॥ ६ ॥ राकारं कुंकुमाभं तु यकारं पीतमुच्यते
णाकारं मंजनाभं तु यकारं बहुवर्णकं ॥ ७ ॥ नमो नारायणायेति मंत्रः सर्वार्थसाधकः ॥
भक्तानां जपतां तात स्वर्गमोक्षफलप्रदः ॥ ८ ॥ सर्वपापहरः श्रीमान् सर्वमंत्रेषु चोत्तमः ॥
एनमष्टाक्षरं मंत्रं जपन्नारायणं स्मरेत् ॥ ९ ॥ संध्यावसाने सततं सर्वपापैः प्रमुच्यते
एष एव परो मंत्र एष एव परं तपः ॥ १० ॥ एष एव परो मोक्षः एष स्वर्ग उदाहृतः ॥
सर्ववेदरहस्येभ्यः सार एष समुद्धृतः ॥ ११ ॥ विष्णुना वैष्णवानां हि हिताय मनुजां पुरा ॥
एवं ज्ञात्वा ततो विप्रो ह्यष्टाक्षरमिमं स्मरन् ॥ १२ ॥ स्नात्वा शुचिः शुचौ देशे जपेत्पापविशुद्धये
जपे दाने च होमे च गमने ध्यानपर्वसु ॥ १३ ॥ जपेन्नारायणं मंत्रं कर्मपूर्वापरे तथा ॥ जपेत्सहस्रं

नियुतं शुचिर्भूत्वा समाहितः ॥ १४ ॥ मासि मासि तु द्वादश्यां विष्णुभक्तो द्विजोत्तमः ॥ स्नात्वा शुचि
र्जपेद्यस्तु नाम्नां नारायणं शतं ॥ १५ ॥ स गच्छेत्परमं देवं नारायणमनामयं ॥ गंधपुष्पादिभिर्वि
ष्णुं अनेनाराध्य यो जपेत् ॥ १६ ॥ महापातकयुक्तोपि मुच्यते नात्र संशयः ॥ हृदि कृत्वा हरिं दे
वं मंत्रमेनं तु यो जपेत् ॥ १७ ॥ सर्वपापविशुद्धात्मा स गच्छेत्परमां गतिं ॥ प्रथमेन तु लक्षेण
आत्मशुद्धिर्भविष्यति ॥ १८ ॥ द्वितीयेन तु लक्षेण मंत्रशुद्धिमवाप्नुयात् ॥ तृतीयेन तु ल
क्षेण स्वर्गलोकमवाप्नुयात् ॥ १९ ॥ चतुर्थेन तु लक्षेण हरेः सामीप्यमाप्नुयात् ॥ पंचमेन
तु लक्षेण स्वरूपं प्रतिपद्यते ॥ ॐ निर्मलं ज्ञानमाप्नुयात् ॥ २० ॥ तथा षष्ठेन लक्षेण भवेद्विष्णौ
स्थिरा मतिः ॥ सप्तमेन तु लक्षेण स्वरूपं प्रतिपद्यते ॥ २१ ॥ अष्टमेन तु लक्षेण निर्वाणमधिगच्छ
ति ॥ स्वस्वधर्मसमायुक्तो जपं कुर्याद्द्विजातयः ॥ २२ ॥ एतत्सिद्धिकरं मंत्रमष्टाक्षरमतंद्रिताः ॥
दुःस्वप्नासुरपैशाचा उरगा ब्रह्मराक्षसाः ॥ २३ ॥ जापिनं नोपसर्पंति चौरक्षुद्राधयस्तथा ॥ एका

न०पु० ग्रमतिरक्षोविष्णुरक्षोदव्रतः ॥२४॥ जपेन्नारायणं मंत्रमेतन्मन्मुखयापहं ॥ मंत्राणां परमो मं
३४ त्रो देवतानां च दैवतं ॥२५॥ धर्मार्थकाममोक्षांश्च लभते च जपन्नरः ॥ एतत्सत्यं च धर्म्यं च वे
दश्रुतिनिदर्शनात् ॥२७॥ एतत्सिद्धिकरं नॄणां मंत्ररूपं न संशयः ॥ ऋषयः पितरो देवाः सि
द्धास्त्वसुरराक्षसाः ॥२८॥ एतदेव परं जप्त्वा परां सिद्धिमितो गताः ॥ ज्ञात्वा यस्तु वात्मनः का
लं शास्त्रांतरविधानतः ॥२९॥ अंतकाले जपन्नेति तद्विष्णोः परमं पदं ॥ नारायणाय नम इत्यय
मेव सत्यं संसारघोरविषसंहरणाय मंत्रः ॥ शृण्वंतु भव्यमतयो मुदितास्त्वरागा उच्चैस्तरा
मुपदिशाम्यहमूर्ध्वबाहुः ॥३०॥ भूत्वोर्ध्वबाहुरद्यात्र सत्यपूर्वं ब्रवीम्यहं ॥ हे पुत्र शिष्याः शृणु
त न मंत्रोष्टाक्षरात्परः ॥ सत्यं सत्यं पुनः सत्यं मुक्तिप्यतु न मुच्यते ॥३२॥ वेदशास्त्रात्परं नास्ति राम०
न देवः केशवात्परः ॥ आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ॥३३॥ इदमेकं सुनिष्प ३४
न्नं ध्येयो नारायणः सदा ॥ इत्येतत्सकलं प्रोक्तं शिष्याणां तव पुण्यदं ॥३४॥ कथाश्च विवि

धाः प्रोक्ता मया त्वजजनार्दनं ॥ अष्टाक्षरमिमं मंत्रं सर्वदुःखविनाशनं ॥३५॥ जप पुत्र म
हाबुद्धे यदि सिद्धिमभीप्ससि ॥ इदं स्तवं व्यासमुखात्तु निःसृतं संध्यात्रये ये पुरुषाः पठंति
ते धौतपांडुरपटा इव राजहंसाः संसारसागरमपेतभयास्तरंति ॥३६॥ इति श्रीनरसिंह
पुराणे अष्टाक्षरमाहात्म्यं नामाष्टादशोऽध्यायः ॥ श्रीसूत उवाच ॥ इति श्रुत्वा कथाः पु
ण्याः सर्वपापप्रणाशनीः ॥ नानाविधा मुनिश्रेष्ठाः कृष्णद्वैपायनात्पुनः ॥१॥ शुकः पूर्वमहा
भागो भरद्वाजमहामतिः ॥ सिद्धैस्त्वैश्च सहितो नारायणपरोऽभवत ॥२॥ एवं तेकपिता विप्र
मार्कंडेयादिकाः कथाः ॥ मया विचित्राः पापघ्नाः किं भूयः श्रोतुमिच्छसि ॥३॥ भरद्वाज उवा
च ॥ वस्वादीनां तु देवानां प्रोक्ता सृष्टिस्त्वया पुरा ॥ अश्विनोर्मरुतां चैव नोक्तोत्पत्तिस्तु तां वदे
॥४॥ सूत उवाच ॥ मरुतां विस्तरेणोक्ता वैष्णवाख्ये महामते ॥ पुराणे शक्रपुत्रेण पुरो समि
श्वानुगा ॥ अश्विनोर्देवयोश्चैव स्तु हि रुक्ता सुविस्तरा ॥ संक्षेपात्तव वक्ष्यामि सृष्टिमेतां

न०पु० ३५ अथाष्टमे ॥ ६ ॥ रत्नस्य कन्यारदितिः ॥ अदितेरादित्यः पुत्रः ॥ तस्मै त्वष्टा दुहितरं संज्ञानामकन्यां
दत्तवान् ॥ सोपि त्वाष्ट्रीं रूपवतीं मनोज्ञां प्राप्य तया सह रेमे ॥ सा कतिपयात् कालात् स्वभर्त्तु
रादित्यस्य तापमसहंती पितुर्गृहं जगाम ॥ तामवलोक्य सुतां पितोवाच ॥ किं पुत्रि तव भर्त्तासि
विनास्नेहात्त्वां रक्षतु तपरूष इति ॥ एवं पितुर्वचनं श्रुत्वा सुतां पितोवाच ॥ किं पुत्रि त
व भर्त्तासविता स्नेहात्संतातं प्रत्युवाच ॥ हे पितरहं भर्त्तुः प्रचंडरश्मितापादिति ॥ एवं श्रुत्वा तामा
ह पिता गच्छ पुत्रि भर्त्तुर्गृहं ॥ पुत्रवती स्त्रीणां भर्त्तुः शुश्रूषणं धर्म्मः श्रेयान् ॥ अहमपि कति
पयदिवसाद्दागत्य सोस्सुतां जामातुः उद्धरिष्यामीत्युक्त्वा सा च पुनः भर्त्तुर्गृहं प्राप्य कति
पयदिवसान्मनुयमौ यमीं चापरं त्वत्रयमादित्यान्प्रसूता ॥ पुनस्तत्रोष्णतामसहंती छायां प राम० ३५
तिरूपयोगाय स्वज्ञातावलेनोत्पाद्य तत्र संस्थाप्य तं गत्वोत्तरकुरून् अश्वी भूत्वा सा विचचार
आदित्योपि संज्ञेयमिति मत्वा तस्यां जायायां पुनरपत्यत्रयमुत्पादयामास ॥ मनुश्शनैश्चरं

तपतीं च ॥ स्वेष्वपत्येषु पक्षपातेन वर्त्तंतीं छायां दृष्ट्वा यमः स्वपितरमाह ॥ पिता पितः कुत्वा भार्यां
प्राह ॥ सर्वेष्वपत्येषु सममेव वर्त्तनामिति ॥ पुनरपि स्नेह पुत्रेस्नेहात्प्रवर्त्तती छायां दृष्ट्वा यमो यमीं च
तां बहुविधमप्रियमुवाच ॥ आदित्यासंधोनिनात्मन्नहीं बभूवतुः ॥ ततः छाया तयोः शापं दत्तव
ती ॥ यम त्वं तराजोभव यमी च यमुनानाम नदी भवेतिः ॥ ततः क्रोधात् आदित्योपि छायापुत्रयोः
शापं दत्तवान् हे पुत्र ज्ञानैश्वर ग्रहो भव क्रूरदृष्टिर्मंदगामी च पापग्रहस्त्वं च ॥ पुत्रि तपती नाम न
दी भवेति ॥ अथादित्योध्यानमास्थाय संज्ञा कल्पितेति विचारयामास ॥ दृष्ट्वा तु उत्तरकुरुषु ध्यानच
क्षुषा ॥ अश्वीभूत्वा विचरंतीं स्वयं चाश्वरूपेण तत्रागत्वा तया सह संपर्कं कृतवान् ॥ तस्यामेवादि
त्यादश्विनौ वुत्पन्नौ ॥ तयोरतिशयवपुषोः साक्षात् प्रजापतिरागत्य देवत्वं यज्ञभागत्वं मुकुटं च
देवानां दत्वा जगाम ॥ आदित्यश्चाश्वरूपं विहाय स्वभार्यां संज्ञां त्वाष्ट्रीं स्वरूपमास्थाय दिवं गत
वान् ॥ विश्वकर्म्मा चागत्य आदित्यं नाम पितुं स्तुत्वा तदतिशयोष्मतां शालामयपातयामासः ॥ ए

न॰पु॰
३६

वंतेकपितापुत्राश्विनोरुत्पत्तिरुत्तमा ॥ पुण्यापवित्रापापघ्नी भरद्वाजमहामते ॥ आदित्यपुत्रौत्विष
जौसुराणांदिव्येनरूपेणविराजमानौ ॥ श्रुत्वातयोःजन्मनरःपृथिव्यांभवेत्सुरूपोदिविमोदतेच ॥
॥ इतिश्रीनारसिंहपुराणेअश्विनोरुत्पत्तिर्नामएकोनविंशोध्यायः ॥ श्रीभरद्वाजउवा
च ॥ येस्तुतोनामभिस्तेनसविताविश्वकर्म्मणा ॥ तान्यहंश्रोतुमिच्छामिवदसूतविवस्वतः ॥ १ ॥ सू
तउवाच ॥ तानिमेशृणुनामानियैःस्तुतोविश्वकर्म्मणा ॥ सवितातानिवक्ष्यामिसर्वपापहराणिते
॥ २ ॥ आदित्यःसवितासूर्यःखगःपूषागभस्तिमान् ॥ तिमिरोन्मथनःशंभुःत्वष्टामार्त्तंडआशुगः
हिरण्यगर्भःकपिलःतपनोभास्करोरविः ॥ अग्निगर्भोदितेपुत्रःशंभुस्तिमिरनाशनः ॥ ५ ॥ ह
रिर्विश्वोमहातेजाःसर्वरत्नप्रभाकरः ॥ अंशुमालीतिमिरहाऋग्यजुःसामभावितः ॥ ६ ॥ अग्नि
ब्रह्माविष्करणोमित्रःसुप्रदीपोमनोजवः ॥ यज्ञेशोगोपतिःश्रीमान्भूतज्ञःक्लेशनाशनः ॥ ७ ॥
अमित्रहाशिवोहंसोनायकःप्रियदर्शनः ॥ शुद्धोविरोचनःकेशीसहस्रांशुःप्रतर्दनः ॥ धर्मर

राम॰
३६

श्मिः ॥ पतंगश्चविशालोविश्वसंस्तुतः ॥ दुर्विज्ञेयगतिःशूरःतेजोराशिर्महायशाः ॥ ९ ॥ भ्राजिष्णु
र्ज्योतिषामीशोविजिष्णुर्विश्वभावनः ॥ प्रभविष्णुःप्रकाशात्माज्ञानराशिःप्रभाकरः ॥ १० ॥ आदित्यो
विश्वदृक्यज्ञकर्त्तानेतायशस्करः ॥ विमलोवीर्यवानीशोयोगज्ञोयोगभावनः ॥ ११ ॥ अमृतात्मा
शिवोनित्योवरेण्योवरदःप्रभुः ॥ धनदःप्राणदःश्रेष्ठःकामदःकामरूपधृक् ॥ १२ ॥ तरणिःशाश्वतः
शास्ताशास्त्रज्ञस्तपनःप्रियः ॥ वेदगर्भोविभुर्वीरःशांतःसावित्रिवल्लभः ॥ १३ ॥ ध्येयोविश्वेश्वरोभर्त्ता
लोकनाथोमहेश्वरः ॥ महेंद्रोवरुणोधाताविष्णुरग्निर्दिवाकरः ॥ १४ ॥ एतैस्तुतोमहात्मनाउवा
चविश्वकर्म्माणंप्रसन्नोभगवान्रविः ॥ १५ ॥ भ्रामिमारोप्यमामत्रमंडलंममशातय ॥ इत्युक्तो
विश्वकर्म्माचतथासकृतवान्द्विज ॥ १६ ॥ शांतोस्मःसवितातस्यदुहितुर्विश्वकर्मणः ॥ संज्ञाया
श्चाभवद्विप्रभानुःत्वष्टारमब्रवीत् ॥ १७ ॥ त्वयायस्मात्स्तुतोहंवैनाम्नामष्टशतेनच ॥ वरंवृणी
ष्वतस्मात्त्वंवरदोहंतवानघः ॥ १८ ॥ इत्युक्तोभानुनासोपिविश्वकर्म्माब्रवीदिदं ॥ वरदोयदिमेदे

न॰पु॰ ३७

ववरमेतं प्रयच्छ मे ॥ १९ ॥ एतैस्तु नामभिर्यस्त्वां नरस्तोष्यति नित्यशः । तस्य पापक्षयं देव कुरु भक्तस्य
भास्कर ॥ २० ॥ तेनैव मुक्तो दिननाथ तत्परेति तत्क्षणं रमुक्त्वा विरराम भास्करः । संज्ञां विशोकां रविमंडले
स्थितां कृत्वा जगामाथ रविं प्रसाद्य ॥ २१ ॥ इति श्रीनरसिंहपुराणे रविस्तवो नाम विंशतितमोऽध्या
यः ॥ श्रीसूत उवाच ॥ सांप्रतं मरुतोत्पत्तिं वक्ष्यामि द्विजसत्तम । पुरा देवासुरे युद्धे देवैरिंद्रादिभिः
सुतैः । दितिपुत्राः पराजिताः नष्टाः पातालमाययुः ॥ १ ॥ दितिश्च विनष्टपुत्रा महेंद्रदर्पहरं पुत्रमिच्छती
कश्यपमृषिं स्वपतिमाराधयामास । स च तपसा संतुष्टो गर्भाधानं चकार । तस्याः पुनस्तामेवमुक्त
वान् । यदि त्वं शुचिः सती शरच्छतमिमं गर्भं धारयिष्यसि ततश्च महेंद्रदर्पहंता पुत्रो भविष्यतीत्येव
मुक्ता सा च तं गर्भं धारयामास । इंद्रोपि तं ज्ञात्वा वृद्धब्राह्मणरूपेणागत्य दितिपार्श्वे स्थितवान् । किं — राम॰ ३७
चिदूने पूर्णे वर्षशते पादशौचमकृत्वा दितिः शयनमारुह्य निद्रां गता । सोपि लब्धावसरो वज्रपा
णिः तत्कुक्षिं प्रविश्य वज्रेण तं गर्भं सप्तधा विच्छेद । सोऽपि तेन पच्छिद्यमानः प्ररुरोद । मारोदीरि

ति वदन्निंद्रः तान् सप्त धैकैकं चिच्छेद । सप्तधा ते सर्वे मरुतो जातमात्रान्मारोदीरित्युक्तवान्
महेंद्रस्य सहाया मरुतो नाम देवा बभूवुः । एवं मुने सृष्टिरियं तवेरिता देवासुराणां नरनागरक्ष
सां । वियन्मुखानामपि यः पठेदिदं शृण्वंश्च ब्रह्मन्स हरिलोकमेति सः ॥ इति श्रीनरसिंहपुरा
णे एकविंशतितमोऽध्यायः ॥ सृष्टिकांडं समाप्तः ॥ ॥ श्रीभरद्वाज उवाच ॥ अनुसर्गश्च सर्ग
श्च त्वया विप्र प्रकीर्तिता । वंशमन्वंतरं ब्रूहि वंशानुचरितं च मे ॥ १ ॥ सूत उवाच ॥ राज्ञां वंशः पुराणे
षु विस्तरेण प्रकीर्तितः । संक्षेपात्कथयिष्यामि वंशमन्वंतराणि ते ॥ २ ॥ वंशानुचरितं चैव शृणु वि
प्र महामते । शृण्वंतु मुनयश्चेमे श्रोतुमागत ये स्थिता ॥ ३ ॥ आदौ तावद्ब्रह्मा ब्रह्मणो मरीचिः मरीचेः
कश्यपः । कश्यपादादित्यः आदित्यान्मनुः । मनोरिक्ष्वाकुः इक्ष्वाकोर्विकुक्षिः विकुक्षेः द्योतः द्योताद्वे
नुः वेनात्पृथुः पृथोः पृथ्वाश्वः । पृथ्वाश्वादसंख्याताश्वः । असंख्याताश्वान्मांधाता । मांधातुः पुरुष
कुत्सः पुरुकुत्सात् दृषदः । दृषदादभिशंभुः । अभिशंभोर्दारुणः । दारुणात्सगरः । सगरात् हर्यश्व

न॰पु॰
३९

ः हर्यश्वात्हारीतः हारीताद्रोहिताश्वः रोहिताश्वादंशुमान् ॥ अंशुमतोनगारपः ॥ नगारपात्सौदा
सः सौदासाच्छत्रुंदमः शत्रुंदमादनरण्यः ॥ अनरण्याद्दीर्घबाहुः ॥ दीर्घबाहोरजः ॥ अजाद्दशर
थः दशरथाद्रामः ॥ रामाल्लव ॥ लवात्पद्मः ॥ पद्मादृतुपर्णः ऋतुपर्णाद्वस्त्रपालितः वस्त्रपाणेः शु
द्धोदनः ॥ शुद्धोदनाद्बुधः ॥ बुधाद्वंशो निवर्त्तते ॥ सूर्यवंशजवारत्यस्तेते धाधर्म्येन प्रकीर्त्तिताः ॥ येरि
यं पृथिवी भुक्ता धर्मतः क्षत्रियैः पुरा ॥ सूर्यस्य वंशः कथितो मया मुने समुद्रता यत्र नरेश्वराः पु
रा मयोच्यमानाञ्छमिनः समाहितः शृणुष्व वंशोद्भव भूपाननुत्तमान् ॥ इतिश्रीसूर्यवंशाकनं नाम
द्वाविंशोध्यायः ॥ श्रीसूत उवाच ॥ सोमवंशं शृणुध्वाद्य नरराज महामुने पुराणे विस्तरेणैकं
संक्षेपात्कथयेऽधुना ॥ १ ॥ आदौ तावद्ब्रह्मणो ब्रह्मणो मानसः पुत्रो मरीचिः मरीचेर्द्दाक्षायण्यां क
श्यपः कश्यपाददितेरादित्य ॥ आदित्यात्सुवर्च्चलायां मनुः मनोः सुरूपायां सोमः सोमाद्रोहिण्यां
बुधः बुधादिलायां पुरूरवाः पुरूरवसः सः आयुः आयोः रूपवत्यां नहुषः नहुषात्पितृवत्यां

राम॰
३९

ययातिः ॥ ययातेः शर्मिष्ठायां पूरुः ॥ पूरोर्वंशदायां संयातिः ॥ संयातेर्भानुदत्तायां सार्वभौमः ॥ सार्वभौ
मस्य वैदेह्यां भोजः भोजस्य लिंगायां दुष्यंतः ॥ दुष्यंतस्य शकुंतलायां भरतः ॥ भरतस्य नंदायां
अजमीढः ॥ अजमीढस्य सुदेव्यां ऋक्षः ॥ ऋक्षेरुग्रसेनायां वत्ससरः ॥ वत्ससरस्य बहूरूपायां शां
तनुः ॥ शांतनोर्योजनगंधायां विचित्रवीर्यः ॥ विचित्रवीर्यस्यांबिकायां पांडुः ॥ पांडोः कुंतिदेव्यामर्
जुनः ॥ अर्जुनात्सुभद्रायामभिमन्युः ॥ अभिमन्योरुत्तरायां परीक्षित ॥ परीक्षितस्मात्रवत्यां ज
नमेजयः ॥ जनमेजयस्य पुष्पवत्यां शतानीकः ॥ शतानीकस्य पुष्पवत्यां सहस्रानीकः ॥ सह
स्रानीकस्य मृगवत्यां उदयनः ॥ तस्य वासवदत्तायां नरवाहनः ॥ नरवाहनस्याश्वमेधायां क्षेम
कः ॥ क्षेमांताः पांडवाः सोमवंशो निवर्त्तते ॥ य इदं शृणुयान्नित्यं राजवंशमनुत्तमं ॥ सर्वपा
पविशुद्धात्मा विष्णुलोकं स गच्छति ॥ यश्चेदं पठते नित्यं श्राद्धे वा श्रावयेत्सि हृत ॥ वंशानुकि
र्त्तनं पुण्यं पितॄणां दत्तमक्षयं ॥ राज्ञां सोमस्य मयात वेरितां वंशानुकीर्त्तिः द्विजपापनाश

न०पु०
२९

नौ ॥ श्रृणुष्व विप्रेंद्र मयोच्यमानं मन्वंतरं चापि चतुर्दशाख्यं ॥ इति श्रीनरसिंहपुराणे सोमवंशा
नुकीर्तने त्रयोविंशतिमोध्यायः ॥ छ ॥ श्रीसूत उवाच ॥ अथ मंताव स्वायंभुवं मन्वंतरं तु स्व
रूपं कथितं ॥ सर्गादौ स्वारोचिषो नाम द्वितीयो मनुः ॥ तस्मिन् स्वारोचिषे मन्वंतरे विपश्चि
न्नाम देवेंद्रः ॥ पारापता देवाः ॥ ऊर्जस्तंवः सुप्राणः दत्तो ऋषभो वरीयानीश्वरः सोमः सप्तर्ष
यः ॥ किंपुरुषाद्याः स्वारोचिषस्य मनोः पुत्रा राजानो भवंति ॥ छ ॥ तृतीय उत्तमो नाम मनु
सुधामानः सत्याः शिवाः ॥ प्रतर्दना वशवर्तिनश्च देवाः ॥ तेषां सुशांतिरिंद्रः ॥ वशिष्ठाद्याः स
प्तर्षयो भवान् ॥ अत्र परशुचित्राद्याः मनोः सुताः ॥ चतुर्थस्तामसो नाम मनुः ॥ तत्र मन्वंतरे
सुराः पाराः सत्याः सुधियश्च ॥ तत्रपुशंडी नाम देवेंद्रः ॥ हिरण्यरोमा देवश्रीऊर्ध्वबाहुर्देवबा
हुः सुधामा पर्जन्यो मुनिरित्येते सप्तर्षयः ॥ ज्योतिर्धामा पृथुः काव्योऽग्निर्धनक इत्येते तामसस्य
मनोः पुत्रा राजानः ॥ पंचमो नाम रैवतो मनुः ॥ तस्यांतरे ॥ मिताभिरता वैकुंठाः सुमेधसः इ

रम०
२९

त्येते देवगणाः ॥ अमृतांतको नाम देवेंद्रः ॥ सत्यकाद्या मनोः सुताः ॥ राजानो वै बभूवुः ॥ शांत
ः शांतनवो विद्वान् तपस्वी मेधावी सुतपाः सप्तर्षयो भवन् ॥ षष्ठश्चाक्षुषो नाम मनुः ॥ पु
रुशतद्युम्नप्रमुखास्तस्य सुता राजानः ॥ आद्याः प्रसूताः भव्याः पृथिताश्च देवाः ॥ तेषां मि
त्रो मनोजवः सुमेधा विरजो हविष्मानुत्तमो मतिमान्नरनाम्नास सहिष्णुश्चेते सप्त
र्षयः ॥ सप्तमो वैवस्वतो मनुः ॥ सांप्रतं वर्त्तते ॥ तस्य पुत्रा इक्ष्वाकुप्रभृतयः भू
भुजः ॥ आदित्यवसुरुद्राद्याः देवाः ॥ पुरंदरोत्र देवेंद्रः ॥ वशिष्ठः कश्यपोऽत्रिर्जमदग्नि
र्गौतमविश्वामित्रभरद्वाजाः ॥ सप्तर्षयो भवंति ॥ भविष्याणि मन्वंतराणि कथ्यंते
तथापि ॥ आदित्यात्संज्ञायां जातो यो मनुः पूर्वोक्तः ॥ छायायामुत्पन्नो मनुर्द्विती
यः स तु पूर्वजस्य सावर्ण्यस्य मन्वंतरं सावर्णिकमष्टमं शृणु ॥ मनुः सावर्णोऽत्राष्टमो
भविता तत्र सुतपाद्याः देवगणाः ॥ तेषां च बलिरिंद्रो भविता ॥ दीप्तिमान् गालवो

न०पु० वामऋष्यद्रौणिव्यासऋष्यश्रृंगाश्च सप्तर्षयो भवितारः विराजोर्वरीयनिर्मोकाद्याः
४० सावर्णस्य मनोः सुताः नवमो दक्षसावर्णिर्मनुर्भविता धृतिः कीर्त्तिः दीप्तिः केतुः पं
चहस्तो निरामयः पृथुश्रवाद्याः दक्षसावर्णिपुत्राद्या राजानः मरीचिगर्भाः सुधर्म्मा
णो हविष्मंतस्तत्र देवाः तेषामिंद्रोऽद्भुतः सवनो द्युतिमान् हव्यो वसुर्मेधातिथि
ज्योतिष्मान सत्य इत्येते सप्तर्षयः दशमो ब्रह्मसावर्णिर्मनुर्भविता विरुद्धादयस्तत्र
देवाः तेषां शांतिरिंद्रः हविष्मान् सुकृतिः सत्यस्तपोमूर्त्तिः नाभागः प्रतिमोकः सत्यके
तुरित्येते सप्तर्षयः सुक्षेत्र उत्तमौजो भूरिषेणाद्याः ब्रह्मसावर्णिपुत्राः राजानो भविष्य
ति एकादशे मन्वंतरे धर्मसावर्णिको मनुः सिंहसवनादयो देवगणाः तेषां दिव राम०
स्पतिरिंद्रः निर्मोहस्तत्वदर्शी निकंपो निकरुत्साहो धृतिमान् रुच्यः इत्येते सप्तर्षयः ४०
चित्रसेनविचित्राद्याः धर्मसावर्णिपुत्रा भूभुजो भविष्यंति रुद्रसावर्णिर्भविता द्वाद

शो मनुः ऋतधामा तत्रेंद्रो हरिता रोहिताः सुमनसः सुकर्माणः सुतपाश्च देवाः त
पस्वी चारुतपा तपो तपोमूर्त्तिः तपोरतिः तपोधृतिः ज्योतिस्तप इत्येते सप्तर्षयः देववा
न्देवश्रेष्ठाद्याः तस्य मनोः सुता नृपा भविष्यंति त्रयोदशो रुचिर्नाम मनुः सुत्रामाणः
सुधर्माणः सुमतयो देवगणाः तेषामिंद्रः ऋतधामा नाम भविता निश्चरोऽग्नितेजा वपुष्मा
न् धृष्टः चारुणिर्हविष्मान् नहुषो भव्य इति सप्तर्षयः सुधर्मा देवानीकादयः तस्य मनोः पु
त्राः पृथ्वीश्वरा भविष्यंति भौमश्चतुर्दशो मनुर्भविता सुरुचिस्तत्रेंद्रः चक्षुष्मंतः पवित्रा
कनिष्ठाः देवगणाः अग्निबाहुः शुचिः शुक्रमाधवशिवमालिजितश्चास इत्येते स
प्तर्षयः पुरुगंभीरबुद्ध्याद्याः तस्य मनोः सुताः राजानः एवं ते चतुर्दश मन्वंतराणि कथि
तानि राजानश्च यैरियं वसुधा पाल्यते मनुः सप्तर्षयो देवा भूपालाश्च मनोः सुताः मन्वं
तरे भवंत्येते शक्रश्चैवाधिकारिणः चतुर्दशभिरेतैस्तु गतैर्मन्वंतरैर्द्विज सहस्र

न॰पु॰
४१

युगपर्यंतः कृतो योगकृतिवासरे । तावत्प्रमाणा च निशा तत्र तोऽभवतिसत्तम । ब्रह्मरूपधर
ः शेते सर्वात्मा नहरिः स्वयं । त्रैलोक्यमखिलं ग्रस्त्वा भगवानादिकृद्विभुः । स्वमायामास्थि
तो विप्र सर्वरूपी जनार्दनः । अथ प्रबुद्धो भगवान् यथा पूर्वं तथा पुनः । युगव्यवस्थां कुरुते
सृष्टिं च पुरुषोत्तमः । एतत्तवोक्ता वनवो मराश्च पुत्राश्च भूपाश्च मुनयश्च सर्वे । विभूतय
स्तस्य स्थितौ स्थितस्य सर्वत्वमवेहि विप्र ॥ इति श्रीनरसिंहपुराणे चतुर्दशमन्वंतर
कथने चतुर्विंशतितमोऽध्यायः ॥ श्रीसूत उवाच ॥ अतः परं प्रवक्ष्यामि वंशानुचरितं शुभं
शृणुष्व तामपि पापघ्नं सूर्यसोमनृपात्मकं ॥ १ ॥ सूर्यवंशोद्भवो यो वै मनुपुत्रपुरोदितः
इक्ष्वाकुर्नामभूपाल श्चरितं तस्य मे शृणु ॥ २ ॥ आसीद्भूमौ महाभागपुरी दिव्या सुशोभना
सरयूतीरमासाद्य अयोध्या नाम नामतः । अमरावत्यतिशोभा त्रिंशद्योजनजालिनी
हस्त्यश्वरथपत्त्यौघैर्द्रुमैः कल्पद्रुमप्रभैः । प्राकारादवतोलीभिः तोरणैः काचनप्रभैः । वि

राम॰
४१

राजमाना सर्वत्र सुविभक्तचतुःपथा । अनेकभूमिप्रासादा बहुगोपुरसुविक्रिया । पद्मोत्पलयु
तैः सौधैः वापीभिः रूपशोभिता । देवतायतनैर्दिव्यैः वेदघोषैश्च शोभिता । वीणावेणुमृदंगैश्च
शब्दैरुत्कृष्टकैर्युता । शालतालनालिकेरपनसामलजंबुकैः । इपैवाम्रकपित्थाद्यैः रशो
कैरुपशोभिता । आरामैर्विविधैर्युक्ता सर्वत्र फलपादपैः । मल्लिकामालतीजातीपाटला
नागचंपकैः । करवीरैः कर्णिकारैः केतकीभिरलंकृता । कदलीजातिकदलीमातुलिंग
महाफलैः । नित्योत्सवप्रमुदिता गीतवाद्यविचक्षणैः । नरनारीभिराढ्याभीरूपद्रविणभू
णैः ॥ नानाजनपदाकीर्णपताकाध्वजशोभिता । देवतुल्यप्रभावैश्च नृपपुत्रैश्च संयुता । सु
रूपाभिर्वरस्त्रीभिः देवस्त्रीभिरिवावृता । विप्रैः सत्कर्मनिर्युक्तैः हरसतिसमैर्द्विजैः । वणि
ग्जनैस्तथा चैवैः कल्पद्रुमवरैर्युता । अश्वैरुच्चैःश्रवस्तुल्यैः इतिभिर्दिग्गजैरिव । इति ना
नाविधैर्भावैः अयोध्येंद्रपुरीसमा । तां दृष्ट्वा नारदः श्लोकं सभामध्ये पुरोक्तवान् । स्वर्गो वैध्य

सजमानस्यव्यर्थस्यात्मजन्मनः । जाता योऽप्याधिका स्वर्गात् कर्मयोगसमन्विता । तामावस
द्योध्यांनुस्वस्तिषिक्तो महीपतिः । जितवान् सर्वनृपाजान् धर्मेण सह महाबलः ॥ १७ ॥ मणिमा
णिक्यमुकुटैः राजभिर्मंडलाधिपैः । नमद्भिर्निर्जितैर्नित्यं पादं तस्य किणीकृतं ॥ १८ ॥ इक्ष्वाकुर
हृतबलः सर्वशास्त्रविशारदः । तेजसेंद्रेण सदृशो मनोःसूनुः प्रतापवान् ॥ १९ ॥ धर्म्मतोन्याय
तश्चैव वेदज्ञैर्ब्राह्मणैर्युतः । पालयामास धर्मात्मा आसमुद्रां महीमिमां ॥ २० ॥ जितवान् परलो
कांश्च क्रतुभिर्भूरिदक्षिणैः । दानैश्च विविधैर्भूत्सन्राजेक्ष्वाकुः प्रतापवान् ॥ २१ ॥ बाहुद्वयेन व
सुधां जिह्वाग्रेण सरस्वती । बभार पद्मामुरसा भक्तिं चित्तेन माधवे ॥ २२ ॥ सतिष्टं तं हरेरूपं पुंडप
विष्णुश्च माधवं । ध्यानमप्यनंतं तु कारयित्वा पटे मतं ॥ २३ ॥ त्रिकालं त्रयमाराध्य रूपं विष्णो
र्महात्मनः । गंधपुष्पादिभिर्नित्यं रेमे दृष्ट्वा पटे हरिं ॥ २४ ॥ कृष्णं तं कृष्णमेघाभं भुजगेंद्रनिवासिनं
पद्माक्षं पीतवासं च स्वप्नेष्वपि स दृष्टवान् । चकार मेघेन दृष्टं बहुमानमतिं नृपः । दिव्याकृति

हरेः साक्षात् द्रष्टुं तस्य महीपतेः । अतीव तृष्णा संजाता अपूर्वैव हि सत्तमः । तस्मायांतु प्रद्रष्टा
यां मनसैव हि पार्थिवः ॥ २७ ॥ चिंतयामास मतिमान् राज्ययोगमसारवत् । वेश्म दाराः सुताः क्षेत्रं
सेन्यस्त्वं येन दुःखदं ॥ २८ ॥ वैराग्य ज्ञानपूर्वेण लोकेस्मिन्नास्ति तत्समः । इत्येवं चिंतयित्वा तु तप
स्यासक्तचेतनः ॥ २९ ॥ वसिष्टं परिपप्रच्छ तत्रोपायं पुरोहितं । तपोबलेन देवेशं नारायणमजं मुने
॥ ३० ॥ द्रष्टुमिच्छाम्यहं तत्र उपायं च वदस्व मे । इत्युक्तः प्राह राजानं तपस्यासक्तमानसं ॥ ३१ ॥ वसि
ष्टः सर्वधर्मज्ञः सदा तस्य हिते रतः । यदि वसि महाराज द्रष्टुं नारायणं परं ॥ ३२ ॥ तपसा सुमहता ते
नेह आराधय जनार्दनं । केनाप्यतप्ततपसा देवदेवो जनार्दनः ॥ ३३ ॥ द्रष्टुं न शक्यते जातु त
स्मात्त्वं तपसार्चय । पूर्वदक्षिणदिग्भागे सरयूतीरगं नृप ॥ ३४ ॥ गालवप्रमुखानां तु मुनीनाम
स्ति चाश्रमं । पंचयोजवेनमधानं स्थानमस्मात्तु पावनं ॥ ३५ ॥ नानाद्रुमलताकीर्णं नानापुष्पस
माकुलं । सुमंत्रिणि महाप्राज्ञे वाति मत्पुर्जुनेन्नृप ॥ ३६ ॥ स्वराज्यभारं विन्यस्य कर्मकांडमपि द्वि

न०पु० ४३ जः स्तुत्वाराध्य गणाध्यक्षं इतो व्रज विनायकं ३७ तपःसिद्ध्यर्थमनघ पश्चात्तत्र तपः कुरु तापसं
वेषमास्थाय शाकमूलफलाशनः ३८ ध्यायन्नारायणं देवमिदं मंत्रं सदा जप ॐ नमो भगवते वा
सुदेवाय एष सिद्धिकरो मंत्रो द्वादशाक्षरसंज्ञितः ३९ जप्त्वैनं मुनयः सिद्धिं परां प्राप्ताः पुरातना
ः गत्वा निवर्त्तते चंद्रसूर्यादियो ग्रहाः ४० अद्यापि न निवर्त्तंते द्वादशाक्षरचिंतकाः बाह्येंद्रियं
इंद्रियाप्यमनःश्लेपरात्मनि जपसंजयतन्मंत्रं हृष्यो मधुसूदनः इति ते कथितोपायो हरि
प्राप्त्यै तपःकृते इह ततः सांप्रतं त्वयो यदीच्छसि कुरु तत्तत् इत्येवमुक्तो मुनिना स राजा राज्यं च वो
मंत्रीवरे समर्प्य स्नात्वा गणेशं समनो निरर्च्य गतः पुरात्स्वात्तपसे ध महात्मा ४२ इति श्रीन
रसिंहपुराणे इक्ष्वाकुचरित्रे पंचविंशतिमोऽध्यायः ॥ भरद्वाज उवाच कथं स्तुतो गणाध्य राम० ४३
क्षस्तेन राज्ञा महात्मना यथा तेन तपस्तप्तं तन्मे वद महामते १ सूत उवाच चतुर्थ्यां दिवसे रा
जा स्नात्वा त्रिषवणं द्विज रक्तांबरधरो भूत्वा रक्तगंधानुलेपनः २ सुरक्तकुसुमैर्धूपैर्विनाय

कमथार्चयत् रक्तचंदनतोयेन स्नानं पूर्वं यथाविधि ३ विलिप्य रक्तगंधेन रक्तपुष्पैः प्रपूजयेत्
नैवेद्यं चैव हारिद्रं गुडखंडघृतप्लुतं ४ एवं सुविधिना पूज्य विनायक यथास्तुवन् इक्ष्वाकुरुवा
च नमस्कृत्वा महादेवं स्तोष्येहं त्वां विनायकं ५ महागणपतिं शूरमजितं ज्ञानवर्द्धनं एकदंतं
द्विदंतं च चतुर्दंतं चतुर्भुजं ६ त्र्यक्षं त्रिशूलहस्तं च रक्तनेत्रं वरप्रदं अंबिकेयं शंकुकर्णं प्रचंडं
दंडनायकं ७ आरक्तदंतिनं चैव वह्निवक्त्रं हुतप्रियं अनर्चितो विघ्नकरः सर्वकार्येषु यो नृणां
८ तं नमामि गणाध्यक्षं भीममुग्रमुमासुतं मदमत्तं विरूपाक्षं भक्त विघ्ननिवारकं ९ सूर्य
कोटिप्रतीकाशं भिन्नांजनसमप्रभं बुद्धं सुनिर्मलं शांतं नमस्यामि विनायकं १० नमोस्तु गजरू
पाय गजाननाय तयेनमः मेरुमंदररूपाय नमः कैलाशवासिने ११ विश्वरूपाय नमस्तेस्तु नमस्ते ब्र
ह्मचारिणे भक्तस्तुताय देवाय नमस्तुभ्यं विनायक १२ त्वया पुराणपूर्वेषां देवानां कार्यसिद्धये ग
जरूपं समास्थाय त्रासिताः सर्वदानवाः १३ ऋषीणां देवतानां च नायकत्वं प्रकाशितं इतस्त्वतः

सुरैरुग्रैः पूज्यसे त्वं नवात्मज १४ त्वामाराध्य गणाध्यक्षं सर्वज्ञं कामरूपिणं कार्यार्थं रक्तकुसुमैरक्तचंद
नवारिभिः १५ रक्तांबरधरो भूत्वा चतुर्थ्यामर्चयेज्जपेत् त्रिकालमेककालं वा नियतो नियताशनः
१६ राजानं राजपुत्रं वा राजमंत्रिणमेव वा राज्यं च सर्वविघ्नेश वशं कुर्यात्सराष्ट्रकं १७ अविघ्नं तप
सो मह्यं कुरु नौमि विनायक मयेत्थं संस्तुतो भक्त्या पूजितश्च विशेषतः १८ यत्फलं सर्वतीर्थेषु स
र्वयज्ञेषु यत्फलं तत्फलं पूर्णमाप्नोति स्तुत्वा देवं विनायकं १९ य इदं पठति स्तोत्रं षड्भिर्मासैर्वरं ल
भेत् संवत्सरेण सिद्धिं च लभते नात्र संशयः २० सूत उवाच एवं स्तुत्वा पुरा राजा गणाध्यक्षं द्वि
जोत्तम तापसं वेषमास्थाय तपश्चर्तुं गतो वनं २१ उत्सृज्य वस्त्रं नागत्वक्सदृशं बहुमूल्यकं क
ठिनां तु त्वचं वार्क्षीं कट्यां धत्ते नृपोत्तम तथा रत्नानि दिव्यानि वलयानि निरस्य तु अक्षसूत्रमलंकारं फले
पद्मस्य शोभनं २३ तपोत्तमांगे मुकुटं रत्नहाटकशोभितं सत्का जटाकलापं तु तपोर्थं बिभ्रयान्नृपः
कृत्वेत्थं स तपोवेषं वसिष्ठोक्तं तपोवनं प्रविश्य च तपस्तेपे शाकमूलफलाशनः ग्रीष्मे पंचाग्निमध्य

स्थोनयेत्कालं महातपाः वार्षिकं च निरालंबो हैमंतं च सरोजले २६ इंद्रियाणि समस्तानि नियम्य हृ
दये पुनः मनो विष्णौ समावेश्य मंत्रं वै द्वादशाक्षरं जपतो वायुभक्षस्य तस्य राज्ञो महात्मनः आविर्ब
भूव भगवान्ब्रह्मा लोकपितामहः तमागतमथाजो वा पद्मयोनिं चतुर्मुखं प्रणम्य प्रांजलिर्भावे
न स्तुत्वा च परितोषयेत् नमो हिरण्यगर्भाय जगत्स्रष्ट्रे महात्मने वेदशास्त्रार्थविदुषे चतुर्वक्त्रा
य ते नमः इति स्तुतो जगत्स्रष्टा ब्रह्मा प्राह नृपोत्तमं तपस्विनं तं शांतं त्यक्तराज्यमहासुखं ३
१ ब्रह्मोवाच लोकप्रकाशको राजन्सूर्यस्तव पितामहः मुनीनामपि सर्वेषां सदा मान्यो मनु
ः पिता कृतवंतौ तपः पूर्वं तीव्रं पितृपितामहौ तावतीत्य तपस्तेपे वर्त्तते निःस्पृहस्य वै किमर्थं
राज्यभोगं तु संत्यक्त्वा सर्वं नृपोत्तम तपः करोषि घोरं त्वं समाचक्ष्व महामते इत्युक्तो ब्रह्मणा रा
जा तं प्रणम्याब्रवीद्वचः इष्टं सिद्धं तपश्चर्यां बलेन मधुसूदनं करोम्येव तपो ब्रह्मन्शंखचक्रग
दाधरं इत्युक्तः प्राह राजानं पद्मजन्मा हसन्निव ३६ न शक्य तपसा दृष्टुं त्वया नारायणो विभुः

न०पु०
४५

सादरैरपि नादृश्यः केशवः क्लेशनाशनः पुरातनीं पुण्यकथां कथयामि निबोध मे नृपते प्रलये लो
कान्संहृत्य कमलेक्षणः अनंतभोगशयने योगनिद्रां गतो हरिः सनंदनाद्यैर्मुनिभिः स्तूयमानो म
हामते तस्य सुप्तस्य नाभौ तु महत्पद्ममजायत तस्मिन्पद्मे भूपे राजन्जातोहं वेदवित्पुरा त
तो नत्वा चलो दृष्टिः दृष्टवान्कमलेक्षणं अनंतभोगपर्यंके भिन्नांजननिभं हरिं ४१ अतसी
कुसुमनिभं शयानं पीतवाससं दिव्यरत्नविचित्रांगं मुकुटाटोपमस्तकं ४२ कुंदेंदुसदृशाकारम
नंतं च महानने सहस्रफणमध्यस्थैर्मणिभिर्दीप्तिमंततः ४३ क्षणमात्रं तु तं दृष्ट्वा पुनस्तत्र
न दृष्टवान् दुःखेन महताविष्टो बभूवाहं नृपोत्तम ततो वरतरस्तस्मात्पद्मनालं समाश्रित
ः कौतुहलेन तं द्रष्टुं नारायणमनामयं ४४ ततस्तन्विष्य राजेंद्र सजिजोतं न दृष्टवान् श्रीशं
पुनस्तमेवाहं पद्ममाश्रित्य चिंतयन् तद्रूपं वासुदेवस्य दृष्टुं तेपे महत्तपः ततो मामंतरिक्ष
स्था वागुवाचाशरीरिणी ४५ वृथा किं क्लिश्यते ब्रह्मन्सांप्रतं कुरु मे वचः न दृश्यो भगवान्

राम०
४५

विष्णुस्तपसा हलापिते सृष्टिं कुरु तदा ज्ञात्वा यदि द्रष्टुमिहेच्छसि शुद्धस्फटिकसंकाशं ना
गपर्यंकशायिनं ४६ यद्दृष्टं शार्ङ्गिणो रूपं भिन्नांजनसमप्रभं प्रतिमां नियतं रूपं विमानस्थं
महामते ४७ भज नित्यमनालस्यस्ततो द्रक्ष्यसि माधवं तयेत्युक्ते चेदितो राजन्नत्यक्कात तत्वम
नुत्तमं ४८ दृष्टवान्लोकभूतानां सृष्टिं सद्यः स्थितस्य च आविर्बभूव मनसि विश्वकर्मा
प्रजापति ४९ अनंतरं कल्पयोस्तेन द्वे रूपे निर्मिते शुभे विमानस्थो यथापूर्वं मया दृष्टो जलेन्
प ५० तथैव तं ततोऽभ्यास संपूज्याहं हरिः स्थितः तत्प्रसादान्नृपः श्रेष्ठं मया ज्ञानमनुत्तमं ५
१ लब्धा मुक्तिं च पश्यामि स्वविकारक्रियासु त्वं तदहं ते प्रवक्ष्यामि हितं तत्पवरेश्वरः ५२
विसृज्यैतत्तपो घोरं पुरीं व्रज निजां नृप प्रजानां पालनं धर्मं तपश्चैव महीक्षितां विमानं प्र
वर्तयिष्यामि सिद्धिजगणान्वितं तत्राराधय देवेशं वाद्यार्थैः खिलैः शुभैः ५४ नारायण
मनंताख्यं शयानं क्रतुभिर्यजन् निष्कामो नृपशार्दूल प्रजा धर्मेण पालय ५५ प्रसादाद्वासु

न॰पु॰
४६

देवस्यमुक्तिस्थेनवितानय ॥ इत्युक्त्वातंजगामाथब्रह्मालोकपितामहः ॥ ५६ ॥ इक्ष्वाकुश्चिंतयन्ना
स्तेपप्रययौनिवचोद्विज ॥ आविर्बभूवपुरतोविमानंतंमहीपतेः ॥ ५७ ॥ ब्रह्मदत्तंद्विजमुख्यमा
धवानंतयोःशुभं ॥ तंदृष्ट्वापरयाभक्त्याप्रणम्यचपुरुषोत्तमं ॥ ५८ ॥ ब्राह्मणान्प्रणम्यविप्रांश्चतद्रा
राययौपुरीं ॥ पौरैर्जनैश्चनारीभिरुद्धशोभासमन्वितैः ॥ ५९ ॥ आजगाविनिःद्विपृद्धिश्चनीतो
राजात्मकंगृहं ॥ स्वमंदिरेविशालेतुविमानंवैष्णवंशुभं ॥ ६० ॥ संस्थाप्याराधयामासतैर्द्विजैरर्चितो
हरिः ॥ महिष्यःशोभनायास्तुपिष्ट्वांतुहरिचंदनं ॥ ६१ ॥ मालाःकृत्वासुगंधाढ्याःप्रीतिस्तस्यविवर्द्धिरे ॥
पौराःकर्पूरकाश्मीरचंदनंकुंकुमागुरुंतथा ॥ ६२ ॥ कृत्स्नंविशेषतोवस्त्रंमहिष्यश्चगुग्गुलं ॥ पुष्पाणि
विष्णुयोग्यानिहठुरानीयन्नृपतेः ॥ ६३ ॥ विमानस्थंहरिंपूज्यगंधपुष्पादिभिःक्रमात् ॥ त्रिसंध्यंपर — रम्म॰
यान्नक्त्याजपैःस्तोत्रैश्चवैष्णवैः ॥ ६४ ॥ गीतैःकाहलशब्दैश्चशंखवादित्रनादितैः ॥ चेहृत्यैरपिशा — ४६
स्त्रोक्तैःपातैश्चनिशिजागरैः ॥ ६५ ॥ कारयामाससुचिरमुत्सवंपरमंहरेः ॥ योगैश्वतोषयित्वातं

सर्वदेवमयंहरिं ॥ निःकामोदानधर्मैश्चपरंज्ञानमवाप्तवान् ॥ यजन्यज्ञंमहीरक्षन्सकृद्वे
न्केशवार्चनं ॥ ६७ ॥ उत्पाद्यपुत्रान्पितृर्थंध्यानंत्यक्त्वाकलेवरे ॥ ध्यायन्वैकेवलंब्रह्मप्राप्तवा
न्वैष्णवंपदं ॥ ६८ ॥ अजंविशोकंविमलंविशुद्धंशांतंसदानंदचिदात्मकंतत् ॥ विहायसंसारमनं
तदुःखंजगामतद्विष्णुपदंहिराजन् ॥ ६९ ॥ इतिश्रीनरसिंहपुराणेइक्ष्वाकुचरितेषड्विंशतितमो
ध्यायः ॥ श्रीसूतउवाच ॥ इक्ष्वाकोर्दिकुक्षिर्नामपुत्रःसतुसिद्धेपितरिमहर्षिभिरभिषिक्तोधर्मेण
पृथ्वीमपालयत्विमानस्थमनंतभोगशायिनमच्युतंआराध्ययागैरपिदेवानिष्ट्वास्वपुत्रंराज्येसु
बाहुमभिषिच्यदिवमारुरोहसुबाहोर्भ्राजमानःसतुसप्तद्वीपांपृथ्वींधर्मेणपालयित्वाभक्तिंप
रांनारायणेपितामहवत्कृत्वाकनुलिन्नूरिदृष्टणेःयज्ञेश्वरंनिकामेनमनसेष्ट्वानिरंजनंनिर्विक
ल्पंपरंज्योतिरमृताक्षरंपरमात्मारूपंध्यात्वाहरिमनंतंचपरंआराध्यस्वर्गलोकंगतः ॥ अस्यरत्ना
श्वस्यमांधातापुत्रोभवत् ॥ सचाभिषिक्तोमहर्षिभिःनिसर्गाद्देवविष्णुभक्तोइनंतशायनमच्युतंभ

आराध्य यागैश्च विविधैरिक्ष्वाकुः स महापवनी पृथिवीं परिपाल्य दिवं गतः॥ तस्यैव वंशे को गीयते या
वत्सूर्य उदेति यावच्च प्रतितिष्ठति सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते॥ तस्य पुरुकुत्सो
भवत् येन देवा ब्राह्मणाश्च यागदानैः संतुष्टाः॥ पुरुकुत्सात् दृषद्दो दृषद्दात् अभिशंभुः॥ अभिशंभोर्दा
रुणः॥ दारुणात्सगरः सगराद्धर्यश्च॥ हर्यश्वाद्धारीतो हारीताद्रोहिताश्वः॥ रोहिताश्वादंशुमान् अं
शुमतो भगीरथः॥ येन महता तपसा पुरा दिवो गंगा अशेषकल्मषनाशनी चतुर्विधपुरुषार्थदायनी
भुवमानीता॥ अस्थिशर्करीभूताः कपिलमहर्षिनिर्दग्धास्तद्गुरवः सागराख्याः॥ गंगातोयसंस्पर्शाद्दि
वमारोपिताः॥ भगीरथात्सौदासः॥ सौदासात्सत्रवः॥ सत्रसवादनरण्यः॥ अनरण्याद्दीर्घबाहुः॥ दी
र्घबाहोरजः॥ अजाद्दशरथः॥ तस्य गृहे रावणविनाशार्थं साक्षान्नारायणोऽवतीर्णो रामः॥ स तु पितृव
चनात् भ्रातृभार्यासहितो दंडकारण्यं प्राप्य वने रावणापहृतभार्यो भ्रात्रा सह दुःखितो ह्यनेककी
टिवानरनायकसुग्रीवसहायो महोदधौ सेतुं निबध्य तैर्गत्वा लंकां रावणं देवकंटकं सबांधवं हत्वा

सीतामादाय पुनरयोध्यां प्राप्य भरताभिषिक्तो विभीषणाय लंकाराज्यं विमानं च दत्वा तं प्रेषयामास
॥ स तु परमेश्वरो विमानस्थो विभीषणेन नीयमानो लंकायामपि रामस्तपुण्यं विष्णुमिच्छन् पुष्करि
णीं तेन स्थापितः॥ तान्निरीक्ष्य तत्रैव महाहिभोगे भगवान् शेते॥ सोऽपि विभीषणस्तद्विमानं नेतु
मसमर्थः॥ तद्वचनात्स्वां पुरीं जगाम नारायणसंनिधानात्॥ महद्देवस्थं वैष्णवमद्यापि दृश्यते
रामाल्लवो लवात्पद्मः पद्मादृतुपर्णः॥ ऋतुपर्णादस्त्रपाणिः॥ अस्त्रपाणेः शुद्धोदनः॥ शुद्धोदनाद्बु
धः॥ बुधाद्वंशो निवर्तते॥ एते महीपाला रविवंशके तव प्राधान्यतः कथिताः॥ महाबलाः पुरात
नैर्ये वसुधा प्रपालिताः॥ यज्वक्रियादिभिश्च दिवौकसैर्नृपैः॥ इति श्रीनरसिंहपुराणे सूर्य
वंशानुचरिते सप्तविंशतितमोऽध्यायः॥ २७॥ अथ सोमवंशोद्भवानां राज्ञां संक्षेपेण चरित
मुच्यते॥ आदौ तावत् समस्तत्रैलोक्यकंदो भूत्वा एकार्णवे महांभसि नागभोगशायने॥ ऋग्मयो
यजुर्मयः साममयोऽथर्वमयो भगवान्नारायणो योगनिद्रां प्राप॥ तस्य सुप्तस्य नाभौ महापद्मम

न०पु० जायत तस्मिन् पद्मे चतुर्मुखो ब्रह्माभवत्। तस्य ब्रह्मणो मानसः पुत्रोऽत्रिरभवत्। अत्रेरनुसूयायां
४८ सोमः स तु प्रियायां ज्येष्ठायां विशेषस्नेहात् प्रसज्यमानो रोहिण्यां बुधं पुत्रमुत्पादयामास। बुधोऽपि सर्व
शास्त्रज्ञः प्रतिष्ठाने पुरेऽवसत्। इलायां पुरूरवसं पुत्रमुत्पादयामास तस्यातिशयरूपान्वितस्य
स्वर्गभोगान्विहाय उर्वशी बहुकालं भार्या बभूव पुरूरवसः उर्वश्यामायुः। पुत्रो जज्ञे। स तु राज्यं
धर्मतः कृत्वा दिवमारुरोह। आयोः रूपवत्यां नहुषः। येनेन्द्रत्वं प्राप्तं नहुषस्यापि पितृमत्यां
ययातिः। यस्य वंशजा वृष्णयः। ययातेः शर्मिष्ठायां पूरुरभवत्। पूरोर्वंशदायां संयाति
ः पुत्रोऽभवत्। यस्य पृथिव्यां संपन्नाः सर्वे कामाः। संयातेर्भानुदत्तायां सार्वभौमः। स
तु सर्वां पृथिवीं धर्मेण परिपाल्य नरसिंहं भगवन्तमाराध्य सिद्धिमाप। तस्य सार्वभौम राम०
वैदेह्यां भोजः। यस्य वंशे पुरा देवासुरसंग्रामे विष्णुचक्रहतः कालनेमिः कंसोऽभव ४९
त् अपि वंशजेन वासुदेवेन घातितो निधनं गतः। तस्य भोजस्य कलिंगायां दुःष्यंतस्तस्य

स तु नरसिंहं भगवन्तमाराध्य तत्प्रसादान्निःकंटकं राज्यं धर्मेण कृत्वा दिवं प्राप्तवान्। दु
ष्यंतस्य शकुंतलायां भरतः। स तु धर्मेण राज्यं कुर्वन् क्रतुभिर्नरसिंहरूपिणं सर्वदेवता
मयं भगवन्तमाराध्य निष्कृताधिकारो ब्रह्मध्यानपरो वैष्णवे परे ज्योतिषि लयमवाप। भ
रतस्यानन्दायामजमीढः। स च परमवैष्णवो नरसिंहमाराध्य जातपुत्रो धर्मेण कृत
राज्यो विष्णुपुरमारुरोह। अजमीढस्य सुदेव्यां वृष्णिः पुत्रोऽभवत्। सोऽपि बहुवर्षं धर्मे
ण राज्यं कुर्वन् दुष्टनिग्रहे शिष्टपरिपालने सप्तद्वीपां वशे चक्रे। वृष्णेरुग्रसेनायां प्रत्यं
चः पुत्रो बभूव। सोऽपि धर्मेण मेदिनीं पालयन् प्रतिवत्सरं ज्योतिष्टोमं चकार निर्वाणम
पि लब्धवान्। प्रत्यंचस्य बभ्रूरुपायां शांतनुः। यस्य देवदत्तस्यंदनारोहणमशक्यं ब
भूव पुनः शक्यं च। भरद्वाज उवाच। स्यंदनारोहणे पूर्वमशक्तिः शंतनोः कथं। पश्चाच्च श
क्तिः कथं वासीत् तस्य वै तद्वदस्व नः। सूत उवाच। भरद्वाज शृणुष्वैतत् पुरावृत्तं वदामि

न॰पु॰
४९

ते सर्वपापहरं तद्धि चरितं शत्रुनोर्नृणां २ वक्ष्ये वशं तनुर्जक्तो नरसिंहतनौ पुरा नारदोक्त
विधानेन पूजयामास माधवं ३ नरसिंहस्य देवस्य निर्माल्यं तेन लंघितं राज्ञा शांतनुना
विप्र तस्मात्स्यंदनमुत्तमं ४ देवदत्तं तदा रोद्धुमशक्तस्तत्कृणाद्गतः किमियं मे गतिर्ज्ञया
सहसा वैरप्याकृतः ५ दुःखं चिंतयतस्तस्य संप्राप्तो नारदः किल किं विषण्णः स्थितो राज
न् इति दृष्टोऽथ शांतनुः ६ नारदेतन न जानामि गतिं भंगस्य कारणं इत्युक्तो नारदो ध्यात्वा
ज्ञात्वा तत्कारणं ततः शांतनुं प्राह राजानं श्रूयतामत्र कारणं अतर्वेधां पुरा राजन् आसी
त्कश्चिन्महामतिः मालाकारो रविर्नाम तेन वृंदावनं कृतं विविधानि च पुष्पाणि वनानि
मुकुठानि वै ९ मल्लिका मालती जाती वकुलादीनि सर्वशः प्राकारमुच्छ्रितं तस्य स्वेच्छया
चापि विस्तृतं १० अतं घ्रमप्रवेशं च कृत्वा चक्रे स्वकं गृहं गृहं प्रविश्य तद्द्वारं अवेन्यान्य
वसत्तम ११ एवं कृत्वा तु वसतो मालाकारस्य धीमतः पुष्पितं वचनं त्वासीत् गंधामोदि

राम॰
४९

तदिग्मुखं १२ भार्यया सह पुष्पाणि समाहृत्य दिने दिने कृत्वा मालां यथा न्यायं नरसिंहस्य नि
त्यशः १३ ददौ कांश्चिद्दिने जेत्य कांश्चिद्विक्रीय पोषणं चक्रे समाल्यजीवी च भार्यादेरात्म
नस्तह १४ अथ स्वर्गादुपागम्य इंद्रपुत्रो रथेन वै अप्सरोगणसंयुक्तो निशि पुष्पाणि संह
रेत् तदंजलिपुः सर्वाणि दिव्यं त्याकृत्य गच्छति दिने दिने कृते पुष्पे मालाकारो व्यचिंतयत्
नान्यद्वारं वनस्यास्य लंघ्य प्राकारमुन्नतं समस्तपुष्पजातस्य हरणे निशि वैनरणां १७ अ
हं शक्तिं न पश्यामि किमिदं तु परीक्षये इति संचिंत्य मेधावी जाग्रत्रात्रौ वने स्थितः १८ तथै
वागत्य पुष्पाणि संगृहीत्वा गतः पुमान् तं दृष्ट्वा दुःखितोतीव माल्यजीवी वने भवेत् १९
ततो निरंगतेस्य वै दृष्ट्वा स्तं नकेसरि तदाकांश्च शृणुयाद्धै वनिर्माल्यं मम पुत्रका १० आ
नीय क्षिप्यतां क्षिप्रं पुष्पारामसमीपतः इदं पुत्रस्य दुष्टस्य नान्यत्स्ति निवारणं २१ इति श्रुत्वा
हरेर्वाक्यं नरसिंहस्य धीमतः बुधानीय तु निर्माल्यं तथा चक्रे यथोदितं २२ सोऽथागत्य

न॰पु॰
५०

यथापूर्वं रथेनाजग्निनेतनु ॥ रथाउत्तीर्य पुष्पाणि विचित्राण्यस्तु विस्तितं ॥ २३ ॥ निर्माल्यं लंघया
मास इन्द्रस्त्वर निष्कलः ॥ ततस्तस्य तु शक्तिः स्यात् रथारोहण कर्मणि ॥ २४ ॥ उक्तः सा
रथिनाचैव रथस्यारोहणे नव ॥ नरसिंहस्य निर्माल्यं लंघना जास्ति योगतः ॥ २५ ॥ गच्छा
मि दिवमेवाहं त्वं च स्यांत्वं समाल्लदा ॥ तेनैव मुक्तो मतिमान् तमाह हरिनंदनः ॥ २६ ॥
पापस्य नोदनं तत्र केनं कर्मणा येन मे भवेद् ॥ तदुत्क्का गच्छ नाकं त्वं कर्मास्मसारये
श्रुतं ॥ २७ ॥ सारथिरुवाच रामसत्रे कुरुक्षेत्रे द्वादश इत्यनित्यशः ॥ द्विजोच्छिष्टायनय
नकृत्वा त्वं शुद्धिमेष्यति ॥ २८ ॥ इत्युक्त्वा सो गतः स्वर्गं सारथिर्देवसेवितं ॥ इन्द्रसूनुः कुरुक्षे
त्रंप्राप्तः सारस्वतं ततः ॥ २९ ॥ रामसत्रे तथा कुर्याद्द्विजोच्छिष्टस्य मार्जनं ॥ पूर्णे द्वादशये वर्षे
तमूचुः शंकिता द्विजाः ॥ ३० ॥ कस्त्वं ब्रूहि सहात्मा गानित्यमुच्छिष्टमार्जकः ॥ चतुर्भुज सेवनः
सर्वत्रेशंकानो महती भवेत् ॥ ३१ ॥ इत्युक्तः कथयित्वा तु यथावृत्तमनुक्रमं ॥ जगाम त्रि

राम॰
५०

दिवं विप्ररूपेण तत्र यो हरः ॥ ३२ ॥ तस्मात्वमपि भूपाल ब्राह्मणोच्छिष्टमादरात् ॥ मार्जनं कुरु रामस्य
सत्रे द्वादश वार्षिकं ॥ ३३ ॥ ब्राह्मणेभ्यः परं नास्ति सर्वपापहरं परं ॥ एवं कृते देवं चक्रस्य रथारोहणे
गतिः ॥ भविष्यति महीपाल शापश्चित्ते कृते तव ॥ अतऊर्ध्वं च निर्माल्यं मा तु त्वं लंघय महामते
नरसिंहस्य देवस्य तथान्येषां दिवौकसां ॥ इत्युक्तः शंतनुः स्तेन ब्राह्मणोच्छिष्टमार्जनं ॥ ३६ ॥
कृतवान् द्वादशाब्दं स्तु अरुरोह रथं च तं ॥ एवं पूर्वमशक्तिः स्यात् रथारोहे महीक्षितः ॥ ३७ ॥ पश्चा
त्स्यैव विधेः शक्तिरेवमनापत ॥ एवं ते कथितो विप्र दोषो निर्माल्यलंघने ॥ ३८ ॥ पुण्यं तथा द्विजा
नां तु चोच्छिष्टमार्जने ॥ तस्मादि दिनौ जोच्छिष्टमिह यमार्ज येत् श्रुचिर्नरः ॥ यः सुसमाहि
तात्मा सपापबंधं प्रविहाय भुंक्ते गवां प्रदानस्य फलं हि विनिश्चितः ॥ ३९ ॥ इति श्री नरसिंहपु
राणे शांतनुचरितं नामाष्टाविंशतितमोध्यायः ॥ श्रीसूत उवाच ॥ शांतनोयोजि तनयं धाया
विचित्रवार्यः स तु हस्तिनापुरे स्थित्वा प्रजाः स्वधर्मेण पालयन् देवांश्च यागैः पितॄंश्च श्राद्धैः

ना०पु० ५१ संतर्प्यनानपुत्रो दिविमारुरोह ॥ विचित्रवीर्यस्यांबालिकायां पांडुः पुत्रो जज्ञे ॥ सोपि राज्यं धर्मतः कृ
त्वा मृगशापाच्छरीरं विहाय देवलोकमवाप ॥ तस्य पांडोः कुंत्यामर्जुनः ॥ स तु महता तपसा संक
रं तोषयित्वा पाशुपतमस्त्रमवाप्य त्रिविष्टपाधिपतेः ॥ शत्रून्निवातकवचान्दानवान्हत्वा
खांडववनमग्नेर्यथारुचि निवेद्य त्रिदशाधिपतेर्दिव्यान्वराँल्लब्ध्वापि सुयोधनेन हृतराज्यो धर्मभ्रा
मनकुलसहदेवद्रौपदीसहितो विराटनगरे ज्ञातवासं चरित्वा गोग्रहे च भीष्मद्रोणकृपदुर्यो
धनकर्णादीन्जित्वा समस्तगोमंडलं निवर्तयित्वा भ्रातृभिः सह विराटराजकृतपूजो वासुदे
वसहितः कुरुक्षेत्रे धार्त्तराष्ट्रैर्बहुबलैः ॥ युद्धं कुर्वन्भीष्मद्रोणकृपशल्यकर्णादिभिः शूरैः पराक्र
मैः क्षत्रियैर्नानादिशागतैरनेकैरपि राजपुत्रैः सह दुर्योधनादीन्धार्त्तराष्ट्रान्हत्वा स्वरा
ज्यं प्राप्य धर्मेण राज्यं परिपाल्य भ्रातृभिः सह मुदितो दिवमारुरोह ॥ अर्जुनस्य सुभद्रायामभि
मन्युः येन भारतयुद्धे चक्रव्यूहं प्रतिपातः ॥ प्रविश्यानेकान्हत्वा जो निधनं प्रापितः ॥ अ
राम० ५१

भिमन्योरुत्तरायां परीक्षितः ॥ सोप्यभिषिक्तो यनं गत्वा धर्मपुत्रेण राज्यं कृत्वा राजपुत्रो नाकं संप्रा
प्य रेमे ॥ परीक्षितान्मातृवत्यां जनमेजयः ॥ येन बृहत्तापनुत्यर्थं महाभारतं व्यासशिष्यात् वै
शंपायनात् आद्यंतं श्रुतं ॥ राज्यं च धर्मतः कृत्वा दिवमारुरोह ॥ जनमेजयस्य पुष्पवत्यां शताना
कः ॥ स तु धर्मेण राज्यं कुर्वन्संसारदुःखाद्विरक्तः ॥ शौनकोपदेशेन क्रियायोगेन सकललोक
नाथं विष्णुमाराध्य निःकामो वैष्णवं पदमवाप ॥ तस्य शतानीकस्य फलवत्यां सहस्रानीकः ॥ स तु
बाल एवाभिषिक्तो नरसिंहे संततभक्तिमानभवत् तस्य चरितमुपरिष्टाद्वक्ष्यति ॥ सहस्रानीक
स्य मृगवत्यामुदयनः ॥ सोपि राज्यं कृत्वा धर्मतो नारायणमाराध्य तत्पुरमवाप ॥ उदयनस्य वास
वदत्तायां नरवाहनः ॥ स तु यथान्यायं राज्यं कृत्वा दिवमवाप ॥ नरवाहनस्याश्वमेधदत्तायां क्षे
मकः ॥ स च राज्यस्थः प्रजाः परिपाल्य म्लेच्छाभिभूते जगति ज्ञानबलात् कलापग्राममाश्रितः ॥
यः श्रद्धधानः पठते ॥ शृणोति वा हृष्टरोमकः चरितं महात्मनां ॥ स संततिं प्राप्य विशुद्धकर्मकृ

त्रिदिवं समासाद्य वसेच्चिरं सुखी ॥ इति श्रीनरसिंहपुराणे वंशानुचरितं समाप्तं ॥ श्रीसूत उ
वाच ॥ अतः परं प्रवक्ष्यामि भूगोलं द्विजसत्तम ॥ संक्षेपात्पर्वताकीर्णं नदीभिश्च समं ततः ॥ १
जंबूप्लक्षशाल्मलकुशक्रौंचशाकपुष्करसंज्ञाः सप्तद्वीपाः ॥ लक्षयोजनप्रमाणं जंबूद्वीपात्
उत्तरोत्तरद्विगुणाः ॥ लवणेक्षुसुरासर्पिर्दधिदुग्धस्वच्छोदकसंज्ञैः परस्परद्विगुणैः सप्तसमुद्रै
र्वलयाकारैस्ते द्वीपाः परिधिष्ठिताः ॥ योसौ मनुपुत्रः प्रियव्रतो नाम सप्तद्वीपाधिपतिर्बभूव
तस्याग्नीध्रादयो दश पुत्रा बभूवुः ॥ त्रयः प्रव्रजिताः शिष्टानां सप्तानां सप्तद्वीपाः पित्रा दत्ताः
॥ तत्र जंबूद्वीपाधिपतेरग्नीध्रस्य नवपुत्रा जाताः ॥ नाभिः किंपुरुषश्चैव हरिवर्ष इलावृतः
रम्यो हिरण्मयश्चैव कुरुर्भद्राश्वकेतुमान् ॥ नववर्षाः विभज्य पुत्रेभ्यः पित्रा दत्त्वा वनं प्रविशता
अग्निध्राय हिमाह्वयं ॥ यस्याधिपतेर्नाभेः ऋषभः पुत्रो बभूव ॥ ऋषभाद्भरतो भरतेन चिर
कालं धर्मेण पालितत्वादिदं भारतं वर्षमभूत् ॥ इलावृतस्य मध्ये मेरुः सुवर्णमयश्चतुरशी

तिसहस्राणि योजनानां तस्योच्छ्रयः ॥ षोडशसहस्राण्यधस्तादवगाढः । तद्द्विगुणो मूर्ध्नि विस्तारः ॥ तन्मध्ये ब्र
ह्मणः पुरी ऐशान्यामिंद्रस्यामरावती ॥ आग्नेय्यामग्नेस्तेजोवती याम्यां यमस्य संयमनी नैरृत्यां निरृते
र्भयंकरी वारुण्यां वरुणस्य विश्वावती ॥ वायव्यां वायोर्गंधवती ॥ उदीच्यां सोमस्य विभावतीति नव
वर्षान्वितं ॥ जंबूद्वीपं पुण्यपर्वतैः पुण्यनदीभिरन्वितं ॥ किंपुरुषादीन्यष्ट वर्षाणि पुण्यवतां भो
गस्थानानि साक्षाद्भारतं वर्षमेकं कर्मभूमिश्चातुर्वर्ण्ययुतं ॥ तत्रैव कर्मभिः स्वर्गं कृतैः प्राप्स्यंति
मानवाः ॥ मुक्तिं चात्रैव निःकामैः प्राप्यते ज्ञानकर्मभिः ॥ अधोगतिमितो विप्र प्रयांति पापका
रिणः ये पापकारिणस्तान्विद्धि पातालतले नरककोटिसमन्वितान् ॥ अथ सप्त कुलपर्वताः
कथ्यंते ॥ महेंद्रो मलय ॥ शुक्तिमान ॥ ऋक्षमूकं ॥ सह्यपर्वतो विंध्यं पारियात्र ॥ इत्येते भारते कुलपर्व
ताः ॥ नर्मदा सुरसा ऋषिकुल्या भीमरथी कृष्णा वेणा चंद्रभागा ताम्रपर्णी इत्येताः सप्त नद्यः ॥ गंगा य
मुना गोदावरी तुंगभद्रा कावेरी इत्येता महानद्यः ॥ पापहराः ॥ जंबूनाम्ना च रिविख्यातं जंबूद्वी

न॰पु॰
~~५४~~
५३

पमिदं श्रुतं ॥ लक्षयोजनविस्तीर्णमिदं श्रेष्ठं तु भारतं ॥ अङ्गद्वीपादिपुण्या जनपदाः येस्वधर्मेण नारसिं
हं यजंति ते तत्र निवसंति अधिकारक्षयात् मुक्तिं च प्राप्नुवंति ॥ जंबाद्याः स्वादूकांताः सप्तप
योधयः ॥ ततः महाहिरण्मयी भूमिः ॥ ततो लोकालोकपर्वतः ॥ एष भूर्लोकः ॥ अस्योपरि
अंतरिक्षलोकः ॥ खेचराणां रम्यस्तदूर्ध्वं स्वर्ग्यलोकः ॥ स्वर्गस्थानं महापुण्यं प्रोच्यमानं नि
बोध मे ॥ भारते कृतपुण्यानां देवानामपि चालयं मध्ये पृथिव्यामद्रीन्द्रो भास्वान् मेरुर्हिरण्म
यः ॥ योजनानां सहस्राणि चतुराशीतिमुच्छ्रितः ॥ प्रविष्टः षोडशाधस्तात्तस्ताद्धरण्यां
धरणीधरः ॥ तावत्प्रमाणा पृथिवी पर्वतस्य समंततः ॥ तस्य शृंगत्रयं मूर्ध्नि स्वर्गो यत्र प्रति
ष्ठितः नानाद्रुमलताकीर्णं नानापुष्पोपशोभितं ॥ मध्यमं पश्चिमं पूर्वं मेरोः शृंगाणि त्री राम॰ ५३
णि वै ॥ मध्यमं स्फाटिकं शृंगं वैडूर्यमणिकामयं ॥ इन्द्रनीलमयं पूर्वं माणिक्यं पश्चिमं स्मृ
तं ॥ योजनानां सहस्राणि नियुतानि चतुर्दश ॥ उच्छ्रितं मध्यमं शृंगं स्वर्गो यत्र त्रिविष्टपः ॥ अ

अप्सरांतरितं शृंगं मूर्ध्नि छत्राकृतिस्थितं ॥ पूर्वमुत्तरशृंगाणामंतरं मध्यमस्य च ॥ त्रिविष्टपो
नाकपृष्ठः अप्सराः सेतिनिर्वृताः ॥ आनंदो प्रमोदश्च स्वर्गशृंगे तु मध्यमे ॥ श्वेतश्च पौष्टिक
श्चैव उपशोभनमन्मथो ॥ आक्रान्दः स्वर्गराजा वै स्वर्गशृंगे तु पश्चिमे ॥ निर्ममो निरहंकार
ः सौभाग्यश्चातिनिर्मलः ॥ स्वर्गाश्चैते द्विजश्रेष्ठ पूर्वशृंगे समाश्रिताः ॥ एकविंशति नेस्वर्गा
निवेशमेरुमूर्द्धनि ॥ अहिंसादानकर्तारो यज्ञानां तपसां तथा ॥ ते तेषु निवसंति स्म जना
ः क्रोधविवर्जिताः ॥ जलप्रवेशो चानंदं प्रमोदं वह्निसाहसे ॥ भृगुप्रपाते सौख्यं च रणे चैवास्य
निर्मलः ॥ अनाशके तु सन्यासे मृतो गच्छेत्त्रिविष्टपं ॥ क्रतुयाजी नाकपृष्टं अग्निहोमे हावह्नि
होत्री च निर्वृतिं ॥ तडागकूपकर्त्ता च लभते पौष्टिकं द्विज ॥ सुवर्णदायी सौभाग्यं लभेत्स्वर्गं तपः
शीतकाले महावह्निं प्रज्वालयति यो नरः ॥ सर्वसत्वहितार्थाय स्वर्गं सो सरसं लभेत् ॥ हिरण्यगो
प्रदानेन निरहंकारमाप्नुयात् ॥ भूमिदानेन शुद्धेन लभते शांतिकं पदं ॥ रौप्यदानेन स्वयं

न॰पु॰ ५४

तुनिर्मलंजन्मतेनरः ॥ अश्वदानेनपुण्याहंकन्यादानेनमंगलं ॥ द्विजेभ्यस्तर्पणंकृत्वादत्वावस्त्रा
णिचाक्षितः ॥ श्वेतंतुलभतेस्वर्गंयत्रगत्वानशोचते ॥ कपिलागोप्रदानेनपरमार्थेमहीयते
गोवृषस्यप्रदानेनस्वर्गमध्यमवाप्नुयात् ॥ माघमासेसरित्स्नायीतिलधेनुप्रदस्तथा ॥ छ
त्रोपानहदातावस्वर्गंयात्सुयशोजनं ॥ देवतायतनंकृत्वाद्विजशुश्रूषकस्तथा ॥ तीर्थयात्राप
राश्चैवस्वर्गराजेमहीयते ॥ एकान्नभोजीयोमर्त्योनक्तभोजीवनित्यशः ॥ उपवासात्रिरात्राद्ये
ःशांतंस्वर्गंतुशुभंलभेत् ॥ सरित्स्नायीनितक्रोधोब्रह्मचारीदृढव्रतः ॥ निर्मलंस्वर्गमाप्नोति
यथाभूतहितेरतः ॥ विद्यादानेनमेधावीनिरहंकारमाप्नुयात् ॥ येनतैयेनहिभावेनयद्यद्दा
नंप्रयच्छति ॥ तत्स्वर्गमवाप्नोतियद्यदिच्छतिमानवः ॥ चत्वारित्वतिदानानिकन्यागौर्भूःसरस्व राम॰
ती ॥ नरकादुद्धरंत्येतजपवापनदोहनात् ॥ यस्तुसर्वाणिदानानिब्राह्मणेभ्यःप्रयच्छति ॥ सं ५४
प्राप्यननिवर्त्ततिदिवणंतमनामयं ॥ शृंगंतुपश्चिमंयत्रब्रह्मातत्रस्थितःस्वयं ॥ पूर्वशृंगेस्वयं

विष्णुःमध्येचैवशिवःस्थितः ॥ अतःपरंतुविप्रेंद्रस्वर्गाधानमिमंशृणु ॥ विमलंविपुलंशुद्धमुप
र्युपरिसंस्थितं ॥ प्रथमेतुकुमारस्तु ॥ द्वितीयेमातरःस्थिताः ॥ तृतीयेसिद्धगंधर्वैतुर्यविद्याधरा
द्विज ॥ पंचमेनागराजाचषष्ठेतुविनतासुतः ॥ सप्तमेदित्यपितरोधर्मराजस्तथाष्टमे ॥ नरमेतु
तथादक्षःआदित्योदशमेपथि ॥ भूर्लोकाच्छतसाहस्रात्ऊर्ध्वंचरतिभास्करं ॥ योजनानांसहस्रेद्वे
विष्कंभेनसमंततः ॥ त्रिगुणंपरिणाहेनसूर्यबिंबंप्रमाणतः ॥ सोमसूर्यौविनावर्षामध्याह्नेचा
र्यमायदा ॥ महेंद्रस्यामरावत्यांतदातिष्ठतिभास्करः ॥ मध्याह्नेत्वमरावत्यांयदाभवतिभास्करः
॥ तदासंयमनेयाम्येतत्रोद्यंस्तुप्रदृश्यते ॥ मेरुंप्रदक्षिणंकुर्वन्यात्येवसवितासदा ॥ ध्रुवाधारेरथे
तिष्ठन्वालिखिल्यैरभिष्टुतः ॥ नरदाजउ ॥ कोसौध्रुवःकस्यसुतःसूर्याधारोभवत्कथं ॥ विचित
कथयाशुत्वंसूतज्ञोसिमाःशठं ॥ सूतउवाच ॥ मनोःस्वायंभुवस्यासीदुत्तानचरणःसुतः ॥ त
स्यद्वितिपत्न्योर्विप्रश्चौसुनीतिसेवकवंतु ॥ सुरुच्यांशुत्तमोजज्ञेसुनीत्यांध्रुवोपरः ॥ मध्येस

त्रं नरपतेरुपविष्टस्यैकदा॥ सुनीत्या राजसेवायै नियुक्तोऽलंकृतः सुतः॥ ध्रुवो धात्रेयिकापुत्रैः स
मं विनयतत्परः॥ स गत्वोत्तानवरणं द्रोणीशं प्रणनाम ह॥ दृष्ट्वोत्तमं तदुत्संगे निविष्टं जनकस्य वै
॥ सोच्चसिंहासनस्थं च नृपतिं बालचापलात्॥ आरुरुक्षुमवेक्ष्यामं सुरुचिर्ध्रुवमब्रवीत्॥ दौर्भागे
यकिमारोढुमिदेरं कंमहीपतेः॥ बालबालिशबुद्धित्वाद्दुस्प्राप्या जठरोद्भव॥ अस्मिन् सिंहासने स्था
नुं सुकृतं धक्त्वयाकृतं॥ यदि स्यात्सुकृतं तत्किं दुर्भगोदरगोऽभवत्॥ अनेनैवानुमानेन बुध्यस्व स्वा
ल्पपुण्यतां॥ भूत्वा राजकुमारीपि नालंकुर्यान्ममोदरं॥ सुकृतिजन्मसंपन्नस्पत्ममुत्तममनुत्त
मं॥ अधिजानु धराजानेर्मानेन परिबृंहितं॥ सूत उवाच॥ मध्ये राजसभं बालस्तयेति परिभ
र्त्सितः॥ निपतन्नेत्रबाष्पांबु धैर्यात्किंचिन्न चोक्तवान्॥ उचितानुचितं किंचिन्नोचिवान् सोऽपि
पार्थिवः॥ नियन्त्रितो महिष्याश्च तस्याः सौभाग्यगौरवान्॥ विसर्जितसभालोकं शोकसंरुत्पश्चेष्टि
तैः॥ शैशवैः सदिशुर्नत्वा नृपं स्वसदनं ययौ॥ सुनीतिर्नीतिनिलयमवलोक्याथ बालकं॥ मुखल

क्ष्यैव चाज्ञासीद्ध्रुवं राज्ञापमानितं॥ अथ दृष्ट्वा सुनीतिं स रहोऽन्तःपुरवासिनीं॥ आलिंग्य दीर्घं निश्वस्य
मुक्तकंठं रुरोद ह॥ सांत्वयित्वा सुनीतिस्तं वदनं परिमार्ज्य च॥ दुकूलांचलसंपर्कैर्वीज्यतं मृदुपाणि
ना॥ पप्रच्छ तनयं माता वद नोदरकारणं॥ विद्यमानेन नृपतौ शिशो केनापमानितः॥ ध्रुव उवाच॥ सं
पृच्छे जननि त्वाहं सम्यक् शंस ममाग्रतः॥ भार्यात्वेपि च सामान्ये कथं सा सुरुचिः प्रिया॥ कथं नत्ववती
मातः प्रिया क्षितिपतेरसि॥ कथमुत्तमतां प्राप्तः उत्तमः सुरुचेः सुतः॥ कुमारत्वेपि सामान्ये कथं चाह
मनुत्तमः॥ कथं त्वमंदभाग्यासि सकुक्षिः सुरुचिः कथं॥ कथं नृपासनं योग्यमुत्तमस्य कथं न मे॥ क
थं मे सुकृतं तुच्छमुत्तमस्योत्तमस्योत्तमं कथं॥ इति श्रुत्वा वचस्तस्य सुनीतिर्नातिमदिशीः॥ किंचिदु
च्छ्वस्य शनकैः शिशुशोकोपशांतये॥ स्वभावमधुरां वाणीं वक्तुं समुपचक्रमे॥ सुनीतिरुवाच॥ अ
यि तात महाबुद्धे विशुद्धेनांतरात्मना॥ निवेदयामि ते सर्वं मावमाने मतिं कृथा॥ तया यदुक्तं त
त्सर्वं तथ्यमेव न चान्यथा॥ सा यदि महिषी राज्ञो राज्ञीनामतिवल्लभा॥ महासुकृतसंभारैरुत्त

मश्चोत्तमोदरो उवास तस्याः पुण्यधाः नृपसिंहासनोचितः । आतपत्रं च चंद्राभं शुभे चापि हि चामरे । भद्रा
सनं तथोच्चं च सिंधुराश्च महोत्कटाः । तुरंगमाश्च तुरगाः अनाधिव्याधिजीवितं । निःसपत्नं शुभं रा
ज्यं प्राप्यं विष्णुप्रसादतः । इत्याकर्ण्य सुनीत्यास्तु तन्मातुर्वाक्यमनिंदितं । सुनीतेयो ध्रुवोवाच
मातर्देव कुसुन्नरां । ध्रुव उवाच । जननि त्रिसुनीते मे शृणु वाक्यमनाकुलं । उत्तानचरणाद
न्यन्नास्तीति मतिर्मे शुचे । सिद्धार्थोस्म्यंब पद्यत्तिकश्चिद्याश्रितकामधुक् । अद्यैव सकला रा
ध्यं तमाराध्य जगत्पतिं । तत्तदासादितं विद्धि पदमन्यैर्दुरासदं । एकमेव हि साराज्यं मातर्मे क
र्तुमर्हसि । अनुज्ञां देहि मे विष्णुं यथाशेचाराधयाम्यहं । सुनीतिरुवाच । अनुज्ञातं नशक्नोमि
त्वां सुत्तानशयांगज । सप्ताष्टवर्षदेशीयः क्रीडायोग्योसि पुत्रक । त्वदेकतनया तात त्वदाधारै
कजीविता । लब्धोसि कतिभिः कष्टैः इष्टाः संप्राप्य देवताः । यदा यदा बहिर्यासि रंतुं चिंत्रिच
तुरं पदं । उदा तदा मम प्राणा तात त्वामुपगच्छति । ध्रुव उवाच । अद्य यावत् पिता माता त्वं

चोत्तानपदो विष्णुः तुः । अद्य प्रभृति मे माता पिता विष्णुर्न संशयः । सुनीतिरुवाच । विष्णोरारा
धने नाहं वारये त्वां सुपुत्रक । जिह्वा मे शतधा याति यदि त्वां वारयामि भो । इत्यनुज्ञामिव प्राप्य
जननीचरणांबुजौ । परिक्रम्य प्रणम्याप तपसे स ध्रुवो ययौ । तयापि धैर्यसूत्रेण सुनीत्याप
रिगुंफ्पच । नेत्रेंदीवरजामाला ध्रुवस्योपायनीकृता । मात्रा तन्मार्गरक्षार्थं तदा तद्दनुगीतिक्ल
ताः । परैरचार्यप्रसराः स्वाशीर्वादाः परं शतं । सर्वत्राव तु ते पुत्र शंखचक्रगदाधरः । नारा
यणो जगद्व्यापी प्रभुः कारुण्यवारिधिः । सूत उवाच । स्वसौधात्स विनिर्गत्य बालो बालपरा
क्रमः । अनुकूलेन मरुता दर्शिताविराहनं । समाद्दैवतोमित्रः केवलं राजवर्त्मनि । नवेदकानना
धानं कृणोद् ध्यौ नृपात्मजः । पुरोपवनमासाद्य चिंतयामास सोर्भकः । किं करोमि क्व गच्छामि को मे
साहाय्यदो भवेत् । एवमुन्मील्य नयने यावत्पश्यति स ध्रुवः । तावद्ददर्श सप्तर्षीन् अतर्कितत
गतीन् वने । अपदृष्ट्वा स सप्तर्षीन् सर्षेस सप्तसप्ततितेजसः । आगपस्त्रे रिवाकृष्णोपैला प्रमुमोदहः

ना

ना॰पु॰ तिलकांकितसद्भाजान् कुशोपगृहितांगुलीन् ॥ कृष्णाजिनोपविष्टांश्च ब्रह्मसूत्रैरलंकृतान् ॥ उपग
५७ म्य विनम्रांसः प्रबद्धकरसंपुटः ॥ ध्रुवो विज्ञापयांचक्रे प्रणम्य ललितं वचः ॥ ध्रुव उवाच ॥ अवे
त मां मुनिवराः सुनीत्युदरसंभवं ॥ उत्तानपादतनयं ध्रुवं निर्विण्णमानसं ॥ ते दृष्ट्वोर्जस्वलं बालं
स्वभावमधुराकृतिं ॥ अनर्घ्य नयने पुष्पं मृदु गंभीरभाषिणं ॥ उपोपवेश्य पशिशुकं प्रोचुर्वै विस्मि
तान्तरां ॥ न वाद्यापि न जानीमो वत्स निर्वेदकारणं ॥ अनवाप्ताभिलाषाणां वैराग्यं जायते नृणां स
प्तद्वीपपते राज्ञः कुमारत्वं तथा कथं ॥ किमस्माभिरहो कार्यं कस्तवास्ति मनोरथः ॥ ध्रुव उवाच ॥
मुनयो मम यो बंधुरुत्तमश्चोत्तमोत्तमः ॥ पित्रा प्रदत्तं तस्यास्तु तद्भद्रासनमुत्तमं ॥ भवद्भ्यस्तद्धि
साहाय्यं एतदिच्छामि सुव्रताः ॥ अनन्यनृपभुक्तं यत्तयदन्येभ्यः समुच्छ्रितं ॥ इंद्रादिदुरवापं यत्कथं राम॰
लभ्येत तत्पदं ॥ इति श्रुत्वा वचस्तस्य मुनयो बालकस्य तु ॥ यथार्थमेव प्रत्यूचुर्मरीच्याद्यास्तदा ध्रु ५७
वं ॥ मरीचिरुवाच ॥ अनास्वादितगोविंदपदांबुजरजोरसः ॥ मनोरथपथातीतं स्फीतं नाकलये

कलं ॥ अत्रिरुवाच ॥ अनास्वादितगोविंदपदांबुजरजोरसः मनो ॥ अनर्चिताच्युतपदः पदमासा
द्यते कथं ॥ इंद्रादिदुरवापं यन्मानवैर्दुरासदं ॥ अंगिरा उवाच ॥ नहि दूरे पदं तस्य सर्वासां संपदामि
ह ॥ कमलाकांतकांताङ्घ्रिकमलं यः सुशीलयेत् ॥ पुलस्त्य उवाच ॥ यस्य स्मरणमात्रेण महापातकसं
ततिः ॥ परमां तकमाप्नोति स विष्णुः सर्वदो ध्रुवः ॥ पुलह उवाच ॥ यदाहुः परमं ब्रह्म प्रधानपुरुषात्प
रं ॥ यन्मायया कृतं सर्वं विष्णुः कामितोर्थदः ॥ क्रतुरुवाच ॥ यो यज्ञपुरुषो विष्णुः वेदवेद्यो जनार्द
नः ॥ अंतरात्मास्य जगतः संतुष्टः किं न यच्छति ॥ वसिष्ठ उवाच ॥ यद्भ्रूनर्तनवर्तिन्यः सिद्धयोष्टौ नृपा
त्मजः ॥ तमाराध्य हृषीकेशं चतुर्वर्गो न दूरतः ॥ ध्रुव उ ॥ सत्यमुक्तं द्विजेंद्रा वो विष्णोराराधनं प्रति
॥ कथं स भगवानिज्यः सविधिश्चोपदिश्यतां ॥ प्रभूतरोजवेध्यो वै दुराराध्यतमो भवेत् ॥ बालोहं रा
जपुत्रोहं दुःखं नैव मया कृतं ॥ मुनय ऊचुः ॥ तिष्ठता गच्छता वापि स्वपता जाग्रता तथा ॥ शयानेनो
पविष्टेन जप्यो नारायणः सदा ॥ पुत्रान् कलत्रं मित्राणि राज्यं स्वर्गापवर्गकं ॥ वासुदेवं जपन्मर्त्यः सर्वं

प्राप्नोत्यसंशयं द्वादशाक्षरमंत्रउपासितः मनुनाराज्यकामेन वैष्णवेन नृपात्मज त्वमप्येतेन मंत्रे
णवासुदेवपरोभव यथाभिलषितांसिद्धिं प्राप्स्यसि सत्तम इत्युक्त्वांतर्हिताः सर्वे महात्मानो
मुनीश्वराः वासुदेवमनाज्ञ्या ध्रुवोपि तपसे ययौ सूत उ ध्रुवः सर्वार्थदं मंत्रं जपन्मधुवनेत
पः सचक्रे यमुनातीरे मुनिदिष्टेन वर्त्मना श्रद्धान्वितेन जपता च तपः प्रस्नावात्साक्षाद्दिवाज्ब
नमनो ददृशे हृदीशः दिव्याकृतिः सपदि नेन ततः स एव हर्षात्पुनः प्रजजाप नृपात्मजस्ततः दु
न्नर्षवर्षघनवातमहोष्णतादिश्शरीरदुःखकुलमस्य न किंचनाभूत् मग्ने मनस्यनुपमेयसुखां
बुराशौ राज्ञः शिशुर्न न विवेद शरीरवार्तां विघ्नाश्चतस्य किल जज्ञांकितदेवसंघाः बालस्य तीव्रतपसो
विफलाबभूवुः श्रीतातपादरिवविष्णुमयं मुनिर्हि यादेशिकानरवधूधर्षयितुं समंते अथ पन्नकजन
नप्रियः प्रभुः शिशुनाध्यानबलेन तोषितः वरदः पतगेंद्रवाहनो हरिरागात्स्वयं जनं तमाश्रि
तं मणिपिंडरमौलिराजितो विलसद्रत्नमहाघनछविः स बभावुदयाद्रिमस्तकात् ध्वन्तबा

लार्क इवासिताचलः सराजसूनुं तपसि स्थितं तं ध्रुवं ध्रुवस्निग्धदृगित्युवाच हंतांश्रुसंज्ञैरमितप्र
वाहैः प्रक्षालयन्नेणुमिवास्यगात्रे वरं वरं वत्स वृणीष्व यस्ते मनोगतस्त्वत्तपसास्मि तुष्टः ध्यानेन ते
चेंद्रियनिग्रहेण मनोनिरोधेन च दुःकरेण श्रुत्वेत्थं चरस्तस्य कंजगंभीरमुन्मीलितास्यः सहसा ददर्श
स्वचित्तसमानं त्वयमेव मूर्तं पुरःस्थितं ब्रह्मचतुर्भुजं सः दृष्ट्वारुणं राजसुतः सुपूज्यं पुत्रस्त्वयीशं
किमिह ब्रवामि किं वा करोमीति ससंभ्रमः सन् न चाब्रवीत्किंचन नो चकार गीर्हर्षाश्रुपूर्णपुलकांचि
तांगः त्रिलोकनाथेति वदन्नघोच्चैः दंडप्रणाममाय पपात भूमौ प्रवेपमानस्तु हरेः पुरः सद्दि दंड
वत्प्रणिपत्याप परितः परिलुंठच रुरोद हर्षेण चिरं दृष्ट्वा तं जगतो गुरुं नारदेन सनंदेन सनक
न च संस्तुतः अन्यैः सनत्कुमाराद्यैः योगिभिर्योगिनां वरः कारुण्यं वाष्पनीराईपुंडरीकविलो
चनं ध्रुवमुत्थापयांचक्रे चक्राधत्वा करेण तं हरिस्तु परिपस्पर्श तदंगं धूलिधूसरं कराभ्यां
कोमलाभ्यां सपरिष्वज्याह तं हरिः वरं वरय वत्सो बाल यत्ते मनसि वर्तते तदाशिशामि न संदे

न०पु० ५९

होष्मी नारेयं विद्यते तव ॥ ततो वरं राजशिष्कुर्यया चे विष्णुं वरं ते रत्न वशक्तिमेव ॥ तं मूर्न्निविज्ञान नि
जेनदेवः परस्पर्शशंखेन मुखे मजेन ॥ अथ सुरमुनिर्दत्तज्ञानचंद्रेण सम्यक् विमलितमिव चित्तं मूर्त्ति
व ध्रुवसंसात्रिभुवनगुरुशंखस्पर्शजज्ञानज्ञानावुदयतितितरांतसाधुतुष्टाव रूष्टः ॥ ध्रुव उवा
च ॥ अखिलमुनिजननिवहनमितचरण ॥ खरकदनकरचपलचरित ॥ देवाराधितपादजल ॥ सज
लधरश्याम ॥ श्रामितसौभपतिसाल्वधाम ॥ अभिरामरामातिविनयकृतनवरासरसापहृतेंद्रियसु
ररमणीविहितांतःकरणनंद ॥ अनादिनिधन ॥ अधननिजद्विजमित्रोद्धरणधीर ॥ अवधीरि
तसुरनाथनाषितविपक्षपक्षरुक्मराजविजयवेग्गपटतसमंतकापमार्जितनिजायवाद्दुरि
त ॥ कृतत्रैलोक्यसार द्वारकावास लिरतस्वतीरितमधुरवेणुवादनश्रवणमत्तकटितातीद्रियज्ञा राम० ५९
न ॥ यमुनातटचर ॥ द्विजधेनुमगणैस्वपक्षनिजनिजाहार ॥ संसारदुस्तरपारावारसमुत्तारणांघ्रि
पोत ॥ स्वप्नतापानलहलकाजयचन ॥ वनमालाधरवरमणिकुंडलालंकृतश्रवण ॥ नानाप्रसि

द्धाभिधान ॥ निगमविबुधमुनिजनवचनमनोगोचर ॥ कनककपिशकौशेयवनेः ॥ नागवन् ॥ ग
रुणपदकौस्तुभविभूषितोरस्थल ॥ स्वदृषिताक्रूरनिजजननगोपगोकुलपालक ॥ चतुर्भुजशंख
चक्रगदापद्मतुलसीनवदलदामहारकेयूरकटकमुकुटाद्यलंकृतंसुनंदनादिभागवतोपासितवि
श्वरूप ॥ पुराणपुरुषोत्तम ॥ उत्तमश्लोक ॥ लोकावास ॥ वासुदेव ॥ श्रीदेवकीजठरसंभूत ॥ भूतपति ॥
विरंचिनतचरणारविंद ॥ वृंदावनकृतकेलिगोपिकाजनश्रमापह ॥ सततसंपादितसुजनकाम
॥ ॐ दनिजशंखधरमिंदुनिभवक्त्रं ॥ सुंदरसुदर्शनमुदारतरहासं ॥ विद्रुजनवंदितमिदं तेरूपम
तिरूपमखिलेश्वरततोस्मि ॥ स्वानाभिकामातपसि स्थितोहं त्वां दृष्ट्वान्साधुमुनीन्द्रगुह्यं ॥ का
चं विचिन्वन्निवदिव्यरत्नं स्वामिन्कृतार्थोस्मि वरान्नयाचे ॥ पूर्वदृष्टे तवपादपद्मे दृष्टौ दृढं तापन
हित्यजाति ॥ कामान्नयाचेसहिकोपिमूढो यः कल्पवृक्षात्तुषमात्रमिच्छेत् ॥ त्वां मोक्षबीजं शरणं प्र
पन्नः शक्कोमि जोक्तुं नबहिःसुखानि ॥ स्वाकरे देव सतिस्वनाथे विभूषणं काचमयं नयुक्तं ॥ अतो

नयाचेवरमार्गेनिजध्वादिव्यज्ञानं गदं तं भगवान् जगाद ॥ आराध्य विष्णुं किमनेन लब्धं ५
मात्रं ज्ञ नैष्ठिकं ममसाधुवादः ॥ स्थानं परं शाश्वतं इति यन्मत्तं तं ददे कालेन मां शाश्वसिद्धत्वा वा ॥
आधारभूतः सकलग्रहाणां कल्पद्रुमः सर्वजनेश्च वंद्यः ॥ मम प्रसादात्तव साच माता मत्सां
तिकेयातु सुनीतिनीतिरीर्या ॥ तं सोधयित्वेति वरैर्मुकुंदः स्वमालयं दृश्यवपुर्जगाम ॥ त्यक्त्वा
स्काग्नाने दिव्यवपुः स्वचक्रं मुहुः परात्परसमीरसाणः ॥ तावच्च सघः सुरसिद्धसंघः श्री विष्णु त
नुं कं समागमंतं ॥ हृष्टा ह्याप वर्षन् सुरपुष्पवृष्टिं तुष्टाव हर्षान्ध्रुवमव्ययं च श्रियालिमस्मात्
वसुनीतिस्तनुर्विमाते देवैरपि वंद्यमानः ॥ मोयं नराणां कीर्त्तनद्दर्शनात्तारावायुर्यशोवृद्धिय
निश्चियं च ॥ सूत उवाच ॥ इत्थं ध्रुवः प्राप पदं दुरापं हरेः प्रसादान्न च चित्रमेतत् ॥ तस्मिन्
प्रसन्ने द्विज पित्रवंशौ नौ न दुर्लभं जनके जनेषु किंचित् ॥ ७ ॥ सूर्यमंडलमाबाधानुद्दिगुणं सोममं
डलं ॥ द्विलक्षेपि बुधस्यापि स्थानं नक्षत्रमंडलात् ॥ तावत्प्रमाणभागेतु बुधस्याप्युशना ५

स्थितः ॥ अंगारकोपि शुक्रस्य तावन्मानेव्यवस्थितः ॥ द्विलक्षेपि च सेऽगोमस्य त्रिंशौ देवपुरोहितः
॥ सौरिर्द्विलक्षं सततेश्चो र्द्धं द्विजरेन्द्रयवस्थितः ॥ तस्मात्तनेश्चरात् द्वि लक्षे सप्तर्षिमंडलं ॥ सप्तर्षिमंडला
दूर्द्ध्वं एक लक्षं ध्रुवः स्थितः ॥ मेढीभूतः समस्तस्य ज्योतिश्चक्रस्य सत्तम ॥ भास्वान् तपति विप्रेंद्र अध ऊर्द्ध्व
चरश्मिभिः ॥ कालसंख्यां त्रिलोकस्य स करोति युगे युगे ॥ जनस्तपस्तथा सत्यं एतान् लोकान् द्विजोत्त
म ॥ ब्रह्मणामुनिशार्दूल विष्णुचक्रे विराजितः ॥ उदये तेद्विजश्रेष्ठ रश्मिभिस्तपते रविः ॥ अधो गतेः
श्चलोकं द्योतते शार्ध्वं शाधिभिः ॥ सर्वपापहरः सूर्यः कर्त्ता त्रिभुवनस्य च ॥ छत्रवत् प्रतिदृश्येत मंडला
न्मंडलं परं ॥ आदित्यमंडलाधस्तात् भुवर्लोकं प्रतिष्ठितं ॥ त्रैलोक्यस्येश्वरत्वं च विष्णुदत्तं शतक्रतो
ः ॥ लोकपालैः समसहितो लोकान् रक्षति धर्म्मतः ॥ वसेत् स्वर्गे महाभाग देवेंद्रः स तु कीर्त्तिमान् ॥ अ
तोधस्ताम्मुनेसप्तपातालं विद्धि सत्तमं ॥ न तत्र तपते सूर्यो नापि निशाकरः ॥ दिव्यस्वरूपमास्था
य तपंति सततं गुणाः ॥ पाताले सर्वद्विजश्रेष्ठ दीप्यमाना स्वतेजसा ॥ स्वर्लोकात्तु महर्लोकः को

दिमात्रेव्यवस्थितः ॥ ततो योजनमात्रेण द्विगुणे मंडले न तु ॥ जनलोकस्थितो विप्रपंचमो मुनिसेवितः
॥ तत्रोपरि तपोलोकश्चतुर्भिः कोटिभिः स्थितः ॥ सत्यलोकोष्टभिः कोट्यः स्वर्लोकादुपरिस्थितः ॥ स-
वे ब्रह्मात्म तिर्यग्यास्तु वनास्तु वनोपरि ब्रह्मलोकाद्विष्णुलोको द्विगुणेन व्यवस्थितः वाराहे तस्य माहा-
त्म्यं कथितं लोकचिंतकैः ॥ ततः परं द्विजश्रेष्ठ स्थितः परमपूरुषः ॥ ब्रह्मांडात्परमः साक्षात् नि-
र्लेपः पुरुषः स्थितः ॥ पश्चयाद्धो विमुच्येत तपोज्ञानसमन्वितः ॥ इति ते संस्थिति प्रोक्ता भूर्लोकस्य म-
यानघा ॥ यस्तु सम्यगिमां वेत्ति स याति परमां गतिं ॥ लोकस्य संस्थानकरो प्रमेयो विष्णुर्नृसिंहो न-
रदेव पूजितः ॥ युगे युगे विष्णुरनादिमूर्त्तिमानास्थाय विश्वं परिपाति दुष्टहा ॥ इति नरसिंहपु-
राणे भूगोलकं समाप्तं ॥ भारद्वाज उवाच ॥ सहस्रानीकस्य हरेरवतारस्य शार्ङ्गिणः ॥ सांप्रतं श्रो-
तुमिच्छामि तन्मे वद महामते ॥ सूत उवाच ॥ हंत ते कथयिष्यामि चरितं तस्य धीमतः ॥ सहस्रानी-
कस्य हरेरवतारांश्च मे शृणु ॥ सहस्रानीकोभिषिक्तो निजराज्ये द्विजोत्तमैः ॥ पालयामास धर्मेण राज्यं संस्तु

नृपात्मजः ॥ तस्य पालयतो राज्यं राजपुत्रस्य धीमतः ॥ भक्तिर्बभूव देवेशे नरसिंहे सुरोत्तमे ॥ ४ ॥ तं द्रष्टु-
मागतः साक्षात् विष्णुभक्तं भृगुः पुरा ॥ अर्घपाद्यासनै राजा तमभ्यर्च्याब्रवीदिदं ॥ पावितोहं मुनिश्रे-
ष्ठ सांप्रतं तव दर्शनात् ॥ त्वद्दर्शनं सुपुण्यानां कलौ वस्मिन् सुदुर्लभं ॥ नरसिंहं प्रतिष्ठाप्य देवदेवं
सनातनं ॥ आराधयितुमिच्छामि विधानं तन्मे वद ॥ ७ ॥ अवतारानशेषांश्च देवदेवस्य चक्रिणः ॥
श्रोतुमिच्छामि सकलान् तान् पुण्यानपि मे वद ॥ ८ ॥ भृगुरुवाच ॥ शृणु भूपालपुत्र त्वं न हि कश्चि-
त् कलौ युगे हरौ भक्तिं करोत्यत्र नरसिंहे चातिभक्तिमान् ॥ ९ ॥ स्वभावदस्य भक्तिः स्यान्नरसिंहे
सुरोत्तम ॥ तस्यारयः प्रणश्यंति कार्यसिद्धिश्च जायते ॥ १० ॥ त्वमतीव हरौ भक्तः पांडुवंशोपि स-
त्तमः ॥ तेन ते निखिलं वक्ष्ये शृणुष्वैकाग्रमानसः ॥ ११ ॥ यः कुर्यात्शोभनं वेश्म नरसिंहस्य भक्तिमा-
न् ॥ स सर्वपापनिर्मुक्तो विष्णुलोकमवाप्नुयात् ॥ १२ ॥ प्रतिमां लक्षणोपेतां नरसिंहस्य कारये-
त् ॥ स सर्वपापनिर्मुक्तो विष्णुलोकमवाप्नुयात् ॥ १३ ॥ प्रतिष्ठां नरसिंहस्य यः करोति यथाविधि

निःकामोनरशार्दूलदेहबाधात्प्रमुच्यते ॥१४॥ नरसिंहप्रतिष्ठाप्ययःपूजामाचरेन्नरः ॥ तस्यकामा
:प्रसिध्यंतिपरमंपदमाप्नुयात् ॥१५॥ ब्रह्मादयःसुराःसर्वेविष्णुमाराध्यतेपुराः ॥ स्वंस्वंपदमनुप्रा
ताःकेशवस्यप्रसादतः ॥१६॥ येयेनृपवराराजन्मांधातृप्रमुखान्नृपतेतेविष्णुसमाराध्य
स्वर्गलोकमितोगताः ॥१७॥ यःस्तुपूजयतेनित्यंनरसिंहंसुरेश्वरं ॥ सस्वर्गमोक्षभागीस्यात्‌नात्र
कार्याविचारणा ॥१८॥ तस्मादेकमनाभूत्वायावज्जीवप्रतिज्ञया ॥ अर्चनान्नरसिंहस्यप्राप्यसे
स्वात्मवांछितं ॥ विधिवत्स्थापयेयस्तुकारयित्वाजनार्दनं ॥ तनुनिर्गमनंतस्यविष्णुलोकाद्र
वेन्नृप ॥ नरान्नृसिंहंतमनंतविक्रमंसुरासुरैरर्चितपादपंकजं संस्थाप्यभक्त्याविधिवच्चर
पूजयेत्प्रयातिसाक्षात्परमेश्वरंहरिं ॥२१॥ इतिश्रीनरसिंहपुराणेसहस्रानीकचरिते ॥ श्री
राजोवाच ॥ हरेरर्चाविधिंपुण्यंश्रोतुमिच्छामितत्वतः ॥ त्वत्प्रसादाद्विशेषेणभगवान्प्रब्र
वीहिमे ॥१॥ सन्मार्जनकरोपश्चनरसिंहस्यमंदिरे ॥ यत्पुण्यंजायतेतद्वउपलेपनस्तु

न्नरः ॥२॥ शुद्धोदकेनयत्पुण्यंदध्नाचमधुनातथा ॥ घृतस्नानेनयत्पुण्यंपंचगव्येनयद्भ
वेत् ॥३॥ रक्तातितेचोष्णतोयेनप्रतिमायांचभक्तितः ॥ कर्पूरागरुतोयेनमिश्रेणस्नापितेनच ॥४
अर्घ्यदानेनयत्पुण्यंपाद्याचमनदानके ॥ मंत्रेणस्नापितेयच्चवस्त्रदानेनयद्भवेत् ॥५॥ श्रीखं
डकुंकुमाभ्यांतुअर्चितेकिंफलंभवेत् ॥ पुष्पैरभ्यर्चितेयच्चयत्फलंधूपदीपयोः ॥६॥ नैवेद्ये
यत्फलंप्रोक्तंप्रदक्षिणकृतेनुयत् ॥ नमस्कारकृतेयच्चफलंवस्त्रोपवीतयोः ॥७॥ तालवृं
तप्रदानेनचामरस्यचयद्भवेत् ॥ ध्वजप्रदानेयद्दिष्टोःशंखदानेनयद्भवेत् ॥८॥ एतच्चान्य
च्चयत्किंचित्स्नानाद्यन्नचोदितं ॥ तत्सर्वंकथयब्रह्मन्भक्तस्यममकेशव ॥९॥ सूतउ
वाच ॥ इतिसंप्रेरितोविप्रस्तेनराज्ञान्नगुरुस्तदा ॥ मार्कंडेयंनियुज्याथकथनेसरातामनि
:॥१०॥ सोपितस्मैमहाबुद्धोहरिभक्तोविशेषतः ॥ राज्ञेप्रवक्तुमारेभेनगुरुणाचोदितोमुनिः
॥११॥ मार्कंडेयउ० ॥ राजपुत्रशृणुष्वेदंहरिपूजाविधिंक्रमात् ॥ विष्णुभक्तस्यवक्ष्यामितवा

हंपांडुवंशज ॥ १२ ॥ नरसिंहस्य नित्यं यः संमार्जनमारभेत् । सर्वपापविनिर्मुक्तो विष्णुलोके समो
दते ॥ १३ ॥ गोमयेन मृदा तोयैः यः करोत्युपलेपनं । स चाक्षमफलं प्राप्य विष्णुलोके महीयते ॥ १
४ ॥ अत्रार्थं पत्नपुरावृत्तमितिहासं पुरातनं । यत्कृत्वा सर्वपापेभ्यो मुक्तिर्भवति सत्तम ॥ १५ ॥ पुरा
युधिष्ठिरो राजा पंचभिर्भ्रातृभिर्युतः । द्रौपद्या सह राजेन्द्र कानने विचचार ह ॥ १६ ॥ श्रजकंट
कादिभिः कांतारस्तत्र ते पंच पांडवाः ॥ नारदोपि गतो नाकं जुष्टेद्दंतीर्थमुत्तमं ॥ १७ ॥ ततो युधि
ष्ठिरो राजा प्रस्थितस्तीर्थमुत्तमं ॥ दर्शनं मुनिमुख्यस्य तीर्थधर्मोपदेशिनः ॥ १८ ॥ चिंतयंतिच
धर्मात्मा क्रोधपैशून्यवर्जितः ॥ रामवो मडुरोमा च तपास्थूलशरान्नृप ॥ १९ ॥ पांडवान्ग
तान्वीक्ष्य दानवो रौपदीकृया ॥ कृत्वा रूपमुने रूपं बहुरोमा च तपास्थूलशरान्नृप ॥ १९ ॥
स्सरा ॥ २० ॥ प्रणिधानं विधानं विधायाश्रुत्याशीनः । ऊर्ध्वविष्टपरे ॥ बिभ्रन्कमंडलुं पार्श्वे दर्भम्
चीतथाकरे ॥ २१ ॥ अक्षमालां जपन्मंत्रं स्वनासाग्रं निरीक्षयत् । सदृष्ट्वा पांडवैस्तत्र रैवा या

वनवारिभिः ॥ २२ ॥ ततो युधिष्ठिरो राजा तं प्रणम्य महानुजः ॥ जगाद वचनं हृष्टो लागेनाऽसि म
हामुने ॥ २३ ॥ तीर्थानि हृद्देहायाः सुगोप्यानि निवेदय ॥ मुनीनां दर्शनं नाप यतो धर्मोपदेशकं
२४ ॥ यावन्मुनिमुवाचेदं धर्मपुत्रो युधिष्ठिरः ॥ तावत्स्तु लजशरापाशी मुनीरूपधरोऽपरः ॥ २
५ ॥ जल्पन्निल्पातुरं वाक्यं कोनामस्त्वनरक्षकः । भयातुरं नरो जीवं योरक्षेच्छरणागतं ॥ २६ ॥ त
स्यानंतफलं स्याद्धि किं पुनर्मां द्विजोत्तमं ॥ एकतो मेदिनीदानं मेरुत्वधरद्दहिरणं ॥ २७ ॥ अन्यतो च
र्णजीवानां प्राणसंशयकारणं ॥ द्विजं धेनुं स्त्रियं बालं पीड्यमानं च दुर्जनैः ॥ २८ ॥ उपेक्षतो नरो य
स्तु सचगच्छति रौरवं ॥ अयमां हृतसर्वस्वं प्राणत्यागपरायणं ॥ २९ ॥ कोरक्षति नरो वीरः परान्मूलं
हिहानं वैः ॥ गृहीता चाक्षमाला मे तथा शुत्रकमंडलुः ॥ ३० ॥ निहतो हं कराघातैः तथा रखाओ
मनोहरः ॥ गृतं हि तं मम सर्वस्वं दानवेन दुरात्मना ॥ ३१ ॥ इत्याकर्ण्य वचः क्लीबं पांडवा जातं
संभ्रमाः ॥ यांति रोमां चितास्तूयो विधाया ग्रेचतं मुनिं ॥ ३२ ॥ विमुच्य रोपदीं तत्र मुनेः पार्श्वे

न॰पु॰
६४

महात्मनः ॥ ततो हरं तरं घाताः संरंभात्तेच पांडवाः ॥ ३३ ॥ ततो युधिष्ठिरो वोचत् किं वनी चात्र दृश्ये
ते ॥ हत्वा संरक्षणे पथि व्रजस्वाद्य त्वं चार्जुन ॥ ३४ ॥ ततोर्जुनो विनिःक्रांतो बंधुवाक्यप्रणोदित
ः ॥ ततो युधिष्ठिरो राजा सत्यां वाचमकल्पयेत् ॥ ३५ ॥ निरीक्ष्य मंडलं ज्ञानो स्वरो सुराह नैव नै
मम सत्वाद्य सुकृतान् धर्मसंभाषणात् प्रभो ॥ ३६ ॥ तप्पञ्च संतु त्रिदशाः मम संशयनाशि
नः ॥ ततो ऽवरं च वक्षाणि तहाश्चपा शरीरिणी ॥ ३७ ॥ दानवोयं महाराज मुनिः स्वकशिरोः स्थि
तः ॥ नासावुपद्रुतः केन मायैयास्य दुरात्मनः ॥ ३८ ॥ ततो भीमः कराघातेर्नश्यमानं हि दानवं
स रंकुं कूपितोत्सर्पं मौलिदेशे जघान तं ॥ ३९ ॥ सोपि रूपं निजं प्राप्य रोऽभीमं ताडयत् ॥ त
त्रयुद्धं प्रववृते दारुणे भीमदैत्ययोः ॥ ४० ॥ कृष्णा द्वन्ं जन्मीमोपितस्य स्थूलं शरोचने ॥ अर्जुनो
ऽपि समायातो नैव पश्यति तं मुनिं ॥ ४१ ॥ तथा च द्रौपदीं रूपसाध्वी कानां च वध्यतां ॥ ततो वृ
क्षं समारुह्य पावत्सपश्यति चार्जुनः ॥ ४२ ॥ तावद्विधायतां स्कंधे शीघ्रं धावति दानवः ॥ सं

राम॰
६४

रुतायाविडष्टेन रुदती कुररी यथा ॥ ४३ ॥ कुर्वती भीम भीमेति धर्मेति पुत्रेति वादिनी ॥ तां दृष्ट्वा
स ययौ वीरः शब्दैः संनादयन् दिशः ॥ ४४ ॥ पादन्यासोरुवेगेन प्रभग्नाः पादपा नशं ॥ ततो दैत्यो ऽ
पि तां त्यक्त्वा विहाय आशुर्वत्रापि सः ॥ ४५ ॥ तथापि चार्जुनो वशकोपान्मुंचति नाशुरं ॥ ततो ज
घान बाणेन चापमारोपितेन [illegible] नैव ॥ ४६ ॥ पतितो मेदिनीपृष्ठे तावद्देवश्चतुर्भुजः ॥ पीतेच
ऽवाससी बिभ्रन् शंखचक्रायुधानि च ॥ ४७ ॥ ततः सविस्मयाक्रांतो नत्वा पार्थो वचो ऽवदत् ॥
अर्जुन उवाच ॥ कथं त्वयैवामणव न्यचक्रे मायात्र वैस्त्वी ॥ ४८ ॥ मयाप्यकृतं नाप्यतन्न मस्त न
मोस्तुते ॥ त्वतम सानंदा वेन कर्मैतद्दारुणं मया ॥ ४९ ॥ नत्त्वं तमं जगन्नाप वेत्स्यंमानवे
कृतः ॥ चतुर्भुज उ ॥ नाहे ऋषो महाबाहो बहुरोमास्मि दानवः ॥ ५० ॥ उपहातो हरेर्दैत्यं पूर्वकर्म
प्रभावतः ॥ अर्जुन उवाच ॥ बहुरोमन् पूर्वजातिकर्म मे शंस तत्वतः ॥ ५१ ॥ केन कर्मविपाके न
विह्वलः सारूप्यमावान् ॥ चतुर्भुज उ ॥ शृणवर्जुन महाभाग सहितोर्न्नात्र जिमर्म ॥ ५२ ॥ चरितं वि

न०पु०
६५

ब्रमन्नर्थ्यश्चैवनांमुरेवरूनं ॥ स्वहमासंपुरोराजासोमवंशसमुद्भवः ॥५३॥ जयध्वजइतिख्यातोनारा
यणःपरायणः ॥ विष्णोर्देवालयेनित्यंसंमार्जनपरायणः ॥५४॥ उपलेपरतश्चैवदीपदानेस
मुद्यतः ॥ वीतिहोत्रइतिख्यातस्तस्यासीत्साधुपुरोहितः ॥५५॥ ममतच्चरितंदृष्ट्वाविप्रोविस्मय
मागतः ॥ माधवंउयउ ॥ कदाचिदुपविष्टंतंराजानंविष्णुतत्परं ॥५६॥ अपृच्छद्वीतिहोत्रस्तंवेदवे
दांगपारगः ॥ राजन्परमधर्मज्ञहरिभक्तिपरायण ॥५७॥ विष्णुभक्तिमतांपुंसांश्रेष्ठोसिपुरुषर्ष
भ ॥ सन्मार्जनपरोनित्यंउपलेपरतस्तथा ॥५८॥ तन्मेवदमहाभागत्वयाकिंविदितंफलं ॥ कर्मा
एयन्यानिसंत्येवविष्णोःप्रियतराणिवै ॥५९॥ तथापित्वंमहाभागएतयोःसततोद्यतः ॥ सर्वात्म
नामहाभुण्यज ॥६०॥ तद्ब्रूहियद्यगुह्यंचप्रीतिर्मयितवास्तिचेत् ॥ जयध्वजउवाच ॥ शृणुष्वविप्र
शार्दूलमामेवचरितंपुरा ॥६१॥ जातिस्मरत्वाज्ज्ञानामिश्रोतॄणांविस्मयावहं ॥ पूर्वजन्मनिविप्रेन्द्ररै
वतोनामवाडवः ॥६२॥ अयाज्ययाजकोहंवैसदैवग्रामयाजकः ॥ पिशुनोनिष्ठुरश्चैवन्नापण्य

राम०
६५

नांचविक्रयि ॥६३॥ निषिद्धकर्माचरणात्परित्यक्तःस्वबंधुभिः ॥ महापापरतोनित्यंब्रह्मद्वेषरतस्त
था ॥६४॥ परदाररतःक्रूरोलुब्धोजंतुहिंसकः ॥ मद्यपानरतोनित्यंनिंदकःपिशुनस्तथा ॥६५॥ एवं
पापरतोनित्यंबहुशोमार्गरोधकृत् ॥ कदाचित्कामवारोहंगृहीत्वाब्राह्मणस्त्रियं ॥६६॥ शून्यंपू
जादिभिर्विष्णोःमंदिरंरं प्राप्तवान्निशि ॥ स्ववस्त्रप्रांतवोब्राह्मन्किंयदृशःसमार्जितः ॥ प्रदीय
स्थापितस्तत्रसुरतार्थंद्विजोत्तम ॥ तेनापिममदुःकर्मनिःशेषंक्षयमागतं ॥६८॥ एवंस्थितेविष्णु
गृहेमयास्तोगेहपादिजे ॥ तद्देवदीपकंदृष्ट्वाआगतापुरपालकाः ॥६९॥ चोरोयंपरदारीयमितु
क्त्वामामपातयत् ॥ खड्गेनतीक्ष्णधारेणशिरश्छित्वानुतेगताः ॥७०॥ दिव्यंविमानमारुह्यसर्वभो
गसमन्वितं ॥ गंधर्वैर्गीयमानोहंस्वर्गलोकंतदागतः ॥७१॥ चतुर्युगउ ॥ तत्रस्थित्वाब्रह्मलोकक
ल्पंशतंत्वायंद्विजोत्तमः ॥ दिव्यभोगसमायुक्तोदिव्यरूपसमन्वितः ॥७२॥ जातोहंपुण्ययोगाद्धि
सोमवंशसमुद्भव ॥ जयध्वजइतिख्यातोराजाजीवनलोचनः ॥७३॥ तत्राविकालवशतोमतःस्व

[illegible]वान्‌ ॥ इंद्रलोकमनुप्राप्य रुद्रलोकं ततो गतः ॥ ७४ ॥ रुद्रलोकाद्ब्रह्मलोकं गच्छता ना
रदो मुनिः ॥ दृष्टश्च न मितो नैव गर्वान्मे हसितश्च सः ॥ कुपितः शप्तवान्मां सः राक्षसो भव भूपते
॥ ७५ ॥ इति शापं समाकर्ण्य दत्तं तेन द्विजन्मना ॥ प्रसादितो मया भूप प्रसादं कृतवान्मु
नि ॥ ७६ ॥ यदा रेवातटे राजन्‌ धर्मपुत्रस्य धीमतः ॥ भार्यापहारं नयतः शापमोक्षोऽस्य वि
ष्यति ॥ ७७ ॥ सोहमर्जुन भूपाल धर्मपुत्र युधिष्ठिर ॥ विष्णोः सारूप्यमगमं यामि वैकुंठमद्य
वै ॥ ७८ ॥ मार्कंडेय उ० ॥ इत्युक्त्वा गरुडारूढो धर्मपुत्रस्य पश्यतः ॥ गतवान्विष्णुभवनं
यत्र विष्णुः श्रिया सह ॥ सन्मार्जनोपलेपाभ्यां महिमा ते न वर्णितः ॥ अवशेनापि यत्कर्म
कृत्वेमां श्रियमागतः ॥ ८० ॥ भक्तिमद्भिः प्रशांतैश्च किं पुनः सम्यगर्चनात्‌ ॥ सूत उवाच
॥ मार्कंडेयवचः श्रुत्वा पांडुवंशसमुद्भवः ॥ सहस्रानीकभूपालो हरिपूजारतो भवत्‌ ॥ त
स्माच्छृणुत विप्रेंद्रा देवो नारायणोऽव्ययः ॥ ज्ञानतोऽज्ञानतो वापि पूजकानां विमुक्तिदः ॥ ८

ध्येयं ध्येयं जगन्नाथं त्रयी त्रयी वदाम्यहं ॥ कर्तुं यदीच्छथ द्विजा उत्तरं भवसागरं ॥ येऽर्चयंति हरिं भ
क्त्या प्रणतार्त्तिहरं हरिं ॥ ८४ ॥ ते वंद्यास्ते प्रपूज्याश्च नमस्याश्च विशेषतः ॥ इति श्रीनरसिंहपु
राणे सहस्रानीकं प्रति मार्कंडेयेनोपदिष्टं सन्मार्जनोपलेपकफलं समाप्तं ॥ छ ॥ श्रीस
हस्रानीक उ० ॥ पुनरेव द्विजश्रेष्ठ मार्कंडेय महामते ॥ निर्माल्यापनयाद्विष्णोर्यत्पुण्यं तद्वदस्व
मे ॥ १ ॥ मार्कंडेय उवाच ॥ निर्माल्यमपनीयाथ तोयेन स्नाप्य केशवं ॥ नरसिंहाकृतिं राजन्‌
सर्वपापैः प्रमुच्यते ॥ २ ॥ सर्वतीर्थफलं प्राप्य यानारूढो दिवं व्रजेत्‌ ॥ श्रीविष्णोः सदनं प्राप्य मो
दते कालमक्षयं ॥ ३ ॥ आगच्छ नरसिंहेत्यावाह्याक्षतपुष्पकैः ॥ एतावतापि राजेंद्र सर्वपापैः
प्रमुच्यते ॥ ४ ॥ दत्त्वासनमथार्घ्यं च पाद्यमाचमनीयकं ॥ देवदेवस्य विधिना सर्वपापैः प्रमुच्य
ते ॥ ५ ॥ स्नाप्य तोयेन जलस्नाच नरसिंहं नराधिप ॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीय
ते ॥ ६ ॥ स्नाप्य दध्ना सकृद्यस्तु निर्मलः प्रियदर्शनः ॥ विष्णुलोकमवाप्नोति पूज्यमानः सु

न॰पु॰
६७

रोत्तमैः ७ यः करोति हरेरर्चां मधुना स्नापयन्नरः अग्निलोके समोदित्वा पुनर्विष्णुपुरे वसे
त् ८ घृतेन स्नपनं यस्तु स्नानकाले विशेषतः नरसिंहाकृतौ कुर्याद्दिव्यचक्रेण विनोदितं ९
पापकंचुकमुन्मुच्य यथा जीर्णमहिस्त्वचं दिव्यं विमानमारुह्य विष्णुलोके समोदते १० पं
चगव्येन देवेशं यः स्नापयति भक्तितः मंत्रपूर्वं महाराज तस्य पुण्यमनंतकं ११ यवगोधू
मकैश्चूर्णैरुद्वर्त्योष्णेन वारिणा प्रक्षाल्य देवदेवेशं वारुणं लोकमाप्नुयात् १२ पादपीठं तु यो
भक्त्या बिल्वपत्रैर्निघर्षितं उष्णांबुना च प्रक्षाल्य सर्वपापैः प्रमुच्यते १३ कुशपुष्पोदकैः स्नात्वा
ब्रह्मलोकमवाप्नुयात् नरसिंहं तु संस्नाप्य कर्पूरागरुवारिणा १४ इंद्रलोके समोदित्वा प
श्चाद्विष्णुपुरे वसेत् पुष्पोदकेन गोविंदं स्नाप्य भक्त्या नरोत्तमः १५ सावित्रं लोकमासाद्य
विष्णुलोके महीयते वस्त्राभ्यामर्चनं भक्त्या परिधाप्य हरिं नरः १६ सोमलोके रमित्वा च वि
ष्णुलोके महीयते कुंकुमागरुश्रीखंडकर्दमैरच्युताकृतिं १७ आलिप्य भक्त्या राजेंद्र कल्प

राम॰
६७

कोटिं वसेद्दिवि मल्लिकामालतीजातीकेतक्याशोकचंपकैः १८ पुन्नागनागबकुलैः पद्मैरुत्प
लजातिभिः तुलसीकरवीरैश्च पालाशैः सानुकुब्जकैः १९ एतैरन्यैश्च कुसुमैः प्रशस्तैरच्यु
तं नरः अर्चयेद्दशसुवर्णस्य स फलमाप्नुयात् २० मालां कृत्वा यथालाभं एतेषां विष्णुम
र्चयेत् कल्पकोटिसहस्राणि कल्पकोटिशतानि च २१ दिव्यं विमानमारुह्य विष्णुलोके समो
दते नरसिंहं तु यो भक्त्या बिल्वपत्रैरखंडितैः २२ निश्छिद्रैः पूजयेद्यस्तु लक्षणैः समन्वितं
सर्वपापविनिर्मुक्तः सर्वभूषणभूषितः २३ कांचनेन विमानेन विष्णुलोके महीयते महिष
ाख्यं गुग्गुलं यस्तु आज्ययुक्तं सशर्करं २४ धूपं ददाति राजेंद्र नारसिंहस्य भक्तिमान् धूपितैः सर्व
दिक्षस्तु सर्वपापविवर्जितः २५ अप्सरोगणसंकीर्णं विमानेन विराजते वायुलोके समोदित्वा
पश्चाद्विष्णुपुरं व्रजेत् २६ घृतेन वाथ तैलेन दीपं यो ज्वालयेन्नरः विष्णवे विधिवद्भक्त्या त
स्य पुण्यफलं शृणु २७ विहाय पापकलिलं सहस्रादित्यसप्रभः ज्योतिष्मता विमानेन वि

ष्णुलोकं स गच्छति ॥ २८ ॥ हविषा शाल्योदनं विद्वान् आज्ययुक्तं सशर्करं । निवेद्य नरसिंहाय
यावकं पापसंतया ॥ २९ ॥ समास्तं डुलसंख्याया यावतीस्तावतीर्नृप । विष्णुलोके महाभो
गान्भुंजन्नास्ते स वैष्णवः ॥ ३० ॥ बलिना वैष्णवेनाथ नरत्नासंतोदिवौकसः । शांतिं तस्य प्रय
च्छंति श्रियमारोग्यमेव च ॥ ३१ ॥ प्रदक्षिणेन चैकेन देवदेवस्य भक्तितः । कृतेन यत्फलं नॄ
णां तच्छृणुष्व नृपात्मज ॥ ३२ ॥ पृथिवीप्रदक्षिणफलं प्राप्य विष्णुपुरे वसेत् । नमस्कारः कृ
तो येन भक्त्या वै माधवस्य च ॥ ३३ ॥ धर्मार्थकाममोक्षाख्यं फलं तेनाप्तमंजसा । गीतवाद्या
दिकं नाट्यं शंखतूर्यादिनिःस्वनैः ॥ ३४ ॥ यः कारयति वै विष्णोः स याति मंदिरं नरः । पर्व
काले विशेषेण कामगः कामरूपवान् ॥ ३५ ॥ सुसंगीतविदैः श्चैव सेव्यमानोऽप्सरोगणैः ।
महार्हमणिचित्रेण विमानेन विराजता ॥ ३६ ॥ स्वर्गात्स्वर्गमनुप्राप्य विष्णुलोके महीय
ते ध्वजं तु विष्णवे यस्तु गरुडेन समन्वितं ॥ ३७ ॥ दद्यात्सोपि ध्वजाकीर्णविमानेन वि

राजता ॥ विष्णुलोकमवाप्नोति सेव्यमानोऽप्सरोगणैः ॥ ३८ ॥ यो गां पयस्विनीं विष्णोः प्रात्यर्थं संप्र
यच्छति । पितरस्तस्य मोदंति श्वेतद्वीपे चिरं नृप ॥ ३९ ॥ एवं यः पूजयेद्राजन् नरसिंहं नरोत्तम
ः । तस्य स्वर्गापवर्गौ तु भवतो नात्र संशयः ॥ ४० ॥ यत्रैवं पूज्यते विष्णुर्नरसिंहो नरैर्नृप । न तत्र
व्याधिदुर्भिक्षराजचौरादिकं भयं ॥ ४१ ॥ नरसिंहं समाराध्य विधिनानेन माधवः । नानास्वर्ग
सुखं भुक्त्वा नत्रयः स्तनपो भवेत् ॥ ४२ ॥ मार्कंडेय उवाच । इत्येवमुक्तं भृगुचोदितेन मया तवेहा
र्चनमच्युतस्य । दिने दिने त्वं कुरु विष्णुपूजां वदस्व चान्यत्कथयामि किं ते ॥ ४३ ॥ इति श्रीनरसिं
हपुराणे सहस्रानीकचरिते श्रीविष्णोः पूजाविधिः ॥ राजोवाच । अहो महात्त्वया प्रोक्तं विष्ण्वा
राधनजं फलं । सुप्तास्ते मुनिशार्दूल ये विष्णुं नार्चयंति वै ॥ १ ॥ त्वत्प्रसादाच्छ्रुतं ह्येतन्नरसिंहार्च
नक्रमं । भक्त्या तं पूजयिष्यामि कोटिहोमफलं वद ॥ २ ॥ मार्कंडेय उ । इमं मर्थं पुरा पृष्टः शौनको
गुणोरुणा नृप । यत्तस्मै कथयामास शौनकस्तद्वदामि ते ॥ ३ ॥ शौनकं तु सुखासीनं पर्यपृच्छद्दह

न०पु०
६९

स्तिः ॥ बृहस्पतिरुवाच ॥ लक्षहोमस्य या भूमिः कोटिहोमस्य वा शुभाः ॥ ४ ॥ तां मे कथय विप्रेंद्र
होमस्य च विधिक्रमः ॥ मार्कंडेय उवाच ॥ इत्युक्तो गुरुणा सोपलक्षहोमादिकं विधिं ॥ शौन
कोवकुमारेभ्यो यथावन्नृपसत्तम ॥ शौनक उवाच ॥ प्रवक्ष्यामि यथावत्ते शृणु देवपुरोहित
६ ॥ लक्षहोममहाभूमिं तद्विशुद्धिं विशेषतः ॥ यत्कर्मणि प्रशस्ता या भूमेर्लक्षणमुत्तमं ॥ ७
सुसंस्कृतां समां स्निग्धां पूर्वपूर्वमथोत्तरां ॥ ऊरुमात्रं खनित्वा च शोधयेत्तां विशेषतः ॥ ८
बहिः कृतया तत्र मृदा वा घृतलेपयेत् ॥ प्रमाणं बाहुमात्रे तु सर्वतः कुंडलक्षणं ॥ ९ ॥ चतु
रस्रं चतुःकोणं तु त्र्यस्रं त्रेण कारयेत् ॥ उपरि मेखलां कुर्याच्चतुरस्रां सुविस्तरां ॥ १० ॥ चतु
रंगुलमात्रं तु उच्छ्रितां सूत्रसन्विता ॥ ब्राह्मणान् वेदसंपन्नान् ब्रह्मकर्मसमन्वितान् ॥ ११
आमंत्रयेद्यथान्यायं यजमानोपि विशेषतः ॥ ब्रह्मचर्यव्रतं कुर्युः त्रिरात्रं ते द्विजातयः ॥ १२
अहोरात्रमुपोष्याथ गायत्रीमयुतं जपेत् ॥ ते शुक्लवाससः स्नाताः गंधस्रक्पुष्पधारिणः

राम०
६९

॥ १३ ॥ शुचयश्च निराहाराः संतुष्टाः संयतेंद्रियाः ॥ कौशमासनमासीना एकाग्रमनसाः पुनः
१४ आरभेयुश्च ते यत्नात् ततो होममतंद्रिताः ॥ भूमिमालिख्य चास्फाल्य यत्नादग्निं निधापयेत्
१५ गृह्योक्तेन विधानेन होमं तत्र च होमयेत् ॥ अघोरा वा ज्वलागे च जुहुयात् पूर्वमेव तु ॥ १६
यवधान्यतिलैर्मिश्रां गायत्र्या च प्रथमाहुतिं ॥ जुहुयादेकचित्तेन स्वाहाकारान्वितां बुधः ॥ १७
गायत्रीछंदसां माता ब्रह्मयोनिः प्रतिष्ठिता ॥ सविता देवता तस्या विश्वामित्रस्तथा ऋषिः ॥ १८
ततो व्याहृतिभिः पश्चात् जुहुयात् तिलान्वितं ॥ यावत् प्रपूर्यते संख्या लक्षं वा कोटिरेव वा ॥ ताव
द्धोमं तिलैः कुर्यात् स्वकृतार्चनपूर्वकं ॥ दीनानाथजनेभ्यस्तु यजमानः प्रयत्नतः ॥ २० ॥ तावच्च भो
जनं दद्यात् यावद्धोमं समाचरेत् ॥ समाप्ते दक्षिणां दद्यात् ऋत्विग्भ्यः श्रद्धयान्वितः ॥ २१ ॥ य
थाहितानलो जनेनतलः शांत्युदकेन च ॥ प्रोक्षयेद्ग्राममध्ये तु व्याधितांस्तु विशेषतः ॥ २२ ॥ एवं कृते
तु ग्रामस्य पुरस्य नगरस्य च ॥ राष्ट्रस्य च महाभाग राज्ञा जनपदस्य च ॥ २३ ॥ सर्वाबाधाप्रशम

नीराजनैर्निवर्तिसर्वदा ॥ मार्कंडेय उवाच ॥ इत्येतच्छौनकप्रोक्तं कथितं नृपनंदन ॥ २४ ॥ लक्षहोमा
दिकविधिं राष्ट्रे कार्यं सुशांतिदं ॥ ग्रामे गृहे वा पुरबाह्यदेशे द्विजैरयं यत्नकृतः परो विधिः ॥ २५ ॥ न
चाति शांतिर्भविता नराणां गवां च तस्मैः सह भूपतेश्च ॥ इति श्रीनरसिंहपुराणे लक्षहोमविधि
: ॥ श्रीमार्कंडेय उवाच ॥ अवतारानहं वक्ष्ये देवदेवस्य चक्रिणः ॥ तान्शृणुष्व महीपाल पवित्रा
न्पापनाशनान् ॥ १ ॥ यथा मत्स्येन रूपेण दत्ता वेदाः स्वयोनये ॥ मधुकैटभौ च निधनं प्रापितौ च
महात्मना ॥ २ ॥ यथा कूर्मेण रूपेण विष्णुना मंदरो धृतः ॥ यथा दंष्ट्रोद्धृता राजन् वाराहेण महा
त्मना ॥ ३ ॥ तेनैव निधनं प्राप्तो यथा राजन् महाबलः ॥ हिरण्याक्षो महावीर्यो दितिपुत्रो महातनुः
॥ ४ ॥ यथा हिरण्यकशिपुस्त्रिदशानामरिः पुरा ॥ नरसिंहेन देवेन प्रापितो निधनं नृप ॥ ५ ॥ यथा
बद्धो बलिः पूर्वं वामनेन महात्मना ॥ इंद्रस्त्रिभुवनाध्यक्षः कृतस्तेन नृपात्मजा ॥ ६ ॥ रामेण भूत्वा
च यथा विष्णुना रावणो हतः ॥ सगणश्चाद्भुता राजन् राक्षसा देवकंटकाः ॥ ७ ॥ यथा परशुरामे

ण क्षत्रमुत्सादितं पुरा ॥ यथा च कृष्णेन कंसाद्या हता दैत्याः सुरद्विषः ॥ ८ ॥ कैः कलौ प्राप्ते यथा बुद्धो भग
वन्नारायणः प्रभुः ॥ कल्किरूपं समास्थाय यथा म्लेच्छा निपातिताः ॥ समाप्ते तु कलौ भूयस्तथा ते क
थयाम्यहं ॥ हरेरनंतस्य पराक्रमं यः शृणोति भूपाल समाहितात्मा ॥ मयोच्यमानं स विमुच्य पापं
प्रयाति विष्णोः पदमत्युदारं ॥ १० ॥ इति श्रीनरसिंहपुराणे हरेः प्रादुर्भावः ॥ श्रीमार्कंडेय उवाच
॥ नानात्वादवताराणामच्युतस्य महात्मनः ॥ न शक्यं विस्तराद्वक्तुं तान् ब्रवीमि समासतः ॥ १ ॥
पुरा किल जगत्स्रष्टा भगवान् पुरुषोत्तमः ॥ अनंतभोगशयने योगनिद्रां समागतः ॥ २ ॥ अ
पतस्य प्रसुप्तस्य देवदेवस्य शार्ङ्गिणः ॥ श्रोत्राभ्यामपतत्तोये स्वेदबिंदुद्वयं नृप ॥ ३ ॥ मधुकैटभ
नामानौ तस्माज्जातौ महाबलौ ॥ महाकायौ महावीर्यौ महाबलपराक्रमौ ॥ ४ ॥ अथ तस्य प्रसु
प्तस्य महत्पद्ममजायत ॥ नाभिमध्ये नृपश्रेष्ठ तस्मिन् ब्रह्मा व्यजायत ॥ ५ ॥ स चोक्तो विष्णुना रा
जन् प्रजाः सृज महामते ॥ तथेत्युक्त्वा जगन्नाथो ब्रह्मापि कमलोद्भवः ॥ ६ ॥ तेदृशास्त्रवशाद्धा

वन् प्रजाः स्रष्टुं समुद्यतः ॥ तावत्तत्र समायातौ तावुभौ मधुकैटभौ ॥ आगत्य वेदशास्त्राणि विज्ञानं ब्र
ह्मणः स्मृणात् अपहृत्य गतौ घोरौ दानवौ बलदर्पितौ ॥ ८ ॥ ततः प्रभोऽभवो राजन् ज्ञानहीनो ऽभव
त्क्षणात् ॥ दुःखितश्चिंतयामास कथं स्रक्ष्यामि वै प्रजाः ॥ ९ ॥ चोदितस्त्वं सृज स्वेति प्रजा दे
वेन तेन कथं ॥ स्रक्ष्येऽहं ज्ञानहीनस्तु अहो कष्टमुपस्थितं ॥ १० ॥ इति संचिंत्य दुःखार्त्तो ब्रह्मा लो
कपितामहः ॥ यत्नतो वेदशास्त्राणि स्मरन्नपि न दृष्टवान् ॥ ११ ॥ ततो निषण्णचित्तस्तु तं देवं
पुरुषोत्तमं ॥ एकाग्रमनसा सम्यक् शास्त्रेण स्तोतुमारभे ॥ १२ ॥ ब्रह्मोवाच ॥ ॐ नमो वेदनि
धये शास्त्राणां निधये नमः ॥ विज्ञाननिधये नित्यं कर्म्मणां निधये नमः ॥ १३ ॥ विद्याधराय
देवाय वागीशाय नमो नमः ॥ अचिंत्याय नमो नित्यं सर्वज्ञाय नमो नमः ॥ १४ ॥ अमूर्त्तस्त्वं म
हाबाहो यज्ञमूर्त्तिरधोक्षज ॥ शास्त्राणां मूर्त्तिस्त्वमेवाद्य सर्वदा सर्वरूपवान् ॥ १५ ॥ सर्वज्ञानम
योऽसि त्वं देवदेव नमो नमः ॥ मार्कंडेय उवाच ॥ इत्थं स्तुतस्तदा तेन शंखचक्रगदाधर ॥ १६

ब्रह्माणमाह देवेशो दास्ये ते ज्ञानमुत्तमं ॥ इत्युक्त्वा तु तदा विष्णुश्चिंतयामास पार्थिव ॥ १७ ॥ के
नास्य नीतिविज्ञानं केन रूपेण वा हृते ॥ मधुकैटभसंक्रांतं सर्वमिति ज्ञात्वा जनार्द्दनः ॥ १८ ॥ मा
त्स्यं रूपं समास्थाय बहुयोजनमायतं ॥ बहुयोजनविस्तीर्णं सर्वज्ञानमयं नृप ॥ १९ ॥ स प्रविश्य ज
लं तूर्णं शोधयामास तं हरिः ॥ प्रविश्य च सपातालं दृष्टवान् मधुकैटभौ ॥ २० ॥ तौ मोहरित्वा तु म
लं तत् ज्ञानं जगृहे हरिः ॥ वेदशास्त्रादिमुनिभिः संस्तुतो मधुसूदनः ॥ २१ ॥ आनीय ब्रह्म
णो दत्वा त्यक्त्वा तत्स्य कं नृप ॥ जगद्धिताय स पुनर्योगनिद्रावशं गतः ॥ २२ ॥ ततः प्रबुद्धौ सं
क्रुद्धौ तावुभौ मधुकैटभौ ॥ आगत्य ददृशाते तु शयानं देवमव्ययं ॥ २३ ॥ अयं स पुरुषो धू
र्त्तः आवां संमोह्य मायया ॥ आनीय वेदशास्त्राणि दत्वा शेतेऽत्र साधुवत् ॥ २४ ॥ इत्युक्त्वा
तौ महाघोरौ दानवौ मधुकैटभौ ॥ तूर्णं प्रबोधयामास शयानं केशवं नृप ॥ २५ ॥ युद्धार्थमा
गतावत्र त्वया सह महामते ॥ आवयोर्देहि संग्राममनुज्ञाय युयुत्सा साम्प्रतं ॥ २६ ॥ इत्युक्तो

न०पु० भगवान्तान्सांयुद्धार्थिनांन्पोत्तम ॥ तयोर्निचोरूकालो देवः शार्ङ्गी सज्यमथाकरोत् ॥ २७ ॥ ज्या
७२ घोषतलघोषेण शंखशब्देन माधवः ॥ खंदिशः प्रदिशश्चैव पूरयामासलीलया ॥ २८ ॥ तौ वराज
न्महावीर्यौ ज्याघोषं चक्रतुस्तदा ॥ युयुधाते महाघोरौ हरिणा मधुकैटभौ ॥ २९ ॥ कृत्स्नश्च यु
युधे तान्सांलीलया जगतः पतिः ॥ समं युद्धमभूद्देवतेषा मस्त्राणि मुंचतां ॥ ३० ॥ केशवः
शार्ङ्गनिर्मुक्तैः शरैराशीविषोपमैः ॥ तावि शस्त्राणि सर्वाणि चिच्छेद निजशस्तदा ॥ तौ युधा
सुचिरं तेन दानवौ मधुकैटभौ ॥ हतौ शार्ङ्गविनिर्मुक्तैः शरैः कृत्स्नेन दुर्मदौ ॥ ३२ ॥ तयोस्तु मे
दसा राजन्विष्णुना कल्पिता मही ॥ मेदिनीति ततः संज्ञामवापेयं वसुंधरा ॥ ३३ ॥ एवं कृ
त्स्नप्रसादेन वेदान्लब्ध्वा प्रजापतिः ॥ प्रजाः ससर्ज भूपाल वेदहष्टेन कर्मणा ॥ यइदं शृणु
यान्नित्यं प्रादुर्भावं हरेर्नृप ॥ वसित्वाचैव सदने वेदविद्ब्राह्मणो भवेत् ॥ ३५ ॥ मात्स्यं वपुस्त्व राम०
महदद्भुतं संस्थितं विधाय यं लोकहिताय विष्णुः ॥ आस्थायन्निमंज्जनलोक संस्थैस्तुतोप य ७२

स्तं स्मरन्नृमिपाल ॥ ३६ ॥ इति श्रीनरसिंहपुराणे मत्स्यप्रादुर्भावः ॥ श्रीमार्कंडेय उवाच ॥
पुरा देवासुरे युद्धे देवा दैत्यैः पराजिताः ॥ सर्वे ते शरणं जग्मुः क्षीराब्धितनयापतिं ॥ १ ॥ स्तोत्रेण तु
ष्टुवुः सर्वे समाराध्य जगत्पतिं ॥ कृतांजलिपुटा राजन्ब्रह्माद्या देवतागणाः ॥ २ ॥ देवता ऊचुः
॥ नमस्ते देवदेवाय लोकनाथाय शार्ङ्गिणे ॥ नमस्ते पद्मनाभाय सर्वदुःखापहारिणे ॥ नमस्ते वि
श्वरूपाय सर्वदेवमयाय च ॥ मधुकैटभनाशाय केशवाय नमो नमः ॥ ४ ॥ दैत्यैः पराजिता देव व
यं युद्धबलान्वितैः ॥ जयोपायं हि नो ब्रूहि कंकरुणाकर ते नमः ॥ ५ ॥ मार्कंडेय उवाच ॥ इति स्तुतो
तदा देवैर्देवदेवो जनार्दनः ॥ तानब्रवीद्धरिर्देवान्तेषामेवाग्रतः स्थितः ॥ ६ ॥ श्रीभगवानुवा
च ॥ गत्वा तत्र सुराः सर्वे संधिं कुरुत दानवैः ॥ मथानं मंदरं कृत्वा नेत्रं कृत्वा च वासुकिं ॥ ७ ॥ सर्वौष
धिसमानीय प्रक्षिप्याब्धौ त्वरान्विताः ॥ दानवैः सहितास्तूर्णं मंथध्वं क्षीरसागरं ॥ ८ ॥ अहं च त
त्र साहाय्यं करिष्यामि दिवौकसः ॥ भविष्यत्यमृतं तत्र तत्पानाद्बलवत्तराः ॥ ९ ॥ भविष्यंति ह

एण देवानामतस्य प्रभावतः॥ यूयं सर्वे महानागास्तेजिष्णारण विक्रमा॥१०॥ इंद्राद्यास्तु महोत्साह
संजग्धामृतमुत्तमं॥ ततो हि हृष्टवानेवान् जेतुं समर्था नात्र संशयः॥११॥ इत्युक्ता देवदेवेन देवाः सर्वे
जगत्पतिं प्रणम्यागत्य निजयं संधिं कृत्वा पदानवैः॥१२॥ क्षीराब्धेर्मथुने सर्वे चक्रुरुद्योगमुत्त
मं॥ बलिनाचोद्धृतो राजन् मंदराख्यो महागिरिः॥१३॥ क्षीराब्धौ क्षिपितश्चैव ततेनैकेनन्नपोत्तम स
र्वौषधीश्च प्रक्षिप्य देवदैत्यैः पयोनिधौ॥१४॥ वासुकिश्चागतस्तत्र राजन्नारायणाज्ञया॥ सर्वदेव
हितार्थाय विष्णुश्च स्वयमागतः॥१५॥ तत्र विष्णुं समासाद्य ततः सर्वे सुरासुराः॥ सर्वे ते मैत्रभावे
न क्षीराब्धेस्तटमाश्रिताः॥१६॥ मंथानं मंदिरं कृत्वा नेत्रं कृत्वाथ वासुकिं॥ ततो मथितमारब्धं नृप
तेतरसा मृतं॥१७॥ विष्णुना सुरवन्नागे तु गृहीता दानवैः कृता॥ देवता पुच्छभागे तु मथनाय नियोजि
ताः॥१८॥ एवं च मथनान्नूनं मंदराधः प्रविशत् च॥ आधारेण विना राजन् मथितुं नैव शक्यते॥१९॥
सर्वलोकहितार्थाय कूर्मरूपमधारयन्॥ आत्मानं संप्रवेश्याथ मंदरस्य स गिरेरधः॥२०॥ प्र

विरूपधृत् बलवान् शैलं मंदरं मधुसूदनः॥ उपर्याक्रांतवान् शैलं रूपमन्येन केशवं॥२१॥ चकर्षन्
नागराजानं दैवैः सार्द्धं हि वान् शैलं मंदरं मधुसूदन जनार्दनः॥ ततस्ते त्वरया युक्ता ममंथुः क्षीरसागरं
॥२२॥ यावद्बहून् नृपश्रेष्ठ बलवंतः सुरासुराः॥ मथ्यमाने नो ततस्तस्मात् क्षीराब्धेरभवन्नृप
॥२३॥ कालकूटमिति ख्यातं विषमत्यंतदुःसहं॥ तं नागाः जगृहुः सर्वे तत्क्षेषं शंकरो गृहीत॥२४॥
नारायणाज्ञया तेन नीलकंठत्वमाप्तवान्॥ ऐरावतश्च नागेंद्रो हरिश्चोच्चैःश्रवाः पुनः॥२५॥ ततो
यावत्कमा राजन् अप्सराश्च सुशोभनाः॥ चतुर्थः पारिजातश्च उत्पन्नः समहाद्रुमः॥२६॥ पंचमाद्धि
हिमांशुश्च उदितः क्षीरसागरात्॥ तं नवः शिरसा धत्ते नारी तत् स्वस्तिकं नृप॥२७॥ नानाविधा
नि दिव्यानि रत्नान्याभरणानि च॥ क्षीरोदधेरुत्थिताश्च गंधर्वाश्च सहस्रशः॥२८॥ एतान् दृष्ट्वा ततो
मत्तान् अत्याश्चर्यसमन्वितान्॥ अभवन् जातहर्षास्ते तत्र सर्वे सुरासुराः॥२९॥ देवयज्ञे ततो मे
घास्त्वल्पं वर्षतसंस्थिताः॥ कृत्स्ना तथा च वायुश्च सुखं वाति सुरान् प्रति॥३०॥ विषनिःश्वासवा

तेनवासुकेश्वापरेहताः ॥ निःस्तेजसोऽभवन्दैत्यानिर्वीर्याश्चमहामते ॥ ततःश्रीरुत्थितातस्मात्क्षी-
रोदात्धृतपंकजा ॥ विभ्राजमानाराजेंद्रदिशःसर्वाःस्वतेजसा ॥ ३२ ॥ ततःस्तीर्थोदकैःस्नातादि
व्यवस्त्रैरलंकृता ॥ दिव्यगंधानुलिप्तांगीसुमनोभिःसुभूषिता ॥ ३३ ॥ देवपक्षंसमासाद्यस्थित्वातत्रम
रिंदम ॥ हरिवक्षस्थलंप्राप्ताततःसाकमलालया ॥ ३४ ॥ ततोऽमृतघटंपूर्णंदुग्धांबुपयसोनिधेः ध
न्वंतरिःसमुत्तस्थौततःप्रीताःसुरानृप ॥ ३५ ॥ दैत्याश्रियापरित्यक्ताःदुःखितास्तत्रतेपुनः ॥ नीत्वा
मृतघटंपूर्णंतेचजग्मुर्यथासुखं ॥ ३६ ॥ ततस्त्रीरूपमकरोत्विष्णुर्देवहितायवै ॥ आत्मानंरूप
शार्दूलसर्वलक्षणसंयुतं ॥ ३७ ॥ ततोजगामश्रीभगवान्स्त्रीरूपेणासुरान्प्रति ॥ दिव्यरूपंतुवां
दृष्ट्वामोहितास्तेसुरद्विषः ॥ ३८ ॥ अमृतेनापूर्णकलशोमोहःसंस्थाप्यसत्तमः ॥ कामेनपीडिताह्या
सन्नसुरास्तत्रतत्क्षणात् ॥ ३९ ॥ मोहयित्वातुतानेवमसुरानवनीपते ॥ अमृतंतुसमादाय
देवेभ्यःप्रददौहरिः ॥ ४० ॥ तत्पीत्वातुततोदेवादेवदेवप्रसादतः ॥ बलवंतोमहावीर्यारणेजघ्नुः

स्ततोऽसुरान् ॥ ४१ ॥ जित्वारणेसुरान्देवास्स्वानिराज्यानिचक्रिरे ॥ एतत्तेकथितंराजन्प्रादुर्भावोह
रेरयं ॥ ४२ ॥ कूर्माख्यःपुण्यदोनृणांशृण्वतांपठतामपि ॥ आविःकृतंकौर्ममनंतवर्चसंनारायणेना
द्भुतकर्मकारिणा ॥ ४३ ॥ दिवौकसानांतुहितामयकेवलंरूपंपरंपावनमेवकीर्तितं ॥ ४४ ॥ इ
तिश्रीनरसिंहपुराणेकूर्मप्रादुर्भावः ॥ ॥ श्रीमार्कंडेयउवाच ॥ अतःपरंहरेःपुण्यंप्रादुर्भावंनरा
धिप ॥ वाराहंतेप्रवक्ष्यामिसमाहितमनाःशृणु ॥ १ ॥ अवांतप्रलयेप्राप्तेब्रह्मणस्तुदिनक्षये ॥ त्रैलो
क्यमखिलंव्याप्यतिष्ठंत्यंभांसिसत्तम ॥ २ ॥ त्रैलोक्येखिलसत्वानियानिराजेंद्रतानिवै ॥ यस्माद्विष्णु
स्ततःशेतेतस्मिन्नेकार्णवेजले ॥ ३ ॥ अनंतभोगशयनेसहस्रफणशोभिते ॥ रात्रिंयुगसहस्रांतां
ब्रह्मरूपीजगत्पतिः ॥ ४ ॥ दितेःपुत्रोमहानासीत्कश्यपादितिनःश्रुतं ॥ हिरण्याक्षइतिख्यातोम
हाबलपराक्रमः ॥ ५ ॥ अपन्नमेपरिस्थित्वाममर्त्यायस्यंतिदेवताः ॥ तेनतेषांबलंवीर्यंतेजश्चापिन
विष्यति ॥ इतिमत्वाहिरण्याक्षःकृतेसर्गेतुब्रह्मणः ॥ रसेर्याधारणाशक्तिंस्तांनीत्वासमहासुरः ॥ ६

विवेवेशसौ यमध्ये पुरसातलतलं नृप ॥ विनाशाय च जगती प्रविवेश रसातलं ॥ ८ ॥ निशावसाने
सर्वात्मा कल्पिता मेदिनीति वै ॥ संचिंत्य ज्ञात्वा योगेन रसातलगतां ॥ ९ ॥ आप वेदमयं रूप
पं वाराहं वपुरास्थितः ॥ वेदपादं यूपदंष्ट्रं क्रतुवक्त्रं नराधिप ॥ १० ॥ अग्निजिह्वं स्रुचतुंडं चंद्रार्क
नयनं महत् ॥ पुत्रे हृद्धर्मश्रवणं दिव्यं तस्याम निःस्वनं ॥ ११ ॥ प्राग्वंशकाय हविर्नासिं कुशादृम
तनूरुहं ॥ सर्ववेदमयं तद्वपु रूपसूक्तमहासत्वं ॥ १२ ॥ नक्षत्रतारकाहारं प्रलयावर्तभूष
णं ॥ इदं कृत्वा तु वाराहं प्रविवेश वृषाकपि ॥ १३ ॥ रसातलं नृप श्रेष्ठ सनकाद्यैरभिष्टुतः ॥ प्र
विश्य च हिरण्याक्षं युद्धे जित्वा वृषाकपिः ॥ १४ ॥ दंष्ट्राग्रेण च पृथिवीं समुद्धत्य रसातलात् ॥ स्तू
यमानो मरगणैः स्थापयामास पूर्ववत् ॥ १५ ॥ संस्थाप्य पर्वतान्सर्वान्यथास्थानमकल्पयत ॥ राम० १५
॥ रिविहाय रूपवाराहं तीर्थे कोकेति विश्रुते ॥ १६ ॥ वैष्णवानां हितार्थाय वसंत्वं तत्र गुह्यमुत्तमं ॥ ब्रह्म
रूपं च मास्थाय पुनः सृष्टिं चकार सः ॥ १७ ॥ विष्णुः पाति जगत्सर्वं रुद्ररूपी संहरेत् ॥ वेदांतवेद्यो

पुरुषो वृषाकपेः कथामि मां यः शृणोति मानवः ॥ दृढां मतिं यज्ञतनौ निवेश्य वै विहाय पापं च न
रो हरिं व्रजेत् ॥ १८ ॥ इति नरसिंहपुराणे वाराहप्रादुर्भावः ॥ ॥ श्रीमार्कंडेय उवाच ॥ वाराहा
हः कथितो ह्येवं प्रादुर्भावो हरेस्तव ॥ सांप्रतं नारसिंहं तु प्रवक्ष्यामि निबोध मे ॥ १ ॥ दितेः पुत्रो म
हानासीत् हिरण्यकशिपुः पुरा ॥ तपस्तेपे निराहारो बहुवर्षसहस्रकं ॥ २ ॥ तपसा तस्य संतुष्टो
ब्रह्मा तं प्राह दानवं ॥ वरं वरय दैत्येंद्र यस्ते मनसि वर्त्तते ॥ ३ ॥ इत्युक्तो ब्रह्मणा दैत्यो हिरण्यकशि
पुः पुरा ॥ उवाच नत्वा देवेशं ब्रह्माणं विनयान्वितः ॥ ४ ॥ हिरण्यकशिपुरुवाच ॥ यदि त्वं वरदा
नाय प्रवृत्तोऽसि जगन्मम ॥ यद्यद्वृणोम्यहं ब्रह्मन् तत्तन्मे दातुमर्हसि ॥ न शुष्केण न चार्द्रेण न जले
न न वह्निना ॥ न काष्ठेन च कीलेन न पाषाणेन वायुना ॥ ६ ॥ नायुधेन न शूलेन न शैलेन न मानु
षैः ॥ न सुरैरसुरैर्वापि न गंधर्वैर्न राक्षसैः ॥ ७ ॥ न किन्नरैर्न पक्षेस्तु विद्याधरभुजंगमैः ॥ न चार
ण्यैर्मृगैर्वापि न वा मातृगणैरपि ॥ ८ ॥ नाभ्यंतरे न बाह्ये तु नान्यैर्मरणहेतुभिः ॥ न दिने न च रा

न॰पु॰
७६

नौमैचत्वत्प्रसादाद्भवेन्मतिः ॥ इतिवैदेववरेवेशवरंदृष्ट्वोवृणोम्यहं ॥ मार्कंडेयउवाच इत्युक्तोदैत्यरा
जेनब्रह्मानंप्राहपार्थिवं ॥ १० ॥ तपसातचतुष्टोहंमहतातुवरानिमान् ॥ दुर्लभानपिदैत्येयद
दामिपरमाद्भुतान् ॥ ११ ॥ अन्येषांनेदृशंदत्तंतैरिक्थंनतपःकृतं ॥ त्वत्प्रार्थितंमयादत्तंसर्वं
तेचास्तुदैत्यप ॥ १२ ॥ गच्छभुंक्ष्वमहाबाहोतपसामूर्जितंफलं ॥ इत्येवंदैत्यराजस्यहिरण्यक
शिपोःपुरा ॥ दत्वावरान्ययौब्रह्माब्रह्मलोकमनुत्तमं ॥ सोपिलब्धवरोदैत्योब्रह्मणोबलद
र्पितः ॥ १४ ॥ देवान्सर्वान्रणेजित्वादिवःप्राच्यावयद्भुवि ॥ देवराज्यंस्वयंचक्रेसर्वशक्तिसम
न्वितं ॥ १५ ॥ देवाअपिभयात्तस्यरुद्राश्चवर्षयोन्नृप ॥ विचेरुरवनौसर्वेबिभ्राणामानुषींत
नुं ॥ १६ ॥ प्राप्तत्रैलोक्यराज्योसौहिरण्यकशिपुःप्रजाः ॥ आहूयसर्वराजेंद्रवाक्यंचेदमभाष राम॰
त ॥ नयष्टव्यंनहोतव्यंनदातव्यंसुरान्प्रति ॥ युष्माभिरहमेवाद्यत्रैलोक्याधिपतिःप्रजाः ॥ ७६
॥ १८ ॥ ममैवपूजांकुरुतयज्ञदानादिकर्मणा ॥ तांश्चसर्वास्तपाचक्रुःदैत्येंद्रस्यभयान्नृप १९

तत्रैवंक्रियमाणेतुत्रैलोक्यंसचराचरं ॥ अधर्मयुक्तंसकलंबभूवनृपसत्तम ॥ २० ॥ स्वधर्मलोपा
त्सर्वेषांपापेमतिरजायत ॥ गतेकालेतुमहतिदेवाःसेंद्राबृहस्पतिं ॥ २१ ॥ नीतिज्ञंसर्वशास्त्रज्ञंप
प्रच्छुर्विनयान्विताः ॥ हिरण्यकशिपोरस्यविनाशंमुनिसत्तम ॥ त्रैलोक्यहारिणःशीघ्रंवधोपायं
वदस्वनः ॥ बृहस्पतिरुवाच ॥ शृणुध्वंममवाक्यानिस्वपदप्राप्तयेसुराः ॥ प्रायोहिरण्यकशि
पुःक्षीणभाग्योमहासुरः ॥ कालान्निमित्ताज्ञवयंलक्षामस्तद्वयंसुराः ॥ बुधाश्चसर्वेसर्वत्रास्थि
ताश्चसंतिनिस्पृशः ॥ अचिरादेवदृश्येतेनशांतिकुटंबतः ॥ देवानांतुपरामृद्धिंस्वपदप्रा
प्तिलक्षणांहिरण्यकशिपोर्नाशंशकुनानिवदंतिमे ॥ २६ ॥ यतएवमतोदेवाःसर्वेगच्छतमाचि
रं ॥ क्षीरोदस्योत्तरंतीरंप्रसुप्तोयत्रकेशवः ॥ युष्माभिःसंस्तुतोदेवःप्रसन्नोपवतिक्षणात् ॥ तस्मि
न्प्रसन्नोदैत्यस्यवधोपायंवदिष्यति ॥ २८ ॥ इत्युक्तास्तेनतेदेवासाधुसाध्वितिप्राब्रुवन् ॥ प्री
त्याचपरयायुक्ताःकर्तुंगंतुंचक्रुरपोद्यमं ॥ २९ ॥ पुष्येतिथौशुभेलग्नेपुण्याहस्वस्तिमंगलं ॥ का

रपित्वामुनिवरैः प्रस्थितास्तेदिवौकसः ॥ ३० ॥ नारायणमहादेवसस्त्वविष्णुस्त्वेनपोत्तम ॥ ते
शर्वमग्रतः कृत्वा क्षीराब्धेरुत्तरं तटं ॥ ३१ ॥ तत्रगत्वासुराः सर्वे विष्णुं जिष्णुं जनार्दनं
॥ अस्तुवन्विविधैस्तोत्रैः पूजयंतः प्रतस्थिरे ॥ ३२ ॥ ततोपिभगवान्शंभुःप्राहभगवंतंज
नार्दनं ॥ अस्तुवन्नामभिः पुण्यैः एकाग्रमनसाहरिं ॥ ३३ ॥ श्रीमहादेवउवाच ॥ वि
ष्णुर्जिष्णुर्विभुर्वीर्यं यज्ञो यज्ञेशो यज्ञपालकः ॥ प्रभविष्णुर्ग्रसिष्णुश्च लोकात्मा लोकपाल
कः ॥ ३४ ॥ केशवः केशिहा कल्पः सर्वकारणकारणं ॥ कार्यकृद्वामताधीशो वासुदेवः
पुरुष्टुतः ॥ ३५ ॥ आदिकर्ता वराहश्च माधवो मधुसूदनः ॥ नारायणो नरो हंसो विष्व
सेनो हुताशनः ॥ ज्योतिष्मान्द्युतिमान्श्रीमान्आयुष्मान्पुरुषोत्तमः ॥ वैकुंठः
पुंडरीकाक्षः कृष्णः सूर्यः सुरार्चितः ॥ नरसिंहो महाभीमो वज्रदंष्ट्रो नखायुधः ॥
आदिदेवो जगत्कर्ता योगेशो गरुडध्वजः ॥ ३७ ॥ गोविंदो गोपतिर्गोप्ता भूपतिर्भुवने

श्वरः ॥ पद्मनाभो हृषीकेशो दामोदरो हरिः अजः ॥ ३८ ॥ त्रिविक्रमस्त्रिलोकेशः ब्रह्मेशः
प्रीतिवर्द्धनः ॥ वामनो दुष्टदमनो गोविंदो गोपवल्लभः ॥ ३९ ॥ भक्तिप्रियोच्युतः सत्यस
त्यकीर्तिर्धृतिः शुचिः ॥ कारुण्यः करुणो व्यासः पापहा शांतिवर्द्धनं ॥ ४० ॥ सन्यासी शास्त्र
तत्वज्ञो मंदारगिरिकेतनः ॥ बदरीनिलयः शांतः तपस्वी विद्युतप्रभुः ॥ ४१ ॥ भूतावा
सो गुहावासः श्रीनिवासः श्रियः पतिः ॥ तपोवासो दमोवासः सत्यवासः सनातनः ॥ ४२
॥ पुरुषः पुष्कलः पुण्यः पुष्कराक्षो महेश्वरः ॥ पूर्णः पूर्तिः पुराणज्ञः पुण्यदः पुण्यवर्द्धनः ॥ ४३
॥ शंखी चक्री गदी शार्ङ्गी लांगली मुशली हली ॥ किरीटी कुंडली हारी मेखली कवची ध्वजी ॥ ४
४ ॥ जिष्णुर्जेता महावीरः शत्रुघ्नः शत्रुतापनः ॥ शांतः शांतिकरः शास्ता शंकरः शंतनोः सु
तः ॥ ४५ ॥ सारथिः सात्विकः स्वामी सामवेदप्रियः समः ॥ सावनः साहसिः सत्वः संपूर्णांशः
समृद्धिमान् ॥ ४६ ॥ स्वर्गदः कामदः श्रीदः कीर्तिदः कीर्तिनाशनः ॥ मोक्षदः पुंडरीकाक्षः

ह्रीराध्विनतकेतनः ॥ ४७ ॥ स्तुतः सुरासुरैरीशः प्रकरः पापनाशनः ॥ त्वयं सत्त्वं वषट्कार स्त्व
मोंकाररूवमग्नयः ॥ ४८ ॥ त्वंस्वाहा त्वंस्वधा देवा त्वंपुरुषोत्तमः ॥ नमोदेवातिदेवाय विष्णवे
शाश्वताय च ॥ ४९ ॥ अनंतायाप्रमेयाय नमस्ते गरुडध्वज ॥ श्रीभगवानुवाच ॥ युष्माभि
:संस्तुतो देवाः नामभिः केवलैः शुभैः ॥ ५१ ॥ श्रीमार्कंडेयउवाच ॥ इत्येतैर्नामभिर्दिव्यै
संस्तुतो देवैः नैमधुसूदनः ॥ ५० ॥ उवाच प्रकटीभूत्वा देवान्सर्वानिदं वचः ॥ श्रीभगवा
नुवाच ॥ युष्माभिः संस्तुतो देवाः नामभिः केवलैः शुभैः ॥ ५१ ॥ अतएवं प्रसन्नोस्मि कि
मर्थं करवाणि वाः ॥ देवाउचुः ॥ देवदेव हृषीकेश पुंडरीकाक्ष माधव ॥ ५२ ॥ त्वमेव जाना
सि हरे किमस्मान्परिपृच्छसि ॥ श्रीभगवानुवाच ॥ युष्मदागमनं सर्वं जानाम्यसुरसूदना
॥ ५३ ॥ हिरण्यकविनाशार्थं स्तुतोहं सौ शंकरेणतु ॥ पुण्यनामशतेनैव संस्तुतोहं भवेनेच ॥
५४ ॥ एतेनयस्तुयांनित्यंत्वयोक्तेनमहामते ॥ तेनाहंपूजितोनित्यंभवामीह त्वया यथा

॥ ५५ ॥ प्रातोहं गच्छ शंभो त्वं कैलाशशिखरं शुभं ॥ त्वयास्तुतो हनिष्यामि हिरण्यकशिपुं भव ॥ ५
६ ॥ गच्छध्वमधुनादेवाः कालं कंचित्प्रतीक्षतां ॥ यदास्य तनयो धीमान् प्रह्लादो नाम वैष्णवः ॥ ५
७ ॥ तस्य द्रोहं यदा दैत्यः करिष्यति सुतस्य ॥ हनिष्यामि वरैर्गुप्तं अजेयं देवदानवैः ॥ ५ इत्युक्त्वा
विष्णुनादेवानत्वाविष्णुंययुर्नृप ॥ ५८ ॥ इति श्रीनरसिंहपुराणे विष्णोर्नामस्तोत्रं ॥ छ ॥ स
हस्रानीक उवाच ॥ मार्कंडेय महाप्राज्ञ सर्वशास्त्रविशारद ॥ प्रादुर्भावं नृसिंहस्य यथाव
द्वक्तुमर्हसि ॥ १ ॥ वरप्रह्लादचरितं विस्तरेण मम नघ ॥ धन्या वयं महायोगिन्त्वत्प्रसादा
न्महामुने ॥ २ ॥ सुधां पिबामो युष्माकं धन्याः श्रीशाकपाणिधां ॥ श्रीमार्कंडेयउवाच ॥ पुरा हि
रण्यकशिपोस्तपोर्थं गच्छतो वनं ॥ दिग्दाहो भूमिकंपश्च जातस्तस्य महात्मनः ॥ वारितो
बंधुभिर्नसैमित्रैश्च हितकारिभिः ॥ शकुनाप्यगुणाराजन् जाता तत्र वनशोभनं ॥ त्रिलो
काधिपतिस्त्वं हि सर्वे देवाः पराजिताः ॥ ५ ॥ तवास्ति तप्यं सौम्य किमर्थं तप्यते तपः ॥ प्र

योजनंनपश्यामोवयंबुध्यासमन्वितः॥६॥योनवेत्पूनकामोनातपश्चर्यांकरोतिसः॥एवंतैर्वा
र्यमाणोऽपिदुर्मदोमदमोहितः॥७॥गतःकैलाशशिखरंद्वित्रैर्मित्रैःपरिस्कृतः॥तस्यसंतप्यमा
नस्यतपःपरमदुःकरं॥८॥चिंताजातामहीपालविरंचेःपद्मजन्मनः॥किंकरोमिकथंदैत्य
स्तपसोविनिवर्त्तते॥९॥इतिचिंताकुलस्येवब्रह्मणोंगसमुद्भवः॥प्रणम्यप्राहनृपाजना
रदोमुनिसत्तम॥१०॥नारदउवाच॥किमर्थंसिद्यसेतातनारायणपरायण॥येषांमेमसिर
गोविंदोतेवैनार्हंतिशोचितुं॥११॥अहमावारयिष्यामितासंदितिनंदनं॥नारायणेजग
स्वामीमतिमेसप्रदास्यति॥१२॥मार्कंडेयउवाच॥इत्युक्त्वानम्यपितरंवासुदेवंहृदिस्मरन्
प्रयातःपर्वतेनैवसार्द्धंसमुनिपुंगवः॥१३॥कलविंकौतुतौभूत्वाकैलाशंपर्वतोत्तमं॥यत्रा
स्तेदितिजश्रेष्ठोद्वित्रैर्मित्रैःपरीवृतः॥कलत्वातौमुनिस्तत्रवृक्षशाखांसमाश्रितः॥श्रृण्वत
स्तस्यदैत्यस्यप्राहगंभीरयागिरा॥नमोनारायणायेतिपुनःपुनरुदारधीः॥१८॥त्रिवारंप्रजपि

त्वावैनारदोमौनमाश्रितः॥तच्छ्रुत्वावचनंतस्यकलविंकस्यसादरं॥हिरण्यकशिपुर्दैत्यःकु
द्धश्चापंसमाददे॥१७॥बाणंधनुषिसंधायप्रयावन्मुंचतितंप्रति॥तावदुड्डीयतौभूपगतौनारद
पर्वतौ॥१८॥सोपिक्रोधपरीतांगोहिरण्यकशिपुस्तदा॥त्यक्त्वातमाश्रमंभूयोनगरंस्वंमहीप
ते॥१९॥तस्यापिभार्यासुश्रोणीकयाधूर्नाममनामतः॥तदाराजस्वलास्नात्वाताभूद्देवयो
गतः॥रात्रावेकांतसमयेतयापृष्टःसदैत्यराट्॥स्वामिन्यदातपश्चर्यांकर्तुंगेहाद्वनंगतः॥त
दात्वयोक्तंवर्षाणामयुतंमेतपस्विदं॥तत्किमर्थंमहाराजसांप्रतंसंकृतवान्व्रतं॥तथ्यंकथयमे
नाथत्वेहात्तुध्यामिदैत्यप॥हिरण्यकशिपुरुवाच॥श्रृणुचार्वंगिमेतथ्यांवाचंव्रतविनाशिनी
क्रोधस्यातीवजननींदेवानांमुदवर्द्धनीं॥कैलाशशिखरेरम्येदेविमहदानंदकानने॥सुखंसमुप
विष्टस्यपश्यतःकाननंशुभं॥दृष्टौमेरक्तपीतांगौकलविंकौवराननें॥व्याहरंतौशुभांवाणीनमो
नारायणेतिच॥वारद्वयंत्रयंचेठिव्याहृतंवचनंशुभे॥तेनमेमनसिक्रोधोजातोतीवववरान

ने कोदंडेशरमाधाय यवेन्मुचाभिन्नामिनि । तावन्नोपन्हिणोन्नीतौ गतो देशांतरं त्वहं । त्यक्त्वा व्रतंस
मायातोन्नाविकार्यबलेनवै । मार्कंडेयउवाच । इत्युच्यमानेवचनेवीर्यस्य वोन्नवन्नदा । ऋतुकाले
तु संप्राप्तो जातो गर्भस्तदेवहि । पुनः प्रवर्त्तमानस्य गर्भे गर्भस्य धीमतः । नारदस्योपदेशेन वैष्ण
वः समजायत । तदग्रे कथयिष्यामि नृपश्रद्धापरो भव । तस्य सुनुरभूद्युक्तः प्रह्लादो जन्मवैष्णवः ।
३१ सोवर्द्धतासुरकुले निर्मलो मलिनाश्रये । यथा कलौ हरेर्भक्तिः पाशसंसारमोचनी । ३२ सव
र्द्धमानोविरराज बालाः सहत्रयीनाथपराजन्मना । बालोपि देहो महतीमहात्मा विस्तारयन्भा
तिसविष्णुभक्तिं । ३३ यथा चतुर्थयुगमाप्य धर्मकामार्च्यमोक्षं किलकीर्तितो हरिः । सबाल
लीलासु सहान्यडिंभैः प्रहेलिकाक्रीडनकेषु नित्यं । ३४ कथाप्रसंगेषु च कृष्णमेव प्रोवाच
यस्मात्सहितस्वभावः । इत्थं शिशुत्वेपि विचित्रकारी व्यवर्द्धते शुक्लशरण्यमताईः । ३५ तं पञ्चव
र्षदैत्येंद्रः कदाचित्स्वीकृतः पितः । बालं गुरुगृहायातं ददर्श स्वायतेक्षणं । ३६ गृहीत्वा तु क

रे पात्रं घटिकायाः सुशोभनं । मूर्द्ध्नि चक्रं कितायदौ कृष्णनामांकितादरात् । ३७ तमाह्य पुत्र
विष्णोलालयन्प्राह पुत्रकं । पुत्रते जननी नित्यं सुधीर्मे पुत्रशंसति । अपतद्धृदयल्लिं चित्र गुरुवेश्म
निशिहितं । त्विचार्यानंदजननं सम्यग्गायातिठद्वद । ३९ अथाह पितरं हर्षात्प्रह्लादो जन्मवैष्णवः ।
गोविंदे त्रिजगद्वंद्ये प्रभुं नत्वाब्रवीमिते । ४० श्रुत्वाह पितरं हर्षाद् इतिशत्रोस्तवंश्च त्वापुत्रोकं स्त्री
वृठः खलः । क्रुद्धो पितं वंचवितुं जहासोच्चैः प्ररूरूवत् । ४१ आलिंग्य तनयं प्राह शृणु बालहि
तं वचः । रामगोविंदकृष्णेति विष्णो माधव श्रीपते । ४२ एवं वदंतिये सर्वे ते पुत्र मम वैरिणः
शासितास्तु मवेदानीं त्वयेदं कुश्रुतं वचः । पितुर्वचनमाकर्ण्य धीमान्नयसंयुतः । प्रह्लाद
प्राह हे आर्य मैवं ब्रूयाः कदाचन । ४४ सर्वैश्वर्यप्रदं मंत्रं धर्मादिपरिवर्द्धनं । कृष्णकृष्णेति ये
ब्रूयात्सोन्नयं विंदते पदं । ४५ कृष्णनिंदासमुत्थस्य अत्रस्यांतोन विद्यते । राममाधवकृष्णे
ति स्मरन्मन्नात्मशुद्धये । ४६ गुरवेपि ब्रवीम्येतत्त्वयतो हितकरं परं । शरणं व्रज सर्वेशं सर्वपाप

नृपु० ८१

नृपंकरं ॥ ४७ ॥ अथाह च कटक्रोधः सुरारिर्निर्भर्त्सयन्सुतं ॥ धिक्धिक् हा हे तिदुःपुत्र किंमेत्कृतमघं
महत् ॥ ४८ ॥ माहि याहि दुराचार पापिष्ठ पुरुषाधम ॥ उक्केति परितो वीक्ष्य पुनराह शिरोगुरुः ॥ ४
९ ॥ बध्याचानीयतां दैत्यैः क्रूरैः क्रूरपराक्रमैः ॥ धीमान्नृचेरवलं भूय दैवांतकपरीक्षितां ॥ ५० ॥
लीलयैव जितं दैत्यैर्लोकान्निखिलांस्त्वया ॥ असत्कृत्ताहि रोषेण किं क्रुद्धस्य ककेमयि ॥ ५१ ॥ इ
ति साम वचः श्रुत्वा द्विजोक्तं प्राह दैत्यराट् ॥ विष्णुस्त्वं मम सुतं पाप बालमपि पतः ॥ ५२ ॥ उ
क्केति तनयं प्राह राजा साम्नामलं सुतं ॥ ममात्मजस्य किं जातं तवचैतत् द्विजैः कृतं ॥ विष्णु
पक्षैर्धविधूर्तैः गूढं तिष्ठं यसि ॥ त्यज द्विजप्रसंगं तं द्विजसंगो ह्यशोभनः ॥ अस्माकं कुलजीवितं ते
येर्द्विजैस्तु तिरोहितं ॥ यस्य यस्य संगतिः पुंसो मणिवत्स्यात् स तद्गुणः ॥ ५५ ॥ स्वकुलर्द्धं ततो धीमा
न्स्वयमेव समाश्रयेत् ॥ मत्सुतस्योचितं त्यक्त्वा विष्णुपक्षीयनाशनः ॥ ५६ ॥ स्वयमेव प्रजान्वि
ष्णुं मंदकिं त्वं न लज्जसे ॥ विश्वनाथस्य मे सूनुर्भूत्वान्यं नाथमिच्छसि ॥ ५७ ॥ शृणु वत्स जगत्त्र

राम० ८१

त्वं कश्चिन्नास्ति निजः प्रभुः ॥ यः शूरः स श्रियं भुंक्ते स प्रभुः स महेश्वरः ॥ स देवः स कलाध्यक्षः य
थाहं त्रिजगज्जयी ॥ त्यज जाड्यमतः शौर्यं भज स्तत्त्व कुतो चितं ॥ ५९ ॥ अन्येपि त्वां हनिष्यंति ब
दिष्यंति जनाखिदं ॥ असुरोयं सुरांस्तौति मार्जार इव मूषकान् ॥ ६० ॥ दैत्यान् शिवावर्मणि नो
दुर्न्निमित्तमिदं ध्रुवं ॥ लध्वापि महदैश्वर्यं लाघवं यात्यबुद्धयः ॥ ६१ ॥ यथायं मत्सुतस्तुत्या
स्तावकान्स्तौति नीचवत् ॥ रे मंद दृष्ट्वाप्यैश्वर्यं मम ब्रूषे पुरो हरि ॥ ६२ ॥ अस्माद्गस्य तु हरेस्तु
ति रेषा विडंबना ॥ इत्युक्त्वा तनयं नृप जातक्रोधो भयानकः ॥ ६३ ॥ जिद्धं निरीक्ष्य च प्राह तत्रु
रुं कंपयन्रुषा ॥ या हि या हि द्विजपशो साधु शास्ति सुतं मम ॥ ६४ ॥ प्रसाद इत्येष वदन्सवि
प्रो जगाम गेहं खलराजसेवि ॥ विष्णुं विसृज्या च सरश्च तं किं वानकुर्युर्नरणायलुब्धा ॥ ६५ ॥ इ
ति श्रीनरसिंहपुराणे नृसिंहप्रादुर्भावे ॥ ॥ सोप्याश्रुनीतो गुरुवेश्म दैत्यैः दैत्यैः सूनुर्हरि
भक्तिभूषः ॥ अशेषविद्यानवहेनसाकं काजेन कौमारमवापयोगी ॥ १ ॥ प्रायेण कौमारमवा

न॰पु॰ प्पजोकः पुष्णाति नास्तिकामसरतिं च ॥ तस्मिंश्च यस्य इस्य बहिर्विरक्तिः पुत्र तस्य चित्रमजे चमक्ति
९२ ॥ २ ॥ अथ संपूर्णविद्यं तं कदाचिद्दितिजेश्वरः ॥ अनाय्य प्राणतं प्राह प्रह्लादं विदितेश्वरं ॥ ३ ॥ सा
धु ज्ञाननिधे बाल्ये तत्पुत्रकोसि सुरसद्दर्शन ॥ इदानीं त्वाजसस्त्रास्त्वान् नीहारादिव निर्गतः ॥ ४ ॥ बा
ल्ये वयं चलमिव द्विजैर्जाड्याय मोहिताः ॥ वयसा वर्द्धमानेन पुत्र केवं सुशिक्षिताः ॥ ५ ॥ तदद्य त्व
पियुंधुर्येहं सर्वकंटकनाशुरं ॥ विन्यस्य स्थाचिरधृतां सुखी पश्यन् श्रियं तव ॥ ६ ॥ यदा यदा हि
नैपुण्यं पिता पुत्रस्य पश्यति ॥ तदा तदाधिंत्यल्कानुमहःसौख्यमवाप्नुयात् ॥ ७ ॥ गुरुश्चातीव
नैपुण्यं ममाग्रे वर्णयन् तव ॥ न चित्रं पुत्र तत् श्रोतुं किं तु मेवांछितः श्रुती ॥ ८ ॥ नेत्रयोः शत्रु
दारिद्र्यं श्रोत्रयोः सुतसूक्तयः ॥ युद्धव्रणं च गात्रेषु मानिनां च महोत्सवं ॥ ९ ॥ श्रुत्वेति निश्चिति राम॰
प्रतं दैत्याधिपवचस्ततः ॥ जगाद योगी निःशंकः प्रह्लादः प्रणतो गुरुं ॥ १० ॥ सत्कृयः श्रोत्रयोः ९२
सत्यं महाराज महोत्सवः किं तु ता वैष्णवी वांचो मुक्ता मान्या विचारयन् ॥ ११ ॥ नीतिः सूक्तिः कथा

ःश्रमं श्राव्यं काव्यं च तद्वचः ॥ यत्र संसृतिदुःखौघकृद्गानिगीयते हरिः ॥ १२ ॥ अचिंत्यः सूयते य
त्र लास्त्रकेप्सितु प्रदः ॥ अर्थशास्त्रेण किं तात यत्र संसृति संततिः ॥ १३ ॥ शास्त्रश्रमेण किं ता
त येनात्मैव विहस्यते ॥ वैष्णवं वाङ्मयं तस्मात् श्राव्यं सेव्यं च सर्वदा ॥ १४ ॥ मुमुक्षुर्नित्यं क्ले
शात् नो चेन्नैव सुखी भवेत् ॥ इति तस्य वचः श्रुत्वा एवं हिरण्यकशिपुस्तदा ॥ १५ ॥ जज्वाल दैत्यरा
ट् तप्तसर्पिरङ्गिरिवाधिवं ॥ प्रह्लादस्य गिरं पुण्यां जनसंसृतिनाशिनीं ॥ १६ ॥ नामृष्यतासुरः क्रु
द्धो घूको भासु प्रभामिव ॥ परितो वीक्ष्य स प्राह क्रुद्धो दैत्यभटानिदं ॥ १७ ॥ हन्यतामेष कुटिलः श
त्रुघातेसु नीचरैः ॥ उक्ते सोक्ते तस मर्माणि रक्षति तान्तु रिस्वयं ॥ १८ ॥ पश्यल्विदानीमेवैष हरिं
संस्तवजं फलं ॥ काकोलकं कग्रधेभ्योद्य स्यां गसंविभज्यतां ॥ १९ ॥ अपीद्य तात्राद् दैत्येयाः
तर्जयंतः प्रगर्जितैः ॥ अभ्यकृतस्य प्रियं सक्तं तं जघ्नुः पतिनोदिताः ॥ २० ॥ प्रह्लादोपि प्रभुं नत्वा
ध्यानवज्रं समाददे ॥ अहतिविमर संसक्तं न भिन्नं ध्याननिश्चलं ॥ २१ ॥ ररहहगवान्विष्णुः

न०पु०
९३

प्रह्लादंतनयं उरवन्नत् ॥ अथपजध्वपद्मान्यस्यगात्रे शस्त्राणि रक्षसां ॥ २२ ॥ नीलाब्जदलशकलानीवयेनु
छिन्नान्यनेकधा ॥ किं धान्नतानि शस्त्राणि करिष्यंति हरिप्रियं ॥ २३ ॥ तापत्रयमहास्त्रौघः सर्वोऽप्य
स्माद्विनेति वै ॥ पीडयंति जनांस्तावन्न्याधयो राक्षसाः ग्रहाः ॥ २४ ॥ यावद्गुहाशयं विष्णुं श्रुद्धसं
चेतो न विंदति ॥ ततस्तस्मात्स्त्रशाकलैः पतीपोन्वैरितस्ततः ॥ २५ ॥ हन्यमानोऽप्यवन्नंतस्य द्यःफल
द्दैरिव ॥ नाचचित्रं विबुधानां तद्दृत्तानां विस्मयावहं ॥ २६ ॥ वैष्णवं बलमालोक्य राजा नूनं नयं द
धौ ॥ पुनस्तस्य वधोपायं चिंतयन्नसुरोत्तमः ॥ २७ ॥ सस्याज्ञवद्भिरचिरात् हन्यतां गरलायुधाः
हिरण्यकशिपोः श्रुत्वा वचनं ते भुजंगमाः ॥ २८ ✦ समादिशत्समाहूय दंदशूकानसुरो विषान्
अशस्त्रवध्योऽप्ययमस्य योऽहरितोषकृत ॥ २९ ✦ तस्मात्त्वं जगरहुर्मूर्ध्वप्रहर्षाद्दशवर्तिनिः
अथ ज्वलद्दशनकरालदंष्ट्रिणः स्फुरत्स्फुरद्रसनसहस्रभीषणाः ॥ अकर्णका हरिमहिमस्वक
तं दुष्टं राघवस्यापि कारिणं ॥ ततो सौ सर्वदेवैस्तु देवलोकाद्बहिः कृतः ॥ ११ ॥ पुनः स सोप्यपतद्रामं
राजानं शरणं गतः ॥ त्राहि राम महाबाहो अस्मानापकारिणं ॥ १२ ॥ इति ब्रुवंतमाह रामः
कमललोचनः ॥ अमोघोयं मम वास्त्रं संगमेकं प्रयच्छ वै ॥ १३ ॥ ततो जीवसि दुष्ट त्वं अपका
रं महत्कृतं ॥ इत्युक्तो सौ स्वकं नेत्रमेकमस्त्राय दत्तवान् ॥ १४ ॥ अस्त्रस्तन्नेत्रमेकं तु भस्मी
कृत्य समाययौ ॥ ततः प्रभृति काकानां सर्वेषामेकनेत्रता ॥ १५ ॥ चक्षुषैकेन पश्यंति हे
तुना तेन पार्थिव ॥ उषित्वा तत्र सुचिरं चित्रकूटे स राघव ॥ १६ ॥ जगाम दंडकारण्यं ना
नामुनिनिषेवितं ॥ सभ्रातृकः सभार्यश्च तापसं वेषमास्थितः ॥ १७ ॥ धनुःप्रवरपाणि
श्च सेषुधीश्च महाबलः ॥ ततो ददर्श तेजस्कांतस्तत्र तान्महामुनीन् ॥ १८ ॥ अश्मकुट्टान
नेकाश्च दंतोलूखलिनस्तथा ॥ चतुर्थकालिकानन्यान् एवमुग्रतपश्चरान् ॥ १९ ॥ तान्
दृष्ट्वा प्रणिपत्यासौ वीरामस्तैश्चाभिनंदितः ॥ ततो विललवनं दृष्ट्वा रामः साक्षात्कृनाद्दने ॥ २० ॥ राम॰
१११

नोऽश्रात्रभार्यासहायश्च संचरन्स्ते महाबलः ॥ दर्शयित्वा तु सीतायाः वनं कुसुमितं शुभं
२१ ॥ नानाश्चर्यसमायुक्तं शनैर्गच्छन्सहद्रवान् ॥ ऋक्षं सागरकूलनेत्रं तु शैलस्थूलसमाननं ॥ २२ ॥ राम॰
श्रुत्वा दृष्ट्वा महाबाहुः संध्याघनशिरोरुहं ॥ मेघस्वनं सापराधं शरं संधाय राघवः ॥ २३ ॥ विद्धोत्रा १११
धाराहसंक्रोधात्लक्ष्मणेन सह प्रभुः ॥ अन्यैरवध्यं हत्वा तं गिरिगर्ते महातनुं ॥ २४ ॥ शरभा
शिरोधा भगजवानत्र शरभंगाश्रमं ततः ॥ तं नत्वा तत्र विश्रम्य तत्कृपात्तु शमानसः ॥ २५ ॥ ती
क्ष्णाश्रममुपागम्य ददृशुस्ते सं महामुनिं ॥ तेनादिष्टेन मार्गेण गत्वागस्त्यं ददर्श ह ॥ २६ ॥ ख
ड्गं तु विमलं तस्मात् अवाप रघुनंदनः ॥ इषुधिं चाक्षयशरान् चापं चैव तु वैष्णवं ॥ २७ ॥ ततो ग
त्वाश्रमात्तस्मात् भार्यासमन्वितः ॥ गोदावर्याः समीपे तु पंचवट्यामुवास सः ॥ २८ ॥ ततो
जटायुस्ते न रामः कमललोचनं ॥ नत्वा स्वकुलमाख्याय रक्षितवान् रघुनायकः ॥ २९ ॥ रामो
पितृसखं दृष्ट्वा लाल्यमानं विशेषतः ॥ कथयित्वा तु तं प्राह सीतां रक्ष महामते ॥ ३० ॥ इत्युक्तो

सोऽजराद्यस्तु राममालिंग्य सादरं । कार्यार्थं तु गते रामे भ्रात्रा सह वनांतरं ॥ ३१ ॥ अत्रेर्हरस्मामिते
नार्यां सीतामनुशोचन । इत्युक्त्वागतवान्रामं गृध्रराजः स्वमाश्रमं ॥ ३२ ॥ समीपे दक्षिणे भागे
तानापक्षिनिषेविते । वसंतं राघवं तत्र सीतया सह कानने ॥ ३३ ॥ यन्मय्याकारसदृशं कप
यंती महाकपाः । कृत्वा मायामयं रूपं लावण्यगुणसंयुतं ॥ ३४ ॥ मदनाक्रांतहृदया कदा
चिद्रावणानुजा । गायंती सुस्वरं गीतं शनैरागात्स राक्षसी ॥ ३५ ॥ ददर्श राममासीनं कानने
न सीतया सह । स्वरूपस्य वर्णावघोरा मायारूपधरा शुभा ॥ ३६ ॥ निःशंकाउपविन्नास्य राघ
वं प्रत्यभाषत । भजस्व मां कांत कल्याणीं भजंतीं कामिनीमिह ॥ ३७ ॥ भजमानां त्यजेद्यस्तु त
स्य दोषो महान्भवेत् । इत्युक्तः स शूर्पणखया रामस्तामाह मालिनी । कलत्रवानहं बाले क
नीयांसं भजस्व मे । शूर्पणखुवाच । यथास्याद्यलक्ष्मणो भन्मानिष्यात्त्वं देहि पत्रकं । तथैव
मुक्त्वा मतिमान् रामः कमललोचनः ॥ ३९ ॥ विलोक्यानासिकमितिमोहभ्यानात्र संश

यः । इति रामो महाराज लिख्य पत्रं प्रदत्तवान् ॥ ४० ॥ सा गृहीत्वा तु तत्पत्रं गत्वा तस्मान्मुदान्वि
ता । गत्वा ददत्वती तद्धत्ल लक्ष्मणाय महात्मने ॥ ४१ ॥ तं दृष्ट्वा लक्ष्मणः प्राह रामं रुष्टो कामरूपि
णी । नत्वा जगौ राघववचो भयासं तिवृत्ता वशी ॥ ४२ ॥ तां च गृह्य ततः खड्गं तु धर्मविमलं सुधी
: । तेन तत्कर्णनासां तु तिच्छेद तिलखंडवत् ॥ ४३ ॥ छिन्ननासा ततः सा तु रुरोद स्वरयाऽः खि
ता । हा दशास्य मम भ्रातः सर्वदेवविमर्दक ॥ ४४ ॥ हा कुंभकर्ण नंककर्णीययाता मे चापदापरा
हा हा कष्टं गुणनिधे विभीषण सहामते ॥ ४५ ॥ इत्येवमार्ता रुदती सा गत्वा खरदूषणौ । त्रि
शिरसं च सा दृष्ट्वा निवेद्यात्मपराभवं ॥ ४६ ॥ राममाह जनस्थाने भ्रात्रा सह महाबलं । श्रुत्वा
ते राघवं क्रुद्धाः प्रेषयामासरूर्जितान् ॥ ४७ ॥ चतुर्दश सहस्राणि राक्षसानां बलीयसां । स्वयं
निजग्मुस्ते नैव राक्षसां नायका स्त्रियः ॥ ४८ ॥ रावणेन नियुक्तास्ते पुरैव तु महाबलाः । रुद
ती मग्न दग्धांगी गता भगिनी रावणस्य तु ॥ ४९ ॥ रामोपि तद्बलं दृष्ट्वा राक्षसानां महाबलं । हरेणेन

निहतं तेन शरैरग्निशिखोपमैः ॥ ५० ॥ पश्चान्निहतस्तेन दूषणश्च महाबलः ॥ त्रिशराश्च महारौद्रो रणे
मे रामेण पातितः ॥ ५१ ॥ हत्वा तान् राक्षसान् दुष्टान् रामश्चाश्रममाविशत् ॥ सूर्पणखापि रुदती
रावणांतिकमुपागता ॥ छिन्ननासां तु तां दृष्ट्वा रावणो भगिनीं निजां ॥ ५४ ॥ मारीचं प्राह दुर्बुद्धिः सी
ताहरणकर्मणि ॥ पुष्पकेन विमानेन गत्वाहं त्वं च मातुल ॥ ५५ ॥ जनस्थानसमीपे तु स्थित्वा तत्र
मम तथा ॥ सौवर्णमृगरूपं त्वं आस्थाय तु शनैः शनैः ॥ ५६ ॥ गच्छ त्वं तत्र कार्यार्थं यत्र सीता
व्यवस्थिता ॥ दृष्ट्वा सा मृगपोतं त्वां सौवर्णं त्वद्वि मातुल ॥ ५७ ॥ स्पृहां करिष्यते रामं प्रेषयिष्यति बं
धने ॥ तथा त्वा तत्र गच्छं तं धावस्व गहने वने ॥ ५८ ॥ लक्ष्मणस्यापकर्षार्थं वक्तव्यं वाग्गुदीरणं ॥ ततः
पुष्पकमारुह्य मायारूपेण चाप्यहं ॥ ५९ ॥ तां सीतामानयिष्यामि तस्यामासक्तमानसः ॥ त्वम
पि स्वेच्छया यश्चादागमिष्यसि शोभन ॥ ६० ॥ इत्युक्तो रावणेनाथ मारीचो वाक्यमब्रवीत् ॥ त्वमेव गच्छे
पापिष्ठानां हि गन्तासि तत्र वै ॥ ६१ ॥ पुरैव तेन रामेण व्यथितोहं मुनेर्मखे ॥ एवमुक्तेथ मारीचो रा

वणः क्रोधमूर्छितः ॥ ६२ ॥ मारीचं हंतुमारेभे मारीचोप्याह रावणं ॥ तव हस्ताद्वधाद्वीर रामेण मरणं
वरं ॥ ६३ ॥ अहं तत्र गमिष्यामि यत्र त्वं गंतुमिच्छसि ॥ अथ पुष्पकमारुह्य जनस्थानमुपागतौ ॥ ६४ ॥
मारीचस्तत्र सौवर्णमृगमास्थाय चाग्रतः ॥ जगाम यत्र सा सीता वर्तते जनकात्मजा ॥ ६५ ॥ सौ
वर्णमृगपोतं तु दृष्ट्वा सीता यशस्विनी ॥ भाविकर्मवशाद्राममुवाच पतिमात्मनः ॥ ६६ ॥ गृहीत्वा
देहि सौवर्णं मृगपोतं नरपात्मज ॥ अयोध्यायां तु मद्गेहे क्रीडनार्थमिदं मम ॥ ६७ ॥ तथैवमुक्तो रा
मस्तु लक्ष्मणं स्थाप्य तत्र वै ॥ रक्षणार्थं तु सीताया गतो सौ मृगपृष्ठतः ॥ ६८ ॥ रामेण चानुयातो सौ
अदृश्य धावद्वने मृगः ॥ ततः शरेण विव्याध रामस्तं मृगपोतकं ॥ ६९ ॥ हे लक्ष्मणेति चोक्त्वा सौ
निपपात महीतले ॥ मारीचः पर्वताकारः तेन दृष्टो वनेवसः ॥ ७० ॥ आकर्ण्य रुदतः शब्दं सीता
लक्ष्मणमब्रवीत् ॥ गच्छ लक्ष्मण पुत्र त्वं यत्रायं शब्द उच्चितः ॥ ७१ ॥ भ्रातुर्ज्येष्ठस्य तव नु मद्व
रूपस्यैव ध्वनिः श्रायो रामस्य संदेहे लक्ष्मयेहं लक्ष्मये हे महामते ॥ ७२ ॥ इत्युक्तः स तथा प्राह लक्ष्मण

अ॰पु॰
११४

स्वामिनिर्भीता । नहि रामस्य संदेहो भयं वा विद्यते क्वचित् ॥७३॥ इति ब्रुवाणं तं शीता जाविकर्ष्यवलो
कितं । लक्ष्मणं चाह वैदेही निरुद्धवचनं तदा ॥७४॥ मृते रामे तु मामिच्छन्स्त्वं तत्त्वं न गमिष्यसि ॥ इ
त्युक्तः स विनीतात्मा श्रुत्वा सह्यप्रियं वचः ॥७५॥ जगाम राममन्वेष्टुं तदा पार्थिवनंदनः ॥ सन्न्यास
वेषमास्थाय रावणोपि दुरात्मवान् ॥७६॥ ससीतापार्श्वमासाद्य वचनं चेदमुक्तवान् ॥ आगतो
भरतः श्रीमान् अयोध्याया महामतिः ॥७७॥ रामेण सह संवाद्य स्थितवांस्तत्र कानने ॥ मां च प्रे
षितवान् रामो विमानमिदमारुह ॥७८॥ अयोध्यां याति रामस्तु भरतेन प्रसादितः ॥ मृगपोतं
तु वैदेहि क्रीडार्थं ते गृहीतवान् ॥७९॥ क्लेशितासि महारण्ये बहुकालं त्वमीदृशं ॥ संप्राप्तरा
ज्यस्ते भर्ता रामः सकचिराननः ॥८०॥ लक्ष्मणश्च विनीतात्मा विमानमिदमारुह ॥ इत्युक्ता सा त
था गत्वा नीता तेन दुरात्मना ॥८१॥ आरुह परीह विमानं तु छद्मना प्रेरिता सती ॥ साजगाम तल
: शीघ्रं विमानं दक्षिणां दिशं ॥८२॥ ततः शीता सुदुःखार्त्ता विजल्प अतिदुःखिता ॥ विमाने

राम॰
११४

स्थेपि रोदंत्याक्रुशन्त्यस्वराते तथा ॥८३॥ रावणः स्वेन रूपेण बभूवाथ महातनुः ॥ दशग्री
वं महाकायं दृष्ट्वा सीता सुदुःखिता ॥८४॥ हा राम वंचिता ह्याहं केनापि छद्मरूपिणा ॥ रक्ष
ता घोररूपेण त्रायस्वेति भयार्दिता ॥८५॥ हे लक्ष्मण महाबाहो रुतां हं दुष्टराक्षसा ॥ दुल
मागत्य रक्षस्व नीयमानामघात्मजं ॥८६॥ एवं प्रजल्पमानायाः सीतायास्तन्महस्वनं ॥ श्रु
त्वा पक्षिराजस्तु जटायुस्तत्र चागतः ॥८७॥ तिष्ठ रावण दुष्टात्मन् त्वं च मुंचात्र मैथिली
मित्युक्त्वा युयुधे तेन जटायुस्तत्र वीर्यवान् ॥८८॥ पक्षाभ्यां ताडयामास जटायुस्तस्य व
क्षसि ॥ ताडयंतं तु तं मत्वा बलवानिति रावणः ॥८९॥ तुंडचंचुप्रहारैस्तु चशंतेन प्रपीडि
तः ॥ तत उत्थाय वेगेन चंद्रहासमसिं महत् ॥९०॥ जघान तेन दुष्टात्मा जटायुं धर्मचा
रिणं ॥ निपपात महीपृष्ठे जटायुः क्षीणचेतनः ॥९१॥ उवाच दशग्रीवं दुष्टात्मन् त्वया हत
: चंद्रहासस्य वीर्येण हतोहं राक्षसाधम ॥९२॥ निरायुधं कोहनेन्मूढ सायुधस्त्वां मते जन

न०पु०
११५

ः सीतापहरणं विद्धि मत्सुत्से दुष्टराक्षस ॥ दुष्ट रावण रामस्त्वां वधिष्यति न संशयः ॥ रुदती दुःख
शोकार्त्ता जटायुं प्राह मैथिली ॥ ९३ ॥ मत्कृते मरणं यस्मात्त्वया प्राप्तं द्विजोत्तम ॥ तस्माद्रामप्र
सादेन विष्णुलोकमवाप्स्यसि ॥ ९४ ॥ यावद्रामेण संगस्ते भविष्यति महाद्विज ॥ तावत्तिष्ठन्तु
ते प्राणा इत्युक्त्वा तं खगोत्तमं ॥ ९५ ॥ ततस्तान्यर्पिता तेन गात्रभूषणानि विमुच्य सा ॥ संतानि बध्वा
वस्त्रेण रामहस्तं गमिष्यति ॥ ९६ ॥ इत्युक्त्वा पातयामास भूमौ सीता सुदुःखिता ॥ एवं हृत्वा स
सीतां जटायुं पात्यन्तत्र ॥ ९७ ॥ पुष्पकेन गतः शीघ्रं लंकां दुष्टनिशाकरः ॥ अशोकवनि
का मध्ये स्थापतित्वा स मैथिली ॥ ९८ ॥ इमामत्रैव रक्षार्थं राक्षस्यो विकृताननाः ॥ इत्यादिश्य
गृहं यातो रावणो राक्षसेश्वरः ॥ ९९ ॥ लंकानिवासिनः प्रोचुरेकांते च परस्परं ॥ अस्याः पुर्या
विनाशार्थं स्थापितेयं दुरात्मना ॥ १०० ॥ राक्षसीभिर्विरूपाभिर्रममाणाः समंततः ॥ सीता
च दुःखिता तत्र स्मरती राममेव सा ॥ १ ॥ उवास वसतिं दुष्टलंका दुःखिता रुदती भृशं ॥ यया ज्ञान

राम०
११५

खले देवी हंसपा ना सरस्वती ॥ सुग्रीवस्त्वाहरयश्च तुरश्च यदृच्छया ॥ वस्त्रबद्धं तपोस्त्येषं भू
षणं गृह्य तेत्वरात् ॥ ३ ॥ स्वलं त्रैर्विनिवेद्योचुः सुग्रीवाय महात्मने ॥ अरण्ये लक्ष्मणे हत्युद्धं जटा
योः रावणस्य च ॥ ४ ॥ अथ रामश्च तं हत्वा मारीचं मायया गतं ॥ निवृत्तो लक्ष्मणं दृष्ट्वा तेन गत्वाथ स्व
माश्रमं ॥ ५ ॥ सीतायपश्यन् दुःखार्तः प्ररुरोद स राघवः ॥ लक्ष्मणश्च महातेजा रुरोदात्र शदुःखि
तः ॥ ६ ॥ बहुप्रकारमस्वस्थं रुदंतं राघवं तदा ॥ भूतले पतितं धीमानुत्थाप्याश्वास लक्ष्मणः ॥ ७
उवाच वचनं प्राप्तं तदा यन्नरपुंगमे ॥ अतिवेलं महाराज न शोकं कर्तुमर्हसि ॥ ८ ॥ उत्ति
ष्ठोत्तिष्ठ शीघ्रं त्वं सीतां मार्गयितुं प्रभो ॥ इत्येवं वदता तेन लक्ष्मणेन महात्मना ॥ ९ ॥ उत्थापि
तो नरपति दुःखितो दुःखितेन तु ॥ भ्राता भ्रात्रा सह जगामाथ सीतां मार्गयतुं वनं ॥ १० ॥ वनानि स
र्वाणि विशोध्य राघवो गिरीन्समस्तान् गिरिसानुगोचरान् ॥ तपोमुनीनामपि चाश्रमान् बहून्
रणे दिवक्षीगह नेषुभूमिषु ॥ नदीतटे भूमिधरे गुहायां तिरीक्ष्य माणोपि महानुभावः ॥ प्रियामय

न॰पु॰
११६

ऽपन्नतृशा दुःखितस्तत्र जटायुषं वीक्ष्य च घातितं नृप ॥१२॥ स होक्तवान् केन हतस्त्वमीदृशीं दशा
मवाप्तोसि मत्तोसि जीवसि ॥ ममाख्य सर्वं स मदुःखितस्य पत्नी प्रिया वियोगात् इह चागतस्य चैव तु ॥ इ
त्युक्तवाक्ये विहगोप्यकूजत् उवाच वाचं मधुरां गिरा नौ ॥ शृणुष्व राजन् मम वृत्तमत्र वदामि दुः
खं च कृतं च सर्वं ॥१४॥ दृष्ट्वाननस्तामपनीय माय यासीतां समारोप्य विमानमुत्तमं ॥ जगाम रवे
दक्षिणां दिग्मुखो सो सीता च नीता विलजाय दुःखिता ॥ आकर्ण्य शीतास्वनमागतो हं सीतां वि
मोक्तुं स्वबलेन राघव ॥ युद्धं च तेनाहमतीव कृत्वा हतः पुनः खड्गबलेन रक्षसा ॥१६॥ वैदेहि वाका
दिह जीवता मया दृष्टः स भवान् स्वर्गमितो गमिष्ये ॥ मा राम शोकं कुरु भूमिपालव पाघ उत्संगए
तु नैकृतं ॥१७॥ रामो जटायुषेत्युक्तः पुनस्तं प्राह शोककृतः ॥ स्वस्त्यस्तु ते द्विजवर गतिस्तु परमास्तु
ते ॥१८॥ ततो जटायुः स्वं देहं विहाय गतवान् दिवं ॥ विमानेन सुरम्येण सेव्यमानोप्सरोगणैः ॥१९
रामोपि दग्ध्वा तद्देहं स्नात्वा दत्वा जलांजुलिं ॥ आश्वासगवन्दुःखार्त्तो मानुषीं पस्थि दृष्टवान् ॥२०॥ उद्ध

रा॰प॰
११६

मंतो महोल्कास्यं विकृतास्यां भयंकरी ॥ हयेनयंती जंतून्चे पाल पिल्लागतो रूपा ॥२१॥ गच्छन्नस्य नां
तरं रामः सकबंधं ददर्शनेह ॥ विरूपं जठरमुखं दीर्घबाहूं घनस्तनं ॥२२॥ रुंधानं राममार्गं तु
दृष्ट्वा तं दग्धवान् शनैः ॥ दग्धे सो दिव्यरूपी तु खस्थो राममभाषत ॥२३॥ राम राम महाबाहो त्व
या मे घमहामते ॥ विरूपं नाशितं वीर मुनिशापं चिरागतं ॥२४॥ त्रिदिवं यामि धन्यो स्मि त्वं त्वसाद्
त्र संशयः ॥ त्वं सीतां प्राप्नयेस ख्यं कुरु सूर्यसुतेन भो ॥२५॥ वानरेंद्रेण गत्वा तु सुग्रीवे त्वं निवेद्य वै
न विद्यति नृपश्रेष्ठ ऋष्यमूकगिरिं व्रज ॥ इत्युक्त्वा तु गते तस्मिन् रामो लक्ष्मणसंयुतः ॥ सिद्धैस्तु
मुनिभिः शून्यमाश्रमं प्रविवेशह ॥२७॥ तत्रस्थां तापसीं दृष्ट्वा तया संभाष्य संस्थितः ॥ साप्येनं
पूजयित्वा तु स्वाम वस्थां निवेद्य वै ॥२८॥ सीतां त्वं प्राप्स्यसीत्युक्त्वा प्रविश्याग्निं दिवं गता ॥ ततो
विनीतेन गुणान्वितेन भ्रात्रा समेतो जगदेकनाथः ॥ प्रिया वियोगेन सुदुःखितात्मा जगाम पंपां स
तु रामदेवः ॥२९॥ इति श्री नरसिंहपुराणे रामप्रादुर्भावे ॥ श्री मार्कंडेय उवाच ॥ वालिना रु

नरारोप्यउर्गवलाहरीश्वरः सुग्रीवोदृष्टवान्दूरात्दृष्ट्वाहपवनात्मजं १ कस्येमौसुधनुः
पाणीचीरवल्कलधारिणौ पश्यंतौसरसींदिव्यांपंपांपद्मसमावृतां २ नानारूपधराचैतौता
पसंवेषमाश्रितौ वालिदूताविहप्राप्ताविति निश्चित्य सर्वज ३ उत्पपात भयत्रस्तो ऋष्यमू
कानंतरं वानरैः सहितैः सर्वैः अगस्त्याश्रममुत्तमं तत्रस्थित्वाससुग्रीवः प्राह वायुसुतं पुन
ः हनूमन्त्वं शीघ्रं त्वं परप्रतापसवेषधृक् ५ कौहि कस्य सुतौ जातौ किमर्थं तत्र संस्थितौ
ज्ञात्वा सत्यं मम ब्रूहि वायुपुत्र महामते ६ इत्युक्तो हनुमान्गत्वा पंपातटमनुत्तमं भिक्षु
रूपी सतं प्राह रामं भ्रात्रा समन्वितं ७ कौ युवां निहसंप्राप्तौ तथ्यं ब्रूहि महामते अरण्ये निर्ज
ने घोरे ऊतस्त्व किं प्रयोजनं ८ एवं वदंतं तं प्राह लक्ष्मणो भ्रातुराज्ञया श्रवस्याभिनिबोधत्वं
रामवृत्तांतमादितः ९ राजा दशरथो नाम वभूव भुवि विश्रुतः तस्य पुत्रो महाबुद्धी रामो ज्येष्ठो
ममाग्रजः १० अस्याभिषेकमारब्धं कैकेय्या तन्निवारितं पितुराज्ञामयं ऊ वनं रामो भ्राता

ममाग्रजः ११ मयासहविनिःक्रम्य सीतया सह भार्यया प्रविश्येदं दंडकारण्यं नानामुनिसमा
कुलं १२ जनस्थाने निवसतो रामस्यास्य महात्मनः भार्यां सीता हृता तत्र वने केनापि पा
पिना १३ स तामन्वेषयन्वीरो रामः कमललोचनः इहायातस्त्वया दृष्ट इति वृत्तांतमीरि
तं १४ श्रुत्वा ततो वचस्तस्य लक्ष्मणस्य महात्मनः सद्यो जितात्मविश्वासात् हनूमान्मारु
तात्मजः १५ त्वं मे स्वामी निवदन् रामं रघुपतिं तदा आश्वास्यानीय सुग्रीवं तयोः सख्यम
कारयत् १६ शिरस्यारोप्य पादाब्जं रामस्याविदितात्मनः सुग्रीवो वानरेंद्रस्तु उवाच मधुरा
क्षरं अद्य प्रभृति राजेंद्र त्वं मे स्वामी न संशयः अहं तु तव भृत्यश्च वानरैः सहितः प्रभो १८
त्वं तु धर्मज्ञाता शुः स्यादद्य प्रभृति राघव मित्रस्त्वं मम तन्मित्रं शत्रुः स्वं मम वा सुखं १९ त्वद्भ्रा
तिरेवमस्मीति इत्युक्त्वा पुनराह तं वालीनाम मम ज्येष्ठो महाबलपराक्रमः २० मद्भार्यापहा
री दुष्टात्मा मदनासक्तमानसः तं त्वामृते पुरुषव्याघ्र नास्ति हंता पवालिनः २१ अगपस्य

सप्तालांस्तुतरून्योवेधयिष्यति सतंवधिष्यतीत्युक्तंपुराणज्ञैर्नृपात्मजः २२ तच्छ्रियार्थं
रामोपिश्रीमान्श्रुत्वामहातरून् ऊर्ध्वाकृष्टेनबाणेनयुगपद्विव्याधवीर्यवान् २३ वि
द्ध्वामहातरून्रामोसुग्रीवंप्राहपार्थिव वालिनागच्छयुध्यस्वकृतचिह्नोरवेःसुत २४ इ
त्युक्तोकृतचिह्नोपियुद्धंचक्रेपवालिना रामोपिलगत्वापशरेणैकेनवालिनं २५ वि
व्याधवीर्यवान्वालिपपातचममारच चित्रस्तेवालिपुत्रंतुह्यंगदंविनयान्वितं २६
रणप्रोंडयौवराज्येनियुक्ताराघवस्तदा तारांमित्रायदत्वाचराज्यंचरविसूनवे २७
सुग्रीवंप्राहधर्मात्मारामःकमललोचनः राज्यमन्वेष्टयत्नात्त्वंकपीनांपुनरावृजं २८
त्वंसीतान्वेषणेयत्नकुरुशीघ्रंहरीश्वरः इत्युक्तःप्राहसुग्रीवोरामंलक्ष्मणसंयुतं २९
प्रावृट्कालोमहान्प्राप्तःसांप्रतंरघुनंदन वानराणांगतिर्नास्तिवनेवर्षतिवासवे
३० गतेतस्मिंस्तुराजेंद्रप्राप्तेशरदिनिर्मले गत्वासंप्रेषयिष्यामिवानरान्दिक्षुवीर्यवान्

३१ इत्युक्त्वारामचंद्रंसतंप्रणम्यकपीश्वरः पंपापुरंप्रविश्याथरेमेतारासमन्वितः ३२
रामोपिविधिवद्भ्रात्राशैलसानौमहावने निवासंकृतवान्शैलेनीलकंठेमहामतिः ३३
प्रावृट्कालेगतेकृत्स्नेप्राप्तेशरदिराघवः सीतावियोगसंतप्तःसौमित्रिंप्राहलक्ष्मणं
३४ उल्लंघितेत्वसमयेसुग्रीवेणततोरुषा लक्ष्मणंप्राहकाकुत्स्थोभ्रातरंभ्रातृवत्सलः
३५ गच्छलक्ष्मणदुष्टोसौनागतःकपिनायकः गतेतुवर्षाकालेतुह्यागमिष्यामितेंति
कं ३६ अनेकैर्वानरैःसार्द्धमित्युक्त्वासौतदागतः तत्रगच्छत्वरायुक्तोयत्रास्तेकपिनाय-
कः ३७ तंदुष्टमग्रतःकृत्वाहरिसेनासमन्वितं पंपापुरंजगामाशुशीघ्रमानयनंकुरु
३८ नात्रागच्छतिसुग्रीवोयद्यसौप्राप्तभूतिकः तदालयेववध्यःसुग्रीवोनृतभाषकः
३९ वालिहंतासमनोदुष्टकरोमेद्यापितिष्ठति इत्युक्तस्तुतथेत्युक्त्वारामंनत्वाचलक्ष्मणः
४० पंपापुरंजगामाथसुग्रीवोयत्रतिष्ठति दृष्ट्वासतत्रसुग्रीवंकपिराजंबभाषवे ४१ ता

न॰पु॰
११९

राज्योगविषयात्त्वं रामकार्यं पराङ्मुखः किं त्वया विस्मृतं सर्वं रामाग्रे समयं कृत ४२ सीताम
न्वेष्यदास्यामि यत्र कापि तिदुर्मते हत्वा तु वालिनं राज्यं येन दत्तं पुरा तव ४३ तं त्वामृ
ते कोन्वज्ञां कुरुते पापचेतसं प्रतिश्रुत्य च रामस्य भार्याहीनस्य भूपतेः ४४ साहाय्यं
ते करोमीति देवाग्निजलसन्निधौ येये च शत्रवो राजन्तेते च मम शत्रवः मित्राणि या
नि ते देवता नि चैमित्राणि मे सदा सीतामन्वेषितुं राजन्वानरैर्बहुभिर्वृतः ४६ सत्यं
यास्यामि ते पार्श्वं इत्युक्त्वा कोन्यथा करोत् त्वामृते पापिनं दुष्टं रामदेवस्य संनिधौ ४७
कारयित्वा तु तेनैवं स्वकार्यं दुष्टवानर कृषिणा सत्यवाक्यं त्वयि दृष्टं मयाधुना ४८
ज्यनकृत्वा विद्यालोके सर्वज्ञानां महात्मनां नतपश्यामि लोकेस्मिन्कृते प्रतिकरोति यः
४९ सर्वस्य हि कृतार्थस्य मतिरन्या प्रवर्त्तते वसः क्षीरहं यं दृष्ट्वा परित्यजति नान्तरं ५०
शास्त्रेषु निःकृतिर्दृष्टा महापातकिनामपि कृतघ्नस्य कपे दुष्ट न दृष्टा निःकृतिः पुरा:

राम॰
११९

कृतघ्नता न कार्या ते तत्कृतं समयं स्मर एह्येह्यागच्छ शरणं काकुत्स्थं हितपालकं ५२ य
दि नायासि च कपे रामवाक्यमिदं शृणु नयिष्ये मृत्युसदनं सुग्रीवं वालिनं यथा ५३ सशरो वि
घ्रतेस्माकं येन वालीहतः कपिः लक्ष्मणे नैवमुक्तो सौ सुग्रीवः कपिनायकः ५४ नि
र्गत्य तु नमश्चक्रे लक्ष्मणं मंत्रिचोदितः उवाच च महात्मानं लक्ष्मणं वानराधिपः ५५
अज्ञानकृतपापानामस्माकं क्षंतुमर्हसि समयः कृतो मया राजन्रामेणामिततेजसा
५६ यस्तदानीं महात्मा गां तमद्यापि न लंघये यास्यामि निश्चलैरद्य कपिभिर्नृपनंदन ५
७ त्वया सह महावीर रामपार्श्वं न संशयः मां दृष्ट्वा तत्र काकुत्स्थो यद्यद्वक्ष्यति मां प्रति ५८
तत्सर्वं शिरसा गृह्य करिष्यामि न संशयः संति मे हरयः शूराः सीतान्वेषणकर्मणि ५९
तानहं प्रेषयिष्यामि दिक्षु सर्वासु पार्थिव इत्युक्तः कपिराजेन सुग्रीवेण स लक्ष्मणः ६०
एहि शीघ्रं गमिष्यामो रामपार्श्वं स्थितोऽधुना सेनाचाहूयतां वीर ऋक्षाणां हरिणामपि ६१

यान्द्रक्ष्याम्यतिरम्येति राघवस्ते महामते। इत्युक्तो लक्ष्मणेनाथ सुग्रीवः स तु वीर्यवान् ६२
पार्श्वस्थं युवराजानं अंगदं संज्ञयाब्रवीत्। सोपि निर्गत्य सेनादीनाह सेनापतिं तदा ६३
ते राहूताः समाजग्मुर्वानरकोटयः। गुहास्थाश्च गिरिस्थाश्च वृक्षस्थाश्चैव वानराः ६४
तैः सार्द्धं पर्वताकारैः वानरैर्भीमविक्रमैः। सुग्रीवः शीघ्रमागत्य ववंदे राघवं तदा ६५ लक्ष्म
णोपि नमस्कृत्य रामं भ्रातरमब्रवीत्। आगतोत्र महावीरः सुग्रीवः कुशलं तव ६७ श्रुत्वे
दं रामवचनं प्रसन्नं वाचं नराधिपः। शिरस्यांजलिमादाय सुग्रीवो राममब्रवीत् ६८ त
दा मे कुशलं राजन् सीता देवी तव प्रभो। अन्विष्यतु यदा दृष्टा मया भवति नान्यथा ६९ इ
त्युक्ते वचने तेन हनूमान्मारुतात्मजः। नत्वा रामं बभाषे तं सुग्रीवं कपिनायकं ७० शृ
णु सुग्रीव मे वाक्यं राजा यद्दुःखितो भृशं। सीतावियोगेन च सदा नोश्नाति च फलादिकं ७१
तस्य दुःखेन सततं लक्ष्मणोयं सुदुःखितः। एतयोरत्र वावस्थां तां श्रुतां नरतात्मजः ७२

दुःखी भवति तद्दुःखात् दुःखात् दुःखं प्राप्नोति लक्ष्मणः। यत एवमतो राजन् सीतामन्वेष
णं कुरु। इत्युक्ते वचने तत्र वायुपुत्रे हनूमति। जांबुवानतितेजस्वी नत्वा रामं पुरःस्थित
ः ७४ स प्राह कपिराजानं नीतिमान्नीतिमद्वचः। यदुक्तं वायुपुत्रेण तत्तथैव प्लवगर्षभ
७५ यत्र क्वापि स्थिता सीता रामभार्या यशस्विनी। पतिव्रता महाभागा वैदेही जनका
त्मजा। अद्यापि वृत्तसंपन्ना इति मे मनसि स्थितं। नहि कस्यापि चिह्नायाः सीतायाः केन
चिद्विपराभवो। वालिसुग्रीव प्रेषयाद्यैव वानरान्। इत्युक्तस्तेन सुग्रीवः प्रीतात्मा कपिना
यकः ७८ पश्चिमस्यां दिशि ततः प्रेषयामास तान् कपीन्। अन्वेष्टुं रामभार्यां तां सु
महाबलपराक्रमः ७९ उत्तरस्यां दिशि तदा प्रेषयामास तान् कपीन्। अन्वेष्टुं रा
भार्यां तां निपुणान् वीरान् वानरान् सो। प्रेषयामास धर्मात्मा सीतान्वेषणकर्मणि ८० पूर्व
स्यां दिशि कपीन् कपिराजः प्रतापवान्। प्रेषयामास रामस्य भार्यायान्वेषणाय वै ८१

इति तान्प्रेषयामास वानरान्वानराधिपः । सुग्रीवो वालिपुत्रं तमंगदं प्राह बुद्धिमान् । त्वं
गच्छ दक्षिणं देशं शीघ्रं सीतान्वेषणकर्मणि । जांबुवांश्च हनूमांश्च मैंदो द्विविद एव च ॥ ८३ ॥ नीला
द्याश्चैव हरयो महाबलपराक्रमाः । अनुयास्यंति गच्छंतं त्वामद्य मम शासनात् ॥ ८४ ॥ अ
चिरादेव यूयं तां दृष्ट्वा सीतां यशस्विनीं । स्थानतो रूपतश्चैव शीलतश्च विशेषतः ॥ ८५ ॥ के
न नीता च कुत्रास्ते ज्ञात्वा त्वागच्छ पुत्रक । इत्युक्तः कपिराजेन पितृव्येण महात्मना ॥ ८६ ॥ अं
गदस्तूर्णमुत्थाय तस्याज्ञां शिरसादधे । इत्युक्ते हरतः स्वाप्यवानरानपजांबवान् ॥ ८७ ॥ रा
मं च लक्ष्मणं चैव सुग्रीवं मारुतात्मजं । एकतः स्थाप्यतानाह नीतिमान्नीतिमद्वच ॥ ८८ ॥ शृ
यतां वचनं मह्यं सीतान्वेषणकर्मणि । श्रुत्वा च तत्त्वग्रहाणं त्वं रोचते चेन्नृपात्मज ॥ ८९ ॥ राव
णेन जनस्थानात् नीयमाना तपस्विनी । जटायुना तु सा दृष्टा यत्कायुद्धं प्रकुर्वता ॥ ९० ॥ भू
षणानि च दृष्टानि तदा क्षिप्तानि तेन वै । तान्यस्माभिः च दृष्टानि सुग्रीवायार्पितानि वै ॥ ९१ ॥

जटायुवाक्याद्राजेंद्र सत्यमित्यवधारय । एतस्मात्कारणात्सीता नीता तेनैव रक्षसा । रावणेन
महाबाहो लंकायां वर्त्तते तु सा । त्वां स्मरंती तु तत्रस्था त्वद्दुःखेन सुदुःखिता ॥ ९३ ॥ रक्षंती यत्न
तो वृत्तं स्वचापि जनकात्मजा । तदा त्वय्येव स्वान्प्राणान्धारयंती शुभानना ॥ ९४ ॥ स्थिता प्रा
येण ते देवी सीता दुःखपरायणा । हितमेव च ते राजन् उदधेर्लंघनं क्षमं ॥ ९५ ॥ वायुपुत्रं ह
नूमंतं त्वमत्रादेष्टुमर्हसि । त्वं चाप्यर्हसि सुग्रीव प्रेषितुं मारुतात्मजं ॥ ९६ ॥ तस्मात् सा
गरं गंतुं वानराणां न विद्यते । बलं कस्यापि वा वीर इति मे मनसि स्थितं ॥ ९७ ॥ क्रियतां म
द्वचः क्षिप्रं हितं पथ्यं च नः सदा । इत्युक्ते जांबवत्येतं नीतिमद्धितमल्पशः ॥ ९८ ॥ वाक्ये वानर
राजासौ शीघ्रमुत्थाय चासनात् । वायुपुत्रसमीपं तु तं गत्वा वाक्यमब्रवीत् ॥ ९९ ॥ शृणु म
द्वचनं वीर हनुमन्मारुतात्मजः । अयमिक्ष्वाकुतिलको राजा रामः प्रतापवान् ॥ १०० ॥ पितुरा
देशमादाय भ्रात्रा भार्यासमन्वितः । प्रविश्य दंडकारण्यं साक्षाद्धर्मपरायणः ॥ १ ॥ सर्वात्मा

सर्वात्मा सर्वलोकेषु विष्णुर्मानुषरूपवान्। अस्य भार्या हृता तेन दुष्टेनापि दुरात्मना। तद्वियोग
जदुःखार्त्तौ विचिन्वंस्तां वने वने। त्वया दृष्टोऽन्यपः पूर्वमयं वीरप्रतापवान्। ३ एतेन सह संग
स्य समयं चापि कारितं। अनेन निहतः शत्रुः मम वालिर्महाबलः। ४ अस्य प्रसादेन कपे रा
ज्यं प्राप्तं मयाधुना। मया च यत्प्रतिज्ञातं अस्य साहाय्यकर्मणि। ५ तत्सत्यं कर्तुमिच्छामि त्व
द्बलान्मारुतात्मज। उत्तीर्य सागरं वीर दृष्ट्वा सीतामनिन्दितां। ६ भूयः स्वर्तुं बलं नास्ति वा
नराणां त्वया विना। अस्त्वमेव जानासि स्वामिकार्यं महामते। ७ बलवान्नीतिमांश्चैव दक्षस्त्वं दौ
त्यकर्मणि। तेनैवमुक्तो हनूमान् सुग्रीवेण महात्मना। ८ स्वामिनो र्थे न किं कुर्यां मादृशो
किं नु भाषसे। इत्युक्तो वायुपुत्रेण रामस्तं पुरतः स्थितं। ९ प्राह वाक्यं महाबाहुर्हर्षप्र
संपूर्णलोचनः। श्रीतां स्मृत्वा सुदुःखार्त्तः काकुत्स्थममित्रजित्। त्वयि भारं समारोप्य सम
द्धरणादिकं। सुग्रीवः स्वास्यते ह्यत्र मया सार्द्धं महामते। १० हनूमंस्तत्र गच्छ त्वं मत्प्रीत्यान्य

सर्वलोकेषु विष्णुर्मानुषरूपवान्। अस्य भार्या हृतनिश्चयः। जातीनां चैव च तथा भार्या सुग्रीवस्य
विशेषतः। १२ प्रायेण रक्षसा नीता भार्या मे जनकात्मजा। तत्र गच्छ महावीर यत्र सीता व्यव
स्थिता। १३ यदि पृच्छति सा दक्ष मदाकारमशेषतः। अतो निरीक्ष्य मां भूयो लक्ष्मणं च ममानुजं
१४ दृष्ट्वा त्वं गच्छ सकलं लक्ष्मणं चावयोरिह। नान्यथा विश्वासमेति ताइ इति मे मनसि स्थितं १५
इत्युक्तो रामदेवेन पवनंजनसुतो बली। उत्थाय तत्पुरः स्थित्वा कृतांजलिरुवाच तं १६ जाना
मि लक्ष्मणं सर्वं युवयोस्तु विशेषतः। गच्छामि कपिभिः सार्द्धं त्वं शोकं मा कुरु राघवे। अन्यच्च देहि
नु ज्ञानं विश्वासो येन मे भवेत्। श्रीतायास्तव देव्यास्तु राजन् राजीवलोचन १८ इत्युक्ते वायु
पुत्रे तु रामः कमललोचनः। अंगुलीयकमुन्मुच्य रत्नवान् रामचिह्नितं। १९ तद्गृहीत्वा तु हनू
मासो पि हनूमान्मारुतात्मजः। प्रदक्षिणीकृत्य रामं लक्ष्मणं च कपीश्वरं। २० उत्पपात ततो धीमा
न् हनूमानंजनासुतः। सुग्रीवोपि च तान् स्तुत्वा वानरान् लक्ष्मणेप्याहयाऊ नं तत्र वाक्यमिदं

न॰पु॰
१२३

तरा ॥ सर्वथा दृक्ष्यतीतस्तु हनुमानागमिष्यति ॥ २१ ॥ इत्याश्वास्य स्थितौ तत्र रामं सुग्रीवलक्ष्मणौ ॥ स्व
पांगदं पुरस्कृत्य येगता वानरोत्तमाः ॥ २२ ॥ यत्रादृत्वेषणार्थाय रामपत्नी यशस्विनी ॥ स्वदृष्ट्वाश्र
ममापन्ना कादिग्भूता लक्ष्या वने ॥ २३ ॥ तत्तृष्णेन विहीनास्ते क्षुधया च प्रपीडिताः ॥ भ्रमंतो गहने र
ण्ये कापि दृष्ट्वा च सुभ्रूः ॥ गुहानिवासिनी सिद्धा ऋषिपत्नी मनिंदिता ॥ सा च तानागतान् दृष्ट्वा
श्रमं प्रति वानरान् ॥ आगताः कस्य यूयं तु कुतः किं तु प्रयोजनं ॥ इत्युक्ते जांबवानाह तां सि
द्धां सुमहामतिः ॥ सुग्रीवस्य वयं भृत्याः आगता ह्यत्र शोभने ॥ रामभार्यार्थमनवे सीतान्वेषण
कर्मणि ॥ २७ ॥ कांदिग्भूता निराहारा दृष्ट्वा जनकात्मजां ॥ इत्युक्ते जांबवत्युत्र पुनस्तानाह सा
श्रुत्वा ॥ जानामि रामं शोतां च लक्ष्मणं च कपीश्वरं ॥ भुजध्व मत्तमेद्दत्तमाहारं च कपीश्वराः ॥
२९ ॥ ताकामं त्रु रामकार्यागतास्त्वद्य यूयं रामसमा मम ॥ इत्युक्त्वा स्म ततं तेषां योगाद्दत्तं तप
स्विनी ॥ ३० ॥ भोजयित्वा पप्याकामं पत्र यत्तानाह तापसी ॥ सीतास्थानं तु जानाति निर्गमपक्षराद्

राम॰
१२३

आस्थितो चैव वने सोपि महेंद्रे वर्त्तते द्विजः ॥ मार्गेणानेन हरयस्तत्र यूयं गमिष्यथ ॥ ३२ ॥ स वक्ति
सीतां संपातिर्दूरदर्शी तु यः खगः ॥ तेनादिष्टं तु पंथानं पुनरासाद्य गच्छथ ॥ ३३ ॥ अवश्यं जानकीं
सीतां द्रक्ष्यते पवनात्मजः ॥ तयैवमुक्ताः कपयः पुरां प्रीतिमुपागताः ॥ ३४ ॥ रूपास्ते बलमापन्नास्ता
प्रणम्य प्रतस्थिरे ॥ महेंद्राद्रिं गता वीरा वानरास्तद्दिदृक्षया ॥ ३५ ॥ तत्र संपातिमासीनं दृष्ट्वा ते च
कपीश्वराः ॥ तां तु वाचाथ संपाति वानरानागतान् द्विजाः ॥ ३६ ॥ के यूयमिति संप्राप्ताः कस्य वा
भृत्यमाचिरं ॥ इत्युक्ते वानरा ऊचुः यथा वृत्तमनुक्रमात् ॥ ३७ ॥ रामदूता वयं सर्वे सीतान्वेष
णकर्मणि ॥ प्रेषिताः कपिराजेन सुग्रीवेण महात्मना ॥ ३८ ॥ त्वां द्रष्टुमिह संप्राप्ताः सिद्धो
ः या वचनात् द्विजं ॥ सीतास्थानं महाभाग त्वं नो वद महामते ॥ ३९ ॥ इत्युक्तो वानरैः श्ये
नो वीक्षां चक्रे सुदक्षिणां ॥ सीतां दृष्ट्वा स तं कायाम शोकार्त्ये महावते ॥ स्थिते तिक पिते
तेन जटायुस्तु मृतस्तत्र ॥ जानेति चोचुः सम्पातिर्दादस्योदकांजलिं ॥ ४१ ॥ योगमास्थाय

गृध्रं ददृहे विसंसर्ज्य महामतिः ॥ ततस्ते वानरा दग्धपक्षं दृष्ट्वा तस्योदकांजलिं ॥ ४२ ॥ गत्वा महेंद्रशृंगं
तं तमारुह्य हरियूथपाः ॥ सागरं वीक्ष्य ते सर्वे परस्परमथाब्रुवन् ॥ ४३ ॥ रावणेनैव भार्या सा नी
ता रामस्य निश्चितं ॥ संपातिवचनाद्द्य संजातं सकलं हितं ॥ ४४ ॥ वानराणां तु कश्चात्र
उत्तीर्य लवणोदधिं ॥ लंकां प्रविश्य दृष्ट्वा तां रामपत्नीं यशस्विनीं ॥ ४५ ॥ पुनश्चोदधितरणे श
क्तिं वृत्तादृशो जनाः ॥ इत्युक्तो जांबवान् प्राह सर्वे शक्तास्तु वानराः ॥ ४६ ॥ सागरोत्तरणे किं तु
कार्यमत्र न संभवेत् ॥ तत्र दृष्टो यमेवात्र हनूमानिति मे मतिः ॥ ४७ ॥ कालक्षेपो न कर्तव्यो
मासार्द्धमपि चाधिकं गतं ॥ यद्यदृष्ट्वा तु गच्छामो वैदेहीं वानरर्षभाः ॥ ४८ ॥ कर्णनासादि नः
स्वांगं निकृंतति कपीश्वरः ॥ तस्मात्प्रार्थ्यः स चास्माभिः वायुपुत्रस्तु मे मतिः ॥ इत्युक्तास्ते
तथेत्यूचुः वानरा वृद्धवानरं ॥ ततस्ते प्रार्थयामासुर्वानराः पवनात्मजं ॥ हनूमंतं महाप्रा
ज्ञं दृष्टं कार्येषु चाधिकं ॥ गच्छ त्वं रामभक्तस्त्वं रावणस्य भयाय च ॥ रक्षस्व वानरेकुलमस्मा

कमजनासुत ॥ इत्युक्तस्तान् तथेत्याह वानरान् पवनात्मजः ॥ गंतुं प्रचक्रमे वाद्धिमुत्तार्य र
क्षसालयं ॥ ॥ इति श्रीनरसिंहपुराणे रामप्रादुर्भावे ॥ श्रीमार्कंडेय उ॰ ॥ स तु रावणनीताया
ःसीतायाः परिमार्गणे ॥ इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥ १ ॥ अंजलिं प्रमुखे कृत्वा सग
णायात्मयोनये ॥ मनसा चिंत्य रामं च लक्ष्मणं च महारथं ॥ २ ॥ सागरं सरितं चैव प्रणम्य शिरसा
कपिः ॥ ज्ञातींश्चैव परिष्वज्य कृत्वा चैव प्रदक्षिणं ॥ ३ ॥ अरिष्टं गच्छ पंथानं पुण्यं वायुनिषेवितं
पुनरागमनायेति वानरैरभिपूजितः ॥ ४ ॥ अंजःसत्वं तथा वीर्यं आविवेश च वीर्यवान् ॥ मार्गमा
लोकयन् दूरं प्राणिहितेक्षणः ॥ ५ ॥ संपूर्णमिव चात्मानं भावयित्वा महाबलः ॥ उत्पपात गिरिः
शृंगात् निःपीड्य गिरिसंमंदरे ॥ ६ ॥ पितुर्मार्गेण यातस्य वायुपुत्रस्य धीमतः ॥ रामकार्यपरस्या
य सागरेण प्रचोदितः ॥ ७ ॥ विश्रामार्थं समुत्तस्थौ मैनाको लवणोदधेः ॥ तं निरीक्ष्य निपीड्याश्व
रयासं भाष्य स्वागतं ॥ ८ ॥ उत्पतंतं वने वीरं सिंहिकास्यान्महाकपिः ॥ आसस्याप्रं प्रविश्य

रूपाप्याश्रमं तं विनिसृतः ९ प्रविश्य गतवान् शीघ्रं वायुपुत्रः प्रतापवान् आश्रमान् लंघयि
त्वा तु सागरात् पवनात्मजः १० त्रिकूटशिखरे रम्ये वृक्षाग्रे निपपात ह तस्मिन्स पर्वतश्रेष्ठे दि
नं नीत्वा तु सागरात् पवनात्मजो दिनक्षये ११ संध्यामुपास्य हनूमान् ततो लंकां शनैर्निशि लं
कापिधानां निर्जित्य देवतां प्रविवेश ह १२ लंकामनेकरत्नाढ्यां वृक्षाश्चर्यसमन्वितां राक्ष
सेषु प्रसुप्तेषु नीतिमान् पवनात्मजः १३ रावणस्य ततो वेश्म प्रविवेशाथ बुद्धिमान् शया
ने रावणं दृष्ट्वा तस्मिन् महति वानरः १४ स्त्रीसहस्रैस्तु दृष्ट्वा तं नानाभरणभूषितं तस्मिन् सी
तामदृष्ट्वा तं नानाभरणभूषितं १५ तस्मिन् सीतामदृष्ट्वा तु रावणस्य गृहे शुभे तथान्येषु
गृहे शीतेनायकानां वरहसां १६ दुःखितो वायुपुत्रस्तु संप्राप्य विवचनस्मरेन् १६१६ अशो
कवनिकां प्राप्य नानापुष्पसमन्विता वासितां मलयवातेन चंदनेन सुगंधिना १७ प्र
विश्य तां शिंशपा वृक्षमाश्रितां जनकात्मजां रामपत्नीं समाद्राक्षीत् राक्षसीभिः सुरक्षितां

अशोकवृक्षमारुह्य पुष्पसंप्लवे आसांचक्रे हरिस्तत्र सेयं सीतेति संस्मरन् १९ सी
तां निरीक्ष्य हृष्टात्मा यावदास्ते निलात्मजः स्त्रीभिः परिवृतस्तत्र रावणस्तावदागतः २०
आगत्य सीतां प्रहाप्य प्रियसां जनकात्मजां भूषिताः वैदेहि त्यज रामगतं मनः २१ उ
क्तैवं भाषमाणं तमंतर्धाय तृणं तदा भार्यास्पर्शनैः सीता कंपमाना च रावणं २२ गच्छ
रावण दुष्ट त्वं परदारपरायण अचिराद्रामबाणस्ते पिबंतु रुधिरं च ते २३ तयैव तु
क्तो जज्वाल क्रोधात् सीतां हरात् स राक्षसः द्विमासाभ्यंतरे चैनां वशीकुरुत मानुषं यदि नैव
ति मां सीता ततः खादत मानुषीं इत्युक्त्वा गतवान् दुष्टो रावणः स्वनिकेतनं २५ त
तो भयेन तां प्राह राक्षस्यो जनकात्मजां रावणं भज कल्याणि सधनं सुखिनी भव २६
ईत्युक्ताः प्राह ताः सीता राघवे लघुविक्रमः निहत्य रावणं युद्धे सगणं मां नयिष्यति २७
नाहमन्यस्य भार्या स्यामन्ते रामं रघूत्तमं स त्वागत्य दशग्रीवं हत्वा मां पालयिष्यति २८ उ

त्वाकर्ण्य वचस्तस्याः राक्षसीन्यपविक्लवा । हन्यतां हन्यतामेषा राक्षसीं तर्जनापियं ॥ २९ ॥ त
तस्तास्त्रिजटा प्राह स्वप्नमेकमनिंदिता ॥ शृणुध्वं दुष्टराक्षस्यो रावणस्य विनाशनं ॥ ३० ॥
रक्षोभिः सह सर्वैस्तु रावणस्य मृतिप्रदः ॥ लक्ष्मणेन सहभ्रात्रा रामस्य विजयप्रदः ॥ ३१ ॥
स्वप्नः श्रुतो मया दृष्टः सीतायाश्च प्रतिप्रदः ॥ त्रिजटावाक्यमाकर्ण्य सीतापार्श्वविसृताः
॥ ३२ ॥ राक्षस्यस्त्वायुः सर्वा सीता माहाञ्जनासुतः ॥ कीर्त्तयन् रामवृत्तान्तं सकलं पवनात्म
ज ॥ ३३ ॥ तस्यां विश्वासमानीय दत्वा रामांगुलीयकं ॥ संप्राप्य लक्ष्मणं सर्वं रामलक्ष्मणयोपु
नः ॥ ३४ ॥ महासेनया युक्तः सुग्रीवः कपिनायकः ॥ तेन सार्द्धमिहागत्य रामस्तव पति
ः प्रभुः ॥ ३५ ॥ लक्ष्मणश्च महावीरो देवरस्ते शुभानने ॥ रावणं सगणं हत्वा त्वमत्राशु ग
च्छति ॥ ३६ ॥ इत्युक्ते सा तु विश्वस्ता वायुपुत्रमथाब्रवीत् ॥ कथमत्रागतो वीर त्वमुत्तीर्य म
होदधिं ॥ ३७ ॥ इत्याकर्ण्य वचस्तस्याः पुनस्तामाह वानरः ॥ गोःपदवन्मया तीर्णः समुद्रोऽयं व

रानने ॥ ३८ ॥ जपता राम रामेति सागरो गोःपदायते ॥ दुःखमग्नासि वैदेहि स्थिरा भव शुभानने
॥ ३९ ॥ क्षिप्रं पश्यसि रामं त्वं सत्यमेतद् ब्रवीमि ते ॥ इत्याश्वास्य ततः सीतां दुःखितो दुःखितां नन
कात्मजां ॥ ४० ॥ नत्वा तां प्रस्थितो वीरो गंतुं कृतमतिः कपि ॥ ततो विमृश्य पतन् लंकाक्रीडावनम
शेषतः ॥ ४१ ॥ ततो रणस्थो निनादोच्चैः रामो जयति वीर्यवान् ॥ अनेकान् राक्षसान् हत्वा नाना
सेनापतींश्च सः ॥ ४२ ॥ तदा चाक्षकुमारं तु बहु रावणसैनिकं ॥ सार्थं ससारथिं हत्वा रामसंकीर्त्तं
लक्ष्मणं ॥ ४३ ॥ सुग्रीवं च महावीर्यं दग्ध्वा लंकामशेषतः ॥ निर्भर्त्स्य रावणं पुनः संप्राप्य जान
कीं ॥ ४४ ॥ भूयः सा मरणं तीर्य ज्ञातीनां साधु वीर्यवान् ॥ सीतादर्शनमावेद्य हनूमान् श्च वपूजित
ः ॥ ४५ ॥ वानरैः सार्द्धमागत्य हनूमान् मधुवनं महत् ॥ निहत्य रक्षपालांस्तु पाययित्वा तु तान्मधु ॥ ४
६ ॥ यथेष्टं दधिमुखं पात्यहर्षितं हरिभिः सह ॥ स्वयं तत्र च ⁻ स्वप्राप्य रामलक्ष्मणपादयोः ॥ ४७ ॥ न
त्वा तु हनुमांस्तत्र सुग्रीवं च विशेषतः ॥ आदितः सर्वमावेद्य समुद्रतरणादिकं ॥ ४८ ॥ कथयामास

रामायसीतादृष्टामयेतिवै अशोकवनिकामध्येशोतादेवीसुदुःखिता ४९ राक्षसीभिःपरिवृ
ताबांस्मरंतीचसर्वदा अश्रुपूर्णमुखीदीनातवपत्नीवरानना ५० शीलवृत्तसमायुक्तात
त्रापिजनकात्मजा सर्वत्रान्वेष्यमाणेनयमादृष्टापतिव्रता ५१ मयासंभाषितासीताविश्व
स्तारघुनंदन अलंकारःसुमणिमान्तयातेप्रेषितःप्रभो ५२ इदंचवचनंतुभ्यंपत्यासंप्रे
षितंशृणु चित्रकूटेमदंगेतुसुप्तेत्वयिमहाव्रत ५३ वायसाभिमवंराजन्तत्किलस्मर्तु
मर्हसि अल्पापराधेराजेंद्रयावत्तिजिवनो ५४ ब्रह्मास्त्रंतुतदोत्सृष्टंरावणंकिमु
पेक्षसि इत्येवमादिबहुशःप्रोक्तासीतारुरोदमे ५५ एवंतुदुःखितासीतातांमोक्तुयत्न
माचर इत्येवमुक्तेपवनात्मजेनसीतावचस्तत्सुतनूषणंच श्रुत्वाचदृष्ट्वाचरुरोदरामःकपि
समालिंग्यशनैःप्रतस्थे ५६ इतिश्रीनरसिंहपुराणेरामप्रादुर्भावे ॥ छ ॥ श्रीमार्कंडेयउवा
च इतिश्रुत्वाप्रियाकर्त्तावायुपुत्रेणकीर्त्तितां रामोगत्वासमुद्रांतंवानरैःसहविस्मृतः १

सागरस्यतटेरम्येतालीवनविराजिते सुग्रीवोजांबवांश्चाप्यवानरैरतिहर्षितैः २ संप्राप्
तीतेहितःश्रीमान्नक्षत्रैरिवचंद्रमाः अनुजेनचवीरेणवीक्ष्यतस्थौजगत्पतिं ३ रावणे
नापलंकायांसाधूक्तेनासितोनुजः विभीषणोमहाबुद्धिःशास्त्रज्ञैर्मंत्रिभिःसह ४
नरसिंहेमहादेवेश्रीधरेभक्तवत्सले एवंरामेचलांजलिमागतस्त्वियतातदा ५ कृतां
जलिरुवाचेदंराममक्लिष्टकारिणं रामराममहाबाहोदेवदेवजनार्दनः ६ विभीषणोऽ
स्मिमांरक्षअहंतेशरणंगतः इत्युक्त्वानिपपाताथप्रांजलीरामपादयोः विदितार्थोऽथराम
स्तुतमुत्थाप्यतस्मिवान् ततोविभीषणेनोक्तंत्वंविष्णुर्भुवनेश्वरः ९ अधिर्देहंतुमा
र्गंतिदैवतंयाचयायहे इत्युक्त्वावानरैःसार्द्धंशिष्येतत्रसराघवः १० सुप्तेरामेगतेतत्र
त्रिरात्रममितद्युतौ ततःक्रुद्धोजगन्नाथोरामोराजीवलोचन वरुणंप्रलयंकर्तुमा
ग्नेयमस्त्रमादेदे ततोऽन्नायवचःप्राहलक्ष्मणश्चरुपान्वितं १२ क्रोधस्तेत्वयक

न॰पु॰
१२९

न्नीहिएनं जदिमसामले ॥ जूतानां रक्षणार्थाय भवनास्त्वयाऽऽगतः ॥१३॥ हंतव्यं देवदेवेश दुस्तु
स्त्राधृतवान्करे ॥ ततो राद्रिवये पाते क्रुद्धे राममवेक्ष्य सः ॥१४॥ आग्नेयास्त्रमयास्त्रस्तः
सागरोऽभ्येत्य मूर्त्तिमान् ॥ आह राम महाबाहो रक्षमामपकारिणं ॥१५॥ मार्गो दत्तो मया तेऽघ
कुशलाग्रे तु कर्मणि ॥ नतश्च कपितो वीरस्तेन कारय राघव ॥ यावदिष्टं सुविस्तीर्णं सेतुबंध
नमुत्तमं ॥ कृतं जलमुखैरेभ्यैर्वानरैरमितौजसैः ॥१७॥ बंधयित्वा महासेतुं तेन गत्वा स राघ
वः ॥ सुवेलाख्यं गिरिं प्राप्तः स्थितोसौ वानरैर्वृतः ॥१८॥ हर्म्यस्थलस्थितं दुष्टं रावणं वीक्ष्सति छ
ति ॥ रामादेशाद्दप्योत्पत्य दुतमर्कसुतस्ततः ॥१९॥ प्रासादात्पादप्रहारं तु रोषात् रावणमूर्द्धनि
विस्मिताक्षैः सुरगणैर्वीक्षितः सोतिवीर्यवान् ॥२०॥ साधयित्वा प्रतिज्ञातां सुवेलं पुनरागतः
ततो वानरसेनाभिः संख्यातीताभिरच्युतः ॥२१॥ रुरोध रावणपुरीं लंकां तत्र प्रतापवान्
राघवस्य बलं ज्ञात्वा चारैस्तद्दनुजस्य च ॥ वानराणां च नीलोपि निर्भीरिव दशाननं लंकापुर

राम॰
१२९

स्य रक्षार्थं समादिदेश सराक्षसान् ॥ आदिश्य सर्वलोकेषु पुत्रानाह दशाननः ॥ धूम्राक्ष पूर्वपुर्यो
स्तु रक्षराक्षसमन्वितः ॥ कुंभकर्णोपि मद्भोतान्नर्यवादैः प्रबोधितः ॥ आश्चान्तु वानरान्सर्वान्ख
रुणास्त्रान्महाशनः ॥ राक्षसाश्चैवमादिष्टा रावणेन महाबलाः ॥ तस्यात्तां शिरसाज्ञाय युयुधु
र्वानरैः सह ॥ युध्यमानास्तु पाशाक्षाः कोटिसंख्यास्तु राक्षसाः ॥ वानरैर्निधनं प्राप्तास्तु नरन्यानपा
दिशान ॥ पूर्वद्वारे दशग्रीवो राक्षसानमितौजसः ॥ ते चापि युद्धे हरिभिः नीलाद्यैर्निधनं गताः ॥ आ
पद्दक्षिणदिग्भागे रावणेन नियोजिताः ॥ ते सर्वे वानरनखैर्दारितास्तु यमं गताः ॥ पश्चिमे गरस्तु
खैश्च वानरैरतिगर्वितैः ॥ राक्षसाः पर्वताकाराः प्रापिता यमसादनं ॥ तदुत्तरे तु दिग्भागे वै राव
णेन निवेशिताः ॥ ये तु ते राक्षसाः क्रूराः मैंदाद्यैर्वानरैर्हताः ॥ ततो वानरसंघस्तु लंकाप्राका
रमुद्दितं ॥ उत्प्लुत्याभ्यंतरस्थांश्च राक्षसान्बलदर्पितान् ॥ हत्वा शीघ्रं पुनः प्राप्ता स्वसेनामे
व वानराः ॥ एवं हतेषु सर्वेषु राक्षसेषु दशाननः ॥ रोदमानासु तत्स्त्रीषु निर्गतः क्रोधमूर्छि

रा०यु०
१२९

तः घोरेसपक्षिमेवाशोराहुसैर्बहुभिर्वृतः । कोसौराम इतिवदन्धनुःपाणिर्घतापवान् रथस्थः
शरवर्षंचविसृजन्वानरैःप्रसः । ततस्तद्बाणछिन्नांगावानराउदुद्रुवुस्तदा । पलायमानांस्तुता
न्दृष्ट्वावानरान्राघवस्तदा । कस्मान्नुवानरायूयाः किमेषांचयमागतं । इतिरामवचःश्रुत्वा
प्राहवाक्यंविभीषणः । शृणुराजन्महाबाहोरावणोनिर्गतोधुना । तद्बाणछिन्नाहरयःपला
यंतेमहामते । इत्युक्तोराघवस्तेनधनुरुद्यम्यरोषितः । ज्याघोषतलघोषाभ्यांपूरयामासखं
दिशं । युयोधरावणेनाथरामःकमललोचनः । सुग्रीवोजांबुवांश्चैवहनूमानंगदस्तथा । वि
भीषणोवानराश्चलक्ष्मणश्चापिवीर्यवान् । उपेत्यरावणंसेनांवर्षंतीसर्वसायकान् । ह
स्त्यश्वरथसंयुक्तोतेनिजघ्नुर्महाबलाः । रामरावणयोर्युद्धमत्यद्भुतमपिभीषणं । रावणोनवि
सृष्टानिशस्त्रास्त्राणिचयानिवै । तानिछित्वाथशस्त्रैस्तुराघवश्चमहाबलः । शरेणसारथिं
हत्वादशभिश्चमहाहयान् । रावणस्यधनुश्छित्वाघनछेनैकेनराघवः । मुकुटंपंचदशभिःछित्

राम०
१२९

त्वातन्मस्तकेपुनः । सुवर्णपुंखैर्दशभिःशरैर्विव्याधवीर्यवान् । ततोदशास्योव्यथितोरामबा
णैर्भृशंतदा । विवेशमंत्रिभिर्नीतःस्वपुरींदेवमर्दकः । बाधितस्तुर्यनादैस्तुकृच्छ्राद्यूथकर्मैः
शनैः । पुनःप्राकारमुल्लंघ्यकुंभकर्णोविनिर्गतः । उत्तुंगमूलदेहोसौभीमदृष्टिर्महाबलः । वा
नरान्भक्षयन्युद्धेविचचारक्षुधान्वितः । तद्राक्षोस्यसुग्रीवःशूलेनोरस्यताडयत् । ५
९ । कराभ्यांकर्णद्वयंतस्यछित्वावक्त्रेणनासिकां । कुंभकर्णःपिबन्रक्तंस्वकीयंघ्राणनिः
सृतं ६० रामंदृष्ट्वाव्याघ्रवत्समुद्यायसमुपस्थितं । कबंधोनाहमस्मीतिवेदाभासांप्रवंरणे ६१
इत्युक्तेजहसुःसर्वेवानरास्तुष्टमानसाः । धूम्राक्षकंपनादींश्चसंख्यातीतान्निशाचरान् ६२
सर्वतोयुध्यमानांश्चरक्षोनाथान्नरोधिकान् । राघवोघातयित्वातुवानरैःदैःसमंततः । च
कर्त्तविशेषैस्तीक्ष्णैःकुंभकर्णस्यकंधरं । विजित्यदुर्जितंसाक्षात्कुरुदेनागतेनयः ६४ रामो
लक्ष्मणसंयुक्तःशुशुभेवानरैर्वृतः । यमगतेचंद्रजितिकुंभकर्णेनिपातिते ६५ लंकाना

रा॰पु॰ पस्ततः क्रुद्धः पुत्रं त्रिशिरसं पुनः ॥ अतिकायमहाकायौ देवांतकनरांतकौ ॥ ६६ ॥ यूयं हत्वा तु पु
त्राघातो नरौ युधि निघ्नत ॥ तान्निमुज्य दशग्रीवः पुत्रानेवं पुनर्ब्रवीत् ॥ ६७ ॥ महोदरमहापार्श्वौ भ्रा
१३० र्ममेतैर्महाबलैः ॥ संग्रामे त्विन्द्ररिपून् हंतुं युवां व्रजत उद्यतौ ॥ ६८ ॥ राज्ञाज्ञया तिकायस्तान् युध्य
मानान् रणे रिपून् ॥ अनयल्लक्ष्मणः षड्भिः शरैस्तांस्तौर्यमालयं ॥ ६९ ॥ वानराणां समूहश्च त्रि
शांश्च रजनीचरान् ॥ सुग्रीवेण हतः कुंभो राक्षसो बलदर्पितः ॥ ७० ॥ निकुंभो वायुपुत्रेण निह
तो देवकंटकः ॥ विरूपाक्षं युध्यमानं गदया तु विभीषणः ॥ ७१ ॥ भीममैन्दौ वक्षपतिं वानरेंद्रौ
निजघ्नतुः ॥ अंगदो जांबवानापहरयोंस्तान्निशाचरान् ॥ ७२ ॥ युध्यमानास्तु समरे महालक्षं
महाचलं ॥ जघान रामोपरणे बाणैरष्टिकंकंटप ॥ ७३ ॥ इंद्रजिन्मंत्रजध्वंतुरग्रूमारुह्य वै पु राम॰
नः ॥ वानरेषु च सर्वेषु शरवर्षं ववर्ष सः ॥ ७४ ॥ रात्रौ तद्बाणनिर्भिन्नं तु बलं सर्वं सराघवं ॥ नि १३०
श्चेष्टमखिलं दृष्ट्वा जांबवत्प्रेरितस्तदा ॥ ७५ ॥ वीर्यौषधीः समानीय हनूमान्मारुतात्मजः ॥ ऋ

ष्यांशयनमुल्लाध्य रामं हरिगणांस्तथा ॥ ७६ ॥ तैरेव वानरैः सार्द्धं हत्वा तोल्काकरैर्निशि ॥ दाहया
मास लंकां तां हस्त्यश्वरथराक्षसां ॥ ७७ ॥ वर्षन्तः शरजालानि सर्वदिक्षु घनो यथा ॥ सत्वा त्वोमेघना
दं तं घातयामास राघवः ॥ ७८ ॥ घातिते च परस्त्सु पुत्रमित्रादिबंधुषु ॥ कारितेषु च विघ्ने
षु होमजप्यादिकर्मणां ॥ ७९ ॥ ततः क्रुद्धो दशग्रीवो लंकाद्वारे विनिर्गतः ॥ क्वासौ राम इति ब्रु
ते मानुषस्तापसाकृति ॥ ८० ॥ योद्धा कपिबलेनुच्चैर्महाराक्षसाधिप ॥ वेगवद्भिर्विनीतैश्च
अश्वैश्चित्ररथे स्थितः ॥ ८१ ॥ आपायांतं तु तं दृष्ट्वा रामः प्राह दशाननं ॥ रामोहमत्र उत्सत्व
न एहि रावणमां प्रति ॥ ८२ ॥ इत्युक्ते लक्ष्मणः प्राह रामं राजीवलोचनं ॥ अनेन राक्षसा योस्मे
त्वं तिष्ठेति महाबल ॥ ८३ ॥ ततस्तु लक्ष्मणो गत्वा रुरोध शरवृष्टिभिः ॥ विंशद्बाहुविसृष्टैस्तु
शस्त्रास्त्रैर्लक्ष्मणं युधि ॥ ८४ ॥ रुरोध स दशग्रीवः तयोर्युद्धमभून्महत् ॥ देवाश्चोपि विमान
स्थावीक्षंतस्तुर्महाबलं ॥ ८५ ॥ ततो रावणशस्त्राणि छित्वास्ते तो हूणसायकैः ॥ लक्ष्मणः सार

पिंहत्वातस्याश्वानपिजह्मकैः ॥८६॥ रावणस्यधनुःछित्वाध्वजंचनिशितैःशरैः ॥ वह्नस्त्वजेमहा
वीर्योविव्याधपरवीरहा ॥८७॥ ततोरघ्वाग्निपत्याधःछिप्रंशाराक्षसनायकः ॥ शक्तिंजग्राह
कुपितोघंटानादनिनादिनीं ॥८८॥ अग्निज्वालाज्वलजिह्वांमहोल्कासदृशाकृतिं ॥ दृढमुद्यान्तु
निक्षिप्ताशक्तिःसालक्ष्मणोरसि ॥८९॥ विद्यायोवीयविश्वपदेवास्त्रस्तास्ततोवरे ॥ लक्ष्मणंप
तितंदृष्ट्वारुदद्भिर्वानरेश्वरैः ॥९०॥ दुःखितःशीघ्रमागम्यतत्पार्श्वेप्राहराघवः ॥ क्वगतोहनु
मान्वीरोमित्रोमेपवनात्मजः ॥९१॥ यदिजीवतिमेभ्राताकपेनिपतितोभुवि ॥ इत्युक्तेहनुमा
न्राजन्वीरोविख्यातपौरुषः ॥९२॥ बध्वांजुलिंगिबवनाषेदंदेयत्रज्ञांलितोस्मितोः ॥ रामःप्र
आनीय हमहावीरविशांशल्यकरणंमम ॥९३॥ अनुजंविरुजंशीघ्रंकुरुमित्रमहाबल ॥ ततोवेगा
द्वमुपत्यत्यगत्वाद्रोणगिरिंकपिः ॥९४॥ औषधींशीघ्रमानीयलक्ष्मणंनिरुजंक्षणात् ॥ चकार
देवैःपश्यतांराघवस्यच ॥ ततःक्रुद्धोजघानाशुरामःकमललोचनः ॥ रावणस्यबलंशीघ्र

हस्त्यश्वरथराक्षसं ॥९५॥ हत्वाक्षणेनरामस्तुतच्छरीरंतुसायकैः ॥ तीक्ष्णैर्जर्जरितंतत्कृत्वात
छिवाच्चानरैर्वृतः ॥९६॥ आस्तिचेष्टोदशग्रीवःसंज्ञांप्राप्यशनैःपुनः ॥ उत्थायरावणःक्रुद्धःसं
ज्ञांप्रापनवानादच ॥९७॥ तच्चाश्चर्यंवृणैर्व्योम्निविचित्रस्तादेवतागणाः ॥ एतस्मिन्नेवकालेतुरा
मंप्राप्यमहामुनि ॥९८॥ रावणेनबद्धवैरंतुअगस्त्योर्कसमद्युतिः ॥ आदित्यहृदयंनाममंत्रंप्रा
दाज्जयप्रदं ॥ रामोपिजप्त्वातन्मंत्रमगस्त्योक्तंजयप्रदं ॥ तदत्तंवैष्णवंचापमतुलंसगुणंद
दं ॥ पूजयित्वातदादायसज्जंकृत्वामहाबलः ॥ सौवर्णैःपुंखैस्तीक्ष्णैस्तुशरैर्मर्मविदारणैः ॥१०१
युयुधेराक्षसेन्द्रेणरघुनाथःप्रतापवान् ॥ तयोस्तुयुध्यतोस्तत्रलोमहर्षोमहामते ॥१०२
परस्परविसृष्टैस्तुव्योम्निसंवर्धितानलः ॥ समुत्थितोनृपश्रेष्ठरामरावणयोर्युधि ॥३॥ संगरेव
र्तमानेतुरामोदाशरथिस्तदा ॥ पदातिर्युयुधेवीरोरामोतुलपराक्रमः ॥४॥ सहस्राश्वैर्युतंदिव्यं
रथंमातलिमेवच ॥ प्रेषयामासदेवेंद्रोमहांतंलोकविश्रुतं ॥ रामस्तंरथमारुह्यपूज्यमानोदिवौ

न०पु०
१३२

कसैः मातल्युत्क्षेपदे शस्तु रामचंद्रः प्रतापवान् ब्रह्मदत्तवरं दृप्तं ब्रह्मास्त्रेण दशाननं जघानवै
रिणं क्रूरं रामदेवः प्रतापवान् १३ रामेण निहते तत्र रावणे सगणे रिपौ इंद्राद्या देवताः सर्वे परस्प
रमथाब्रुवन् रामोनन्त्वा हरिर्यस्मादस्माकं वैरिणं रणे अन्यैरवध्यमप्येनं जघान युधि रावणं त
स्मात्वं राम नामानमनंतमपराजितं पूजयामो वै तीर्थेनमित्युक्त्वा ते दिवौकसः नाना विमानैः श्री
मद्भिरवतार्य महीतले रुद्रं देवसुचं ब्रह्माद्या विधातारं सनातनं १४ विष्णुं जिष्णुं जगन्मूर्तिं सा
नुजं राममव्ययं तं पूजयित्वा विधिवत्परिवार्योपतस्थिवान् रामोयं पद्मपत्राक्षो देवानुत्स्मणोयं समव
स्थितः सुग्रीवो रविपुत्रोयं वायुपुत्रोयमास्थितः अंगदाद्या इमे सर्वे इत्यूचुस्ते दिवौकसः गंधर्व
मोदितदिक्चक्रान्नमरालिपदानुगाः देवस्त्रीकरनिर्मुक्ता राममूर्द्धनि शोभिता पपात पुष्पवृ राम०
ष्टिस्तु लक्ष्मणस्य च मूर्द्धनि ततो ब्रह्मा समागत्य हंसयाने सराघवं १५ अमोघाख्येन स्तोत्रेण १३२
स्तुत्वा राममवोचत १६ ब्रह्मोवाच त्वं विष्णुः सर्वभूतानां अनंतो ज्ञानदृक्प्रभुः त्वमेव ब्रह्म

व्यक्तं ब्रह्म वेदांते विदितं परं १७ त्वया यद्य निहतो रावणो लोकरावणः तस्माधु सर्वलोकानां देवा
नां कर्मसाधितं १८ इत्युत्क्षेपप्रयोनोनुशंकरः प्रीतिमांस्थितः प्रत्रास्य रामं तस्मात्वं भूयो दश
रथं नृपं १९ दर्शयित्वा गतो देवाः शोत्साश्रुद्धतिकान्नयन् ततो बाहुबलप्राप्तं विमानं पु
ष्पकं शुभं पूतामारोप्य त्रागतां तां आदि सुपवनात्मजः ततस्तु जानकी देवी विशोकांमूष
णान्वितां वंदितां वानरैर्दैस्तु सार्द्धं भ्राता महाबलः प्रतिष्ठाप्य महादेवं सेतुमध्ये स राघवः
लब्धवान् परमां सिद्धिं शिवे सन्तोरनुग्रहात् रामेश्वर इति ख्यातो महादेवः पिनाकधृक् तस्य
दर्शनमात्रेण सर्वहत्यां व्यपोहति रामस्तीर्णप्रतिज्ञो सौ नरतासक्तमानसः ततोयोध्यां पुरीं
द्रिव्यां गत्वा तस्यां द्विजोत्तमैः अभिषिक्तो वसिष्ठाद्यैः भरतेन प्रसादितः अकरोद्रमतो राजवि
र रामः प्रतापवान् यज्ञादिकं कर्म निजं चकृत्वा पौरैस्तु रामो दिवमारुरोह राजन्यपाते कथितं
समासतो रामस्य भूमंचरितं महात्मनः इदं मुनत्रा पठतां च श्रृण्वतां ददाति रामः स्वपदं जग

न॰पु॰ नतिः २७ इतिश्रीनरसिंहपुराणे रामप्रादुर्भावः समाप्तः श्रीमार्कंडेय उवाच अतः प
१३३ रं प्रवक्ष्यामि प्रादुर्भावद्वयं शुभं ततायस्य तु रामस्य कृष्णस्य तु समासतः १ पुरा ह्यसुरभारार्ता
मही ग्राहन्नृपोत्तम आसीनं देवमध्ये तु ब्रह्माणं कमलासनं २ देवासुरैर्न तायेत विष्णुना देव सदा
नवा ते सर्वे हि त्रियाजाताकं साध्याः कमलोद्भव तद्भूरि भारसंतप्तासा प्रतं चतुराननं ममतन्म्रो
रहानिस्याद्यथा देव तथा कुरु ४ तयैवमुक्तो ब्रह्माथ देवैः सह जगाम ह क्षीरोदस्योत्तरं कूलं वि
ष्णुभक्तिविबोधितं ५ तत्र गत्वा जगत्स्रष्टा देवैः सार्द्धं जनार्दनं नरसिंहमहादेवं स्तौतिः ६
धपुष्पादिभिः क्रमात् अभ्यर्च्य नत्वा गोयं देवा कुष्णेणच केशवं पूजयामास राजेंद्र तेन तुष्टो
जगत्पतिः ६ राजोवाच वाक्पुष्पेण कथं ब्रह्माप्यर्चितवान् हरिं तन्मे कथय विप्रेंद्र ब्रह्मोक्तं स्तो रा॰म॰
त्रमुत्तमं मार्कंडेय उवाच शृणु राजन् प्रवक्ष्यामि स्तोत्रं ब्रह्ममुखेरितं सर्वपापहरं पुण्यं विष्णु १३३
तुष्टिकरं परं तमाराध्य जगन्नाथं ऊर्द्धबाहुः पितामहः भूत्वैकमना राजन्निदं स्तोत्रमुदीरयत्

९ ब्रह्मोवाच नमामि देवं नरनाथमच्युतं नारायणं लोकगुरुं सनातनं अनादिमव्यक्तमचिंत्य
मव्ययं वेदांतवेद्यं पुरुषोत्तमं हरिं आनंदरूपं परमं परात्परं चिदात्मकं ज्ञानवतां परां गतिं सर्वात्म
कं सर्वगतैकरूपं ध्येयस्वरूपं प्रणमामि माधवं ११ भक्तप्रियं कांतमतीव निर्मलं सुराधिपैः सूरिज
नैरभिष्टुतं चतुर्भुजं नीरजवर्णमीश्वरं रथांगपाणिं प्रणतोस्मि केशवं १२ गदासिशंखाब्जकरं श्रि
यःपतिं सदाशिवं शार्ङ्गधरं रविप्रभं पीतांबरं हारविराजितोदरं नमामि विष्णुं सततं किरीटिनं
१३ गंडस्थलासक्तसुरक्तकुंडलं सुदीपिताशेषदिवं निजत्विषा गंधर्वसिद्धैरुपगीतसुध्वनिं जना
र्दनं भूतपतिं नमामि तं १४ हत्वासुरान्पाति युगे युगे नरान् स्वधर्मसंस्थान् भुवि संस्थितो हरिः य
ःसृष्टिकर्त्ता जगतः स्वयं च तं वासुदेवं प्रणतोस्मि केशवं १५ यो मत्स्यरूपेण रसातलस्थितान् वेदा
न्समाहृत्य मम प्रदत्तवान् निहत्य युद्धे मधुकैटभावुभौ तं वेदवेद्यं प्रणतोस्म्यहं सदा १६ देवासु
रैः क्षीरसमुद्रमध्यतो न्यस्तो गिरिर्येन धृतः पुरा महान् हिताय कौर्मं वपुरास्थितेन तं विष्णुमाद्यं

प्रणतोस्मि जगत्करं ॥ १७ ॥ हत्वा हिरण्याक्षमवतीव दर्पितं वराहरूपी भगवान्सनातनः ॥ योद्धमिते
तां सकलां समुद्धरन्तं वेदमूर्तिं प्रणमामि शूकरं ॥ कृत्वा नृसिंहं वपुरात्मनः परं हिताय लोकस्य सना
तनो हरिः ॥ जघान यस्तीक्ष्णनखैर्दितेः सुतं तं नारसिंहं पुरुषं नमामि ॥ १९ ॥ वामनःस्वरूपी भगवान्पु
रातनो बलिं बबंध त्रिभिरूर्जितैः पदैः ॥ जगत्त्रयं क्रम्य ददौ पुरंदरे तं देवमाद्यं प्रणतोस्मि वामनं ॥ २
० ॥ यः कार्त्तवीर्यं निजघान रोषात्त्रिःसप्तकृत्वः क्षितिपात्मजानपि ॥ तं जामदग्न्यं दितिजारनाशकं
नतोस्मि विष्णुं पुरुषोत्तमं सदा ॥ २१ ॥ सेतुं महांतं जलधौ बबंध यः संप्राप्य लंकां सगणं दशाननं ॥ जघा
न भूत्यै जगतां सनातनं तं रामदेवं सततं नतोस्मि ॥ २२ ॥ यथा त्वया वाराहनृसिंहरूपैः कृतं त्वया देव
हितं सुराणां ॥ तथाद्य भूमेः कुरु भारहानिं प्रसीद विष्णो भगवन्नमस्ते ॥ २३ ॥ मार्कंडेय उवाच ॥ इ
ति स्तुतो जगन्नाथः पद्मयोनिं सुरानपि स्तुत्यानया हं संतुष्टः पितामह दिवौकसः ॥ २४ ॥ श्रीधरः पद्मयो
निना ॥ आविर्बभूव भगवान् शंखचक्रगदाधरः ॥ २४ ॥ उवाच च हृषीकेशः पद्मयोनिं सुरानपि स्तुत्यान

याहं संतुष्टः पितामह दिवौकसः ॥ २५ ॥ पठतां पापनाशाय नराणां भक्तिमतामपि ॥ यतोस्मि प्रकटीभूतो दुर्ल्ल
भोपि हि वः सुराः ॥ २६ ॥ देवैः सेंद्रैः सरुद्रैस्तुष्टश्चार्थितो ह्यहं ॥ पद्मयोने वदाद्य त्वं श्रुत्वा तस्कर वाणिते
इत्युक्ते विष्णुना प्राह ब्रह्मा लोकपितामहः ॥ दैत्यानां गुरुभारेण पीडितेयं महीन्वहं ॥ २८ ॥ तेनागताः सुरैः
सार्द्धं नान्यदस्तीति कारणं ॥ इत्युक्तो भगवान्प्राह गच्छध्वममराः स्वयं ॥ २९ ॥ स्थानं निरामयाः सर्वे पद्म
योनिस्तु गच्छतु ॥ देवक्यां वासुदेवाच्च ह्यवतीर्य महीतले ॥ ३० ॥ सितकृष्णे च मच्छक्ती कंसाद्याघातयिष्य
तः ॥ इत्याकर्ण्य हरेर्वाक्यं हरिं नत्वा ययुः सुराः ॥ ३१ ॥ गतेषु त्रिदिवौकस्सु देवदेवो जनार्दनः ॥
शिष्टानां पालनार्थाय दुष्टनिग्रहणाय च ॥ ३२ ॥ प्रेषयामास ते शक्ती सितकृष्णे स्वके नृप ॥ तयो
ः सिता च रोहिण्यां वसुदेवाद्बभूव ह ॥ ३३ ॥ तद्वत्कृष्णा च देवक्यां वसुदेवाद्बभूव ह ॥ रौहिणेयोपि पु
ण्यात्मा रामनामाश्रितो महान् ॥ ३४ ॥ देवकीनंदनः कृष्णः तयोः कर्म शृणुष्व मे ॥ गोकुले बालक
लेतु राक्षसी शकुनी निशि ॥ ३५ ॥ रामेण निहता राजन् तयोः कृष्णेन पूतना ॥ धेनुकः सगणस्तालव

नेरामेण घातितः ३६ शकटश्चार्जुनौ वृक्षौ तद्वत्कृष्णेन घातितौ प्रलंबो निधनं नीतो दैत्यो रामेण
मुष्टिना ३७ कालियो दमितस्तोये कालिंद्या विषयृन्नगः गोवर्द्धनश्च कृष्णेन धृतो वर्षति वासवे
३८ गोकुलं रक्षता तेन अरिष्टश्च निपातितः केशी च निधनं नीतो दुष्टो वाजी महासुरः अक्रू
रेण च तौ नीतौ यमुनायां महात्मना ददर्श तु निमग्नश्च रामकृष्णौ महामते ४० स्वं स्वं रूपं ज
लेतस्य अक्रूरस्य विभूतिदं अनयोः प्रभावमतुलं ज्ञात्वा हृष्टा च यादवाः ४१ बभूवुः प्रीतम
नसो अक्रूरश्च नृपात्मज दुर्वचश्च प्रजल्पंतं कंसस्य रजकं ततः ४२ कृष्णो जघान रामश्च त
दस्त्रं बालरोदरौ मालाकारेण च त्वातु सुमनोभिः प्रपूजितौ ४३ ततस्तस्य वरान्दत्वा ऊर्ज
ान्रामकेशवौ गच्छंतौ राजमार्गे तु कुब्जया पूजितौ तवः ४४ तत्कौब्ज्यमपनायाय विरूपं क
र्मुकं ततः वभंज कृष्णो बलवान्कंसस्यापश्यतस्तुणात् ४५ रक्षपालान्जघानाथ रामस्तत्र
बलान्बहून् हत्वा कुवलयाश्वं च गजं रामजनार्द्दनौ ४६ प्रविश्य रंगं गजदंतपाणी महा

नुलिप्तौ वसुदेवपुत्रौ युद्धे तु रामो निजघान मल्लान् शैलोपमं मुष्टिकमप्रयात्मा ४७ कृष्णोऽ
पि चाणूरमतिप्रसिद्धं बलेन वीर्येन च कंसमल्लकं मल्लं तु तेनापचिरं जघान तं दैत्यमल्लं
जनसंसदीशः ४८ मृतस्य मल्लस्य च मुष्टिकस्य मित्रं पुनः पुष्करकं सरामः प्रपार्ष्णि
घातं कृतलक्षणं तं मुष्टिप्रहारेण जघान वीरं कृष्णः पुनस्तात्र्यककान्निहस्यत्य निगृह्य
कंसं विनिपात्य भूमौ स्वयं च देहे विनिपत्य तस्य हत्वा ततो व्यांनिचकर्ष कृष्णः ५० हते
तु कंसे हरिणा पि कृष्णो भ्राता पितस्याति रुपेण चोदितः सुनामसंज्ञो तु जवीर्ययुक्तो रामे
ण नीतो यमसादनं क्षणात् ५१ तौ वंद्यमानापितरौ सुहृष्टौ जनैः सर्वैः मल्लैर्यदुभिः सु
संवृतौ कृत्वान्नपं चोग्रसेनं गुरूणां सन्मां सुधर्मां दिवि तु महेंद्रः ५२ सर्वज्ञभावावपि रा
मकृष्णौ संप्राप्य सांदीपिनितोऽस्त्रविद्यां गुरोः कृते पंचजनं निहत्य यमं च जित्वा गुरवे सु
तं ददौ ५३ निहत्य रामो मगधेश्वरस्य बलं समस्तं बहुशः समागतं दिव्यास्त्रपूरे रम

न॰पु॰
१३६

रा विमावुभौ शुभ्रां पुरीं चक्रतु सागरांते ॥५४॥ तस्यां विधाय यजनस्य वासं हत्वाष्टगालं हरिर
ययात्मा ॥ दग्ध्वा महांतं यवनं सुपापा द्दूरं च हत्वान्यते जगाम ॥५५॥ रामोपसंशांतसमस्तविग्र
हः संप्राप्य नंदस्य पुनः स गोकुलं ॥ वृंदावने गोपजनैः सुपूजितः शौरेण रामो यमुनां चकर्ष
॥५६॥ संप्राप्य नापि मथुरे वनौ चरेमे तथा द्वारवतीस्सजां मध्ये ॥ क्षेत्रे च संप्राप्य तदा सरु
क्मिणीं हत्वापि रेमे पुरुषः पुराणः ॥५७॥ द्यूते कलिंगराजस्य दंतानुत्पाद्य जांगली ॥ जघा
न लपदेनेव रुक्मिणं चान्यतान्वितं ॥५८॥ रुक्मः प्राक् यो तिषे दैत्यान् हयग्रीवादिकान्ब
हून् ॥ हत्वा तु नरकं चापि जग्राह च महद्धनं ॥५९॥ दत्वा तु कुंडले दित्यै जित्वेंद्रं दैवतैः सह ॥
गृहीत्वा पारिजातं तु गतो द्वारावतीं पुरीं ॥६०॥ कुरुभिश्च धृतं सांबं राम एको महाबलः ॥ कु
रूणां भयमुत्पाद्य मोचयामास वीर्यवान् ॥६१॥ बाणबाहुवनं छिन्नं कृष्णेन युधि धीमता
रामेण तद्वलं नीलं हृयं कोटिगुणं रणात् ॥६२॥ देवापकारी रामेण निहतो वानरो वना

राम॰
१३६

रितः ॥ तीर्थयात्रा कृता तत्र रामेण जगतः कृते ॥ रामेण निहता ये तु तान्न संख्यातुमुत्सहे
॥ एवं तौ रामकृष्णौ तु कृत्वा दुष्टवधं नृप ॥६५॥ अवतार्य भुवो भारं जग्मतुः स्वेच्छया दिवं ॥ इत्येतौ
कथितौ दिव्यौ प्रादुर्भावौ मया तव ॥६६॥ संक्षेपाद्रामकृष्णाख्यौ कामं शृणु ममाधुना ॥ इत्थं
हिशांकी सितकृष्णरूपे हरेरनंतस्य महाबलाढ्यो ॥ कृत्वा तु भूमेर्नृपभारहानिं पुनश्च विष्णुं
प्रतिजग्मतुस्ते ॥६७॥ इति श्रीनरसिंहपुराणे कृष्णप्रादुर्भावो नाम ॥ के ॥ श्रीमार्कंडे
य उवाच ॥ अतः परं प्रवक्ष्यामि शृणु राजन् समासतः ॥ प्रादुर्भावं हरेः पुण्यं कल्क्याख्यं
पापनाशनं ॥ कलिकाले नरा जेंद्र नष्टे धर्मे महात्मने ॥ वृद्धिं गते तथा पापे व्याधिसंपीडिते
जने ॥२॥ देवैः संप्रार्थितो विष्णुः क्षीराब्धौ स्तुतिपूर्वकं ॥ संभलाख्ये महाग्रामे नानाजवसमा
कुले ॥ ताम्ना विष्णुयशाः पुत्रः कल्की राजा भविष्यति ॥ अश्वमारुह्य खङ्गेन म्लेच्छानुच्छादयि
ष्यति ॥४॥ म्लेच्छान्समस्तान् क्षितिनाशकृतान्हत्वा स कल्की पुरुषोत्तमांशः ॥ कृत्वा च या

न०पु०
१३७

गंबहुकांचनाढ्यंसंस्थाप्यधर्मंदिवमारुरोह ॥ देवावतारा:कथितास्त्वयैवहरेर्मयापार्थिवपापहंतुः
इमंसहायस्तुनृसिंहचक्रःशृणोतिनित्यंसउयातिविष्णुं ॥ ६ ॥ राजाउवाच ॥ तवप्रसादाद्विप्रेंद्र
प्रादुर्भावाःश्रुतामया ॥ नारायणस्यदेवस्यशुभएवतांकल्मषापहाः ॥ ७ ॥ कलिंविस्तरतोब्रूहित्वंहि
सर्वविदांवर ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चमुनिसत्तम ॥ ८ ॥ किमाहाराःकिमाचाराभविष्यंति
कलौयुगे ॥ सूतउवाच ॥ शृणुध्वमृषयःसर्वेनारदाजेनसंयुताः ॥ ९ ॥ सर्वेधर्माविनश्यंतिकृ
ष्णेकृष्णत्वमागते ॥ तस्मात्कलिर्महाघोरःसर्वपापस्यसाधकः ॥ १० ॥ ब्राह्मणाःक्षत्रियावैश्याः
शूद्राधर्मपराङ्मुखाः ॥ घोरेकलियुगेप्राप्तेद्विजावेदपराङ्मुखाः ॥ व्याजधर्मरताःसर्वेदंभाचारप
रायणाः ॥ असूयानिरताश्चैववृथाहंकारदूषिताः ॥ सर्वेसंक्षिप्यतेसत्यंनरैःपंडितगर्वितैः ॥ राम०
अहमेवाधिकइतिसर्वएववदंतिवै ॥ अधर्मलोलुपाःसर्वेतथान्येषांचनिंदकाः ॥ अतःस्व १३७
ल्पायुषःसर्वेभविष्यंतिकलौयुगे ॥ अल्पायुत्वान्मनुष्याणांनविद्याग्रहणंद्विजाः ॥ विद्याग्रहण

शून्यत्वादधर्मोवर्त्ततेपुनः ॥ १५ ॥ ब्राह्मणाद्यास्तथावर्णाःसंकीर्यंतेपरस्परं ॥ कामक्रोधपरामूढावृथासं
तापपीडिताः ॥ बद्धवैराभविष्यंतिपरस्परवधेप्सवः ॥ ब्राह्मणाःक्षत्रियावैश्याःसर्वेधर्मपराङ्मुखाःशू
द्रतुल्याभविष्यंतितपःसत्यविवर्जिताः ॥ उत्तमानीचतांयांतिनीचाश्चोत्तमतांतथा ॥ राजानोद्रव्य
निरताःतथालोभपरायणाः ॥ धर्मकंचुकसंवीताधर्मविध्वंसकारिणः ॥ १९ ॥ घोरेकलियुगे
प्राप्तेसर्वाधर्मसमन्विते ॥ योयोश्वरथनागाढ्यःसससराजाभविष्यति ॥ २० ॥ पितॄन्पुत्रानियो
क्ष्यंतिवध्वःश्वश्रूश्चकर्मसु ॥ पतीन्पुत्रान्वंचयित्वागमिष्यंतित्रयोन्यतः ॥ २१ ॥ पुरुषा
ल्पंबहुस्त्रीकंश्ववाहुल्यंगवांक्षयः ॥ धनानिश्लाघनीयानिसतांवृत्तमपूजितं ॥ २२ ॥ खंडव
र्षीचपर्जन्यःपंथानस्तस्करावृताः ॥ सर्वःसर्वंविजानातिवृद्धाननुपसेव्यच ॥ नकश्चिदक
विर्नास्तिसुरापाब्रह्मवादिनः ॥ किंकराश्चभविष्यंतिशूद्राणांचद्विजातयः ॥ द्विषंतिपितरंपु
त्रागुरुंशिष्याद्विषंतिच ॥ पतिंचवनिताद्वेष्टिकृष्णेकृष्णत्वमागते ॥ लोभाभिभूतमनसःस

र्वे उः कर्मशालिनः परान्नलोलुपा नित्यं भविष्यंति द्विजातयः परस्त्रीनिरताः सर्वे परद्रव्यपराय-
णाः घोरे कलियुगे प्राप्ते नरं धर्मपरायणं असूयानिरताः सर्वे उपहासं प्रकुर्वते नव्रता-
नि चरिष्यंति ब्राह्मणा वेदनिंदकाः न यक्ष्यंति न होष्यंति हेतुवादैर्विकुत्सिता द्विजाः कु-
र्वंति हि नार्थ पितृयज्ञादिकाः क्रियाः २९ न पात्रे घेव दानानि कुर्वंति च नरास्तथा क्षीरो-
पाधिनिमित्तेन न गोषु प्रीतिं कुर्वते ३० वध्नंति च द्विजान्वे वधनार्थे राजकिंकराः दानय-
ज्ञजपादीनां विक्रीणंते फलं द्विजा ३१ प्रतिग्रहं प्रकुर्वंति चंडालाद्यैरपि द्विजाः कलेः प्रथम-
पादेपि विनिंदंति हरिं नराः ३२ युगांते च हरेर्नाम नैव कश्चित्स्मरिष्यति शूद्रस्त्रीसंगनिरता वि-
धवासंगलोलुपाः ३३ शूद्रान्नभोगनिरता भविष्यंति कलौ द्विजाः न च द्विजातिशुश्रूषां न स्वध-
र्मप्रवर्तनं ३४ करिष्यंति तदा शूद्राः प्रव्रज्यालिंगिनोधमाः कषायपरवीताश्च जटिला भस्मधूसराः
३५ शूद्रा धर्मान्प्रवक्ष्यंति कूटबुद्धिविशारदः एते चान्ये च बहवः पाषंडा विप्रसत्तमाः ३६ ब्राह्मणाः

क्षत्रिया वैश्याः भविष्यंति कलौ युगे गीतवाद्यरता विप्रा वेदवादपराङ्मुखाः भविष्यंति कलौ प्राप्ते
शूद्रमार्गप्रवर्तिनः अल्पद्रव्या वृथालिंगा वृथाहंकारदूषिताः ३९ हर्त्तारो न च दातारो भविष्यंति
कलौ युगे प्रतिग्रहपरा नित्यं द्विजाः सन्मार्गशीलिनः आत्मस्तुतिपराः सर्वे परनिंदापरास्तथा
विश्वासहीनाः पुरुषाः देववेदद्विजातिषु ४० असंस्कृतोक्तिवक्तारो द्विजद्वेषरतास्तथा स्वध-
र्मत्यागिनः सर्वे कृतघ्ना भिन्नवृत्तयः ४१ याचकाः पिशुनाश्चैव भविष्यंति कलौ युगे परापवादनि-
रता आत्मस्तुतिपरायणाः ४२ परस्वहरणोपायचिंतकाः सर्वदा जनाः अत्याह्लादपरास्त-
त्रं भुंजाना परवेश्मनि ४३ तस्मिन्नेव दिने प्रादेवतार्चनतत्पराः तत्रैव निंदानिरता भुक्त्वा
चैकत्र संस्थिताः ४४ द्विजाश्च क्षत्रिया वैश्याः शूद्राश्चान्ये च जातयः अत्यंतकामिनश्चैव सं-
कीर्यंते परस्परं ४५ न शिष्यो न गुरुः कश्चिन्न पुत्रो न पिता तथा न भार्या न पतिश्चैव भविता
तत्र संकरे ४६ शूद्रवत्सैव जीवंति द्विजा नरकयोनितः अनावृष्टिभयप्रायाः गगनासक्तदृ-

ष्यः भविष्यंति जनाः सर्वे तदा मृत्युभयकातराः अन्योपाधिनिमित्तेन शिष्यान्गृह्णंति निस्पृहाः ४
८ उभाभ्यामपिपाणिभ्यां शिरःकंडूयनं स्त्रियः कुर्वंत्यो गुरुभर्तॄणामाज्ञां भेत्स्यंति तं द्विताः यद्ये
दानयज्ञं तिन होष्यंति द्विजातयः तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ५० सर्वधर्मेषु नष्टेषु या
ति निःश्रीकतां जगत् एवं कलेः स्वरूपं च कथितं विप्रसत्तमाः ५१ हरिभक्तिपरान्नैवं नक
लिर्बाधते द्विजाः तपः परं कृतयुगे त्रेतायां ध्यानमेव हि द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे
यत्कृते दशभिर्वर्षैः त्रेतायां हायनेन तत् द्वापरे तच्च मासेन अहोरात्रेण तत्कलौ ध्यायन्कृ
ते यजन्यज्ञैस्त्रेतायां द्वापरेर्चयन् ५४ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवं समस्तजग
दाधारं परमार्थस्वरूपिणं ५५ घोरे कलियुगे प्राप्ते विष्णुध्यायन्न सीदति अहो तीव सुभाग्यास्ते स
कृद्ये केशवार्चकाः ५६ घोरे कलियुगे प्राप्ते सर्वकर्मबहिःकृते न्यूनातिरिक्ततानस्यात्कलौ वे
दोक्तकर्मणां ५७ हरिस्मरणमेवात्र संपूर्णफलदायकं हरिकेशवगोविंदवासुदेवजग

न्मय ५८ जनार्दन जगन्नाथ पीतांबरधराच्युत इत्येतीरयंति ये नित्यं न हि तान्बाधते कलिः
अहो हरिपरा ये तु कलौ सर्वभयंकरे ते सभाग्या महात्मानः तत्संगनिरता अपि हरिनामपरा ये च
हरिकीर्तनतत्पराः हरिपूजारता ये च ते कृतार्था न संशयः इत्येतद्वः समाख्यातं सर्वदुःखनि वा
रणं समस्तपुण्यफलदं कलौ विष्णोः प्रकीर्तनं ६२ इति श्रीनरसिंहपुराणे कलिलक्षणकी
र्तनं ५४ राजोवाच मार्कंडेय कथं शुक्रः पुरा बलिमुखे गुरुः वामनेन स विप्राक्षः स्तुत्वा
तल्लब्धवान्कथं मार्कंडेय उवाच वामनेन स विप्राक्षो बहुतीर्थेषु भार्गवः जाह्नवीसलिले
स्थित्वा देवमभ्यर्च्य वामनं ऊर्ध्वबाहुः स देवेशं शंखचक्रगदाधरं हृदि संचिंत्य तुष्टाव नरसिंहं
सनातनं ३ शुक्र उ॰ नमामि देवं विश्वेशं वामनं विष्णुरूपिणं बलिदर्पहरं शांतं शाश्वतं पु
रुषोत्तमं ४ धीरं शूरं महादेवं शंखचक्रगदाधरं विशुद्धं ज्ञानसंपन्नं नमामि हरिमच्युतं ५
सर्वशक्तिमयं देवं सर्वगं सर्वभावनं अनादिमजरं नित्यं नमामि गरुडध्वजं ६ सुरासुरैर्भ

न॰पु॰
१४०

क्रिमद्भिःस्तुतोनारायणःसदा पूजितंचहृषीकेशंतंनमामिजगद्गुरुं ७ हृदिसंकल्प्ययद्रूपंध्यायं
तियतयःसदा ज्योतीरूपमनौपम्यंनरसिंहंनमाम्यहं ८ नजानंतिपरंरूपंब्रह्माद्यादेवता॰
गणाः यस्यावताररूपाणिसमर्चतिणाविधिनमि ९ राजोवाच भक्तानांलक्षणंब्रूहिनरसिं
हस्यमेद्विज येषांसंगतिमात्रेणविष्णुलोकोनदूरतः १ मार्कंडेयउवाच विष्णुभक्तामहो
त्साहाविष्णुर्चनविधौसदा संयताधर्मसंपन्नासर्वार्थान्साधयंतिते २ परोपकारनिरता
गुरुशुश्रूषणेरता वर्णाश्रमाचारयुतासर्वेषांसुप्रियंवदाः ३ वेदवेदार्थतत्त्वज्ञागतरो॰
षागतस्पृहा शांताचसौम्यवदतानित्यंधर्मपरायणाः ४ हितंमितंचवक्तारःकलेशात्मानि
पिप्रियाः दंभमायाविनिर्मुक्ताकामक्रोधविवर्जिताः ५ ईदृग्विधानराधीराःक्षमावं
तोबहुश्रुताः विष्णुकीर्तनसंजाताहर्षरोमांचिताजनाः ६ विष्णुर्चापूजनेयत्नातत्क
थायांकृतादराः ईदृग्विधामहात्मानोविष्णुभक्ताःप्रकीर्तिताः राजोवाच येवर्णा

राम॰
१४०

श्रमधर्मस्थातेभक्ताकेशवंप्रति इतिप्रोक्तंत्वयाविद्वन्भृगुवर्यगुरोमम वर्णानामा॰
श्रमाणांचधर्ममेवक्तुमर्हसि येःकृतैस्तुष्यतेदेवोनरसिंहःसनातनः मार्कंडेयउवाच
तत्रतेवर्णयिष्यामिपुराव्रत्तमनुत्तमं मुनिभिःसहसंवादंहारीतस्यमहात्मनः हारी
तंधर्मतत्त्वज्ञंआसीनंबहूयाठकं प्रणिपत्याब्रुवन्सर्वेमुनयोधर्मकांक्षिणः भगवन्स
र्वधर्मज्ञसर्वधर्मप्रवर्तक वर्णानामाश्रमाणांचधर्मंप्रब्रूहिशाश्वतं नारायणःपुरादेवो
जगत्सृष्टजलोपरि सुष्वापभोगपर्यंकेशयनेतुश्रियासह तस्यसुप्तस्यनाभौतुदिव्यंप
द्मममूत्किल तन्मध्येचाभवद्ब्रह्मावेदवेदांगभूषणः १५ सचोक्तस्तेनदेवेनजगत्स्र
जपुनःपुनः सोसृजद्वृत्रियाबाह्वोर्वैश्यांस्तुऊरुतोसृजत् शूद्रांस्तुपादतःसृष्टाते
षांचैवानुपूर्वशः धर्मशास्त्रंचमर्यादांप्रोवाचकमलोद्भवः १७ तदहंसर्वंप्रवक्ष्यामिश्र
णुतद्विजसत्तमाः धन्यंयशस्यमायुष्यंस्वर्ग्यमोक्षफलप्रदं १८ ब्राह्मण्यांब्राह्मणेने

वउत्पन्नो ब्राह्मणः स्मृतः ॥ तस्य धर्मं प्रवक्ष्यामि तद्योग्यं देशमेव च ॥ १९ ॥ कृष्णसारो मृगो य
त्र स्वभावानु प्रवर्त्तते ॥ तस्मिन्देशे वसन्धर्मं कुरु ब्राह्मणपुंगव ॥ २० ॥ षट्कर्माणि च या
न्याहुः ब्राह्मणस्य मनीषिणः ॥ तैरेव सततं यस्तु प्रवर्त्तेत् सुखमेधते ॥ २१ ॥ अध्ययना
ध्यापनं च यजनं याजनं तथा ॥ दानं प्रतिग्रहश्चेति कर्मषट्कमिहोच्यते ॥ २२ ॥ अध्य
ध्यापनं च त्रिविधं धर्मचार्यकारणं ॥ शुश्रूषाकारणं चैव त्रिविधं परिकीर्त्तितं ॥ २३ ॥
योग्यानध्यापयेच्छिष्यान्याज्यानपि च याजयेत् ॥ विधिना प्रतिगृह्णंश्च गृहधर्मप्र
सिद्धये ॥ वेदमेवाभ्यसेन्नित्यं शुभे देशे समाहितः ॥ नित्यं नैमित्तिकं काम्यं कर्म कुर्या
त्प्रयत्नतः ॥ २४ ॥ गुरुशुश्रूषणं चैव यथान्यायमतंद्रितः ॥ सायं प्रातरुपासीत विधिना
ग्निं द्विजोत्तम ॥ २५ ॥ स्नातस्तु कुर्वीत वैश्वदेवं दिने दिने ॥ अतिथिं चागतं तत्स्या
पूजयेद्भक्तितो गृही ॥ २६ ॥ अन्यानप्यागतान्दृष्ट्वा पूजयेदविरोधतः ॥ स्वदारनिरतो

नित्यं परदारविवर्जकः ॥ सत्यवादी जितक्रोधः स्वधर्मनिरतो भवेत् ॥ स्वकर्मणि च संप्राप्ते
प्रमादं नैव कारयेत् ॥ प्रियां हितां वदेद्वाचं परलोकाविरोधिनीं ॥ एवं धर्मः समुद्दिष्टो ब्राह्म
णस्य समासतः ॥ २९ ॥ धर्ममेवं तु यः कुर्यात्स याति ब्रह्मणः पदं ॥ इत्येष धर्मः कथितो म
या ते विप्रस्य राजन्निखिलाघहारी ॥ वदामि राजन्द्विजनस्य धर्मं पृथक्पृथक् बोधत विप्र
वर्याः ॥ ३० ॥ इति श्रीनरसिंहपुराणे ब्राह्मणधर्मकथनं ॥ हारीत उवाच ॥ क्षत्रिया
दीन्प्रवक्ष्यामि यथावदनुपूर्वशः ॥ येन येन प्रवर्त्तंते विधिना क्षत्रियादयः ॥ १ ॥ राजस्थः
क्षत्रियश्चैव प्रजा धर्मेण पालयेत् ॥ कुर्यादध्ययनं सम्यक् यजन्यज्ञान्यथाविधि ॥
२ ॥ दद्याद्दानं द्विजाग्रेभ्यो धर्मबुद्धिसमन्वितः ॥ स्वदारनिरतो नित्यं परधर्मविवर्जितः ॥
३ ॥ नीतिशास्त्रार्थकुशलः संधिविग्रहतत्त्ववित् ॥ देवब्राह्मणभक्तः स्यात्पितृकार्यप
रस्तथा ॥ ४ ॥ धर्मेणैव जयं कांक्षेदधर्मं परिवर्जयेत् ॥ उत्तमां गतिमाप्नोति क्षत्रियोप्येव

न०पु० मज्वरन् ५ गोरक्षं कृषिवाणिज्यं कुर्याद्वैश्यो यथाविधि दानधर्मं यथाशक्त्या गुरुशुश्रू
१४२ षणं तथा ६ लोभदंभविनिर्मुक्तः सत्यवागनसूयकः स्वदारनिरतो दांतः परदारवि
वर्जितः ७ धनैर्विप्रान्समर्प्येत यज्ञकालेष्वरान्वितः यज्ञाध्ययनदानानि कुर्या
न्नित्यमतंद्रितः ८ पितृकार्यं च तत्कालेनरसिंहार्चनं तथा एतद्वैश्यस्य धर्मोक्तः स्व
धर्ममनुष्ठितः ९ एतदासेवमानस्तु स वैश्यः स्यान्न संशयः वर्णत्रयस्य शुश्रूषां कु
र्याच्छूद्रः प्रयत्नतः १० दासवद्ब्राह्मणानां तु विशेषेण समाचरेत् अयाचितं प्रदातव्यं
कृषिं वृत्त्यर्थमाचरेत् ग्रहाणां मासिकं कार्यं पूजनं न्यायधर्मतः धारणं जीर्णवस्त्रस्य
विप्रस्योच्छिष्टमार्जनं १२ स्वदारेषु रतिं कुर्यात्परदारविवर्जितः पुराणश्रवणं विप्रा राम०
नरसिंहपूजनं १३ तथा विप्रनमस्कार्यं श्रद्धासमन्वितं सत्यसंभाषणं चैव रागद्वेष १४२
विवर्जनं इत्थं कुर्वन्सदा शूद्रो मनोवाक्कायकर्मभिः स्थानमैंद्रमवाप्नोति नष्टपा

पस्तु पुण्यभाक् वर्णेषु धर्मा विविधा मया प्रोक्ता तथाक्रमं ब्रह्मणा सुरवैरिघ्न शृणु धर्मान्वा
श्रमं धर्ममाद्यं मयोच्यमानं क्रमशो मुनींद्राः १६ हारीत उवाच उपनीतो माणव
को वसेद्गुरुकुले सदा गुरोः प्रियहितं कार्यं कर्मणा मनसा गिरा १७ ब्रह्मचर्यमधः
शय्या तथा वह्नेरुपासनं उदकुंभं गुरोर्दद्याद्गां पाचेधनमाहरेत् १८ कुर्यादध्यय
नं पूर्वं ब्रह्मचारी यथाविधिः विधिं हित्वा प्रकुर्वाणो न स्वाध्यायफलं लभेत् १९ य
त्किंचित्कुरुते कर्म विधिं हित्वा निरात्मकः न तत्फलमवाप्नोति कुर्वाणो विधि
रिविच्युतः २० तस्मादेव व्रतानीह चरेत्स्वाध्यायसिद्धये शौचाचारमशेषं तु शिक्ष
येद्गुरुसंनिधौ २१ अजिनं दंडकाष्ठं च मेखलां चोपवीतकं धारयेदप्रमत्तस्तु ब्र
ह्मचारी समाहितः २२ सायंप्रातश्चरेद्भैक्ष्यं भोजनं संयतेंद्रियः गुरोः कुले न भिक्षे
त न ज्ञातिकुलबंधुषु २३ अलाभे त्वन्यगेहानां पूर्वं पूर्वं च वर्जयेत् आचम्य प्रय

तोनित्यमश्नीयाद्गुर्वनुज्ञया॥ २४ शयनात्पूर्वमुत्थायापरस्मिन्दंतशोधनं॥ वस्त्रादिकम
पात्रंचगुरवे प्रतिपादयेत्॥ २५ स्नानेकृतेगुरौपश्चात्स्नानंकुर्वीतयत्नवान्॥ ब्रह्मचारि
व्रतीनित्यंनकुर्याद्दंतशोधनं॥ २६ छत्रोपानहमभ्यंगंगंधमाल्यानिवर्जयेत्॥ नृत्यगीत
कथालापमैथुनंचविशेषतः॥ २७ वर्जयेन्मधुमांसंचरसास्वादंतथास्त्रियः॥ काम
क्रोधंचलोभंचपरिवादंतथानृणां॥ २८ स्त्रीणांचप्रेक्षणालंभमुपघातंपरस्यच॥ ए
कःशयीतसर्वत्रनरेतःस्कंदयेत्क्वचित्॥ स्वप्नेसिक्त्वाब्रह्मचारीद्विजःशुक्रमकाम
तः॥ स्नात्वार्कमर्चयित्वाग्निंपुनर्मामित्यृचंजपेत्॥ आस्तिकोहरहःसंध्यांत्रिकालंसं
यतेंद्रियः॥ उपासीततथान्यायंब्रह्मचारिव्रतेस्थितः॥ अभिवाद्यगुरोःपादौसंध्याक
र्मावसानतः॥ यथायोगंप्रकुर्वीतमातापित्रोस्तुभक्तितः॥ एतेषुत्रिषुतुष्टेषुतुष्टा
:स्युःसर्वदेवताः॥ तदेषांशासनेतिष्ठेद्ब्रह्मचारीविमत्सरः॥ ३३ अधीत्यचतुरोवेदा

न्वेदौवेदमथापिवा॥ गुरवेदक्षिणांदत्वातदास्वस्वेच्छयावसेत्॥ विरक्तःप्रव्रजेद्विद्वा
न्संरक्तस्तुगृहीभवेत्॥ सरागोनरकंयातिप्रव्रजन्हिध्रुवंद्विजः॥ यस्यैतानिसुगुप्तानि
जिह्वोपस्थोदरंगिरः॥ सन्यसेदकृतोद्वाहोब्राह्मणोब्रह्मवर्षवान्॥ ३६ एवंयोविधिमा
स्थायनयेत्कालमनंदितः॥ तेनभूयःप्रजायेतब्रह्मचारिदृढव्रतः॥ ३७ योब्रह्मचा
रीविधिमेतमास्थितंचरेत्सपिव्यागुरुसेवनेरतः॥ संप्राप्यविद्यामपिदुर्लभांचतांफलं
हितस्याःसकलंहिविंदति॥ ३८ हारीतउवाच॥ गृहीतवेदाध्ययनःश्रुतिशास्त्रार्थत
त्ववित्॥ गुरोर्दत्तवरःसम्यक्समावर्तनमारभेत्॥ असमानर्षिगोत्रांकन्यांभ्रा
तृयुतांशुभां॥ सर्वावयवसंयुक्तांसद्वृत्तामुद्वहेत्ततः॥ ४० नोद्वहेत्कपिलांकन्यांनाधि
धिकांगानरोगिणीं॥ वाचालमनिलोचनवर्गांनीमदर्शनां॥ ४१ नर्क्षवृक्षनदीनाम्नीं
नपर्वतनामिकांहीनरोगिणीं॥ वाचालमनिलोमांचनवंगांभीमदर्शनां॥ ४२ मेपक्षहि

प्रेष्यनाम्नीं न च भीषणनामिकां ॥ ४२ ॥ अव्यंगांगीं सौम्यनाम्नीं हंसवारणगामिनीं । त
न्वोष्टकेशदशनां मृद्वंगीमुद्वहेत्स्त्रियां ॥ ४३ ॥ ब्राह्मेन विधिना कुर्यात् प्रशस्तेन द्विजोत्त
माः । यथा योगं तथा ह्येव विवाहं वर्णधर्मतः ॥ ४४ ॥ उषःकाले समुत्थाय कृतशौचो द्वि
जोत्तमः । कुर्यात्स्नानं ततो विप्रो दंतधावनपूर्वकं ॥ ४५ ॥ मुखे पर्युषिते नित्यंपतो
पूतोऽभवेन्नरः । तस्मात्कुक्षमपार्द्रं वा भक्षयेद्दंतधावनं । खदिरं च कदंबं च करंसं च व
टं तथा । अपामार्गं च विल्वं च अर्कं चोडुंबरं तथा ॥ ४७ ॥ एते प्रशस्ताः कथिता दंत
धावनकर्मणि । दंतधावनकाष्टं च वक्ष्यामि समासेन प्रशस्तता ॥ ४८ ॥ सर्वे कंटकि
नः पुण्याः क्षीरिणस्तु यशस्विनः । अष्टांगुलेन मानेन तत्प्रमाणमिहोच्यते ॥ ४९ ॥ प्रादे
शमात्रमथवा तेन दंतान्विशोधयेत् । प्रतिपद्दर्शषष्ठीषु नवम्यां चैव सत्तमाः । दंता
नां काष्टसंयोगाद्दहत्यासप्तमं कुलं । अभावे दंतकाष्टस्य प्रतिषिद्धे च तद्दिने

५१ अपां द्वादशगंडूषैर्मुखशुद्धिर्विधीयते । स्नात्वा मंत्रवदाचम्य पुनराचमनं चरे
त् ॥ ५२ ॥ मंत्रवान्प्रोक्ष्य चात्मानं प्रक्षिपेदुदकांजलिं । आदित्येन सह प्रातर्मंदेहा नाम
राक्षसाः ॥ ५३ ॥ युध्यंति वरदानेन ब्रह्मणो व्यक्तजन्मनः । उदकांजलिविक्षेपो गायत्र्या
चाभिमंत्रितः ॥ ५४ ॥ तान्दहति राक्षसान्सर्वान्मंदेहान्रविवैरिणः । ततः प्रयाति स
विता ब्राह्मणैरभिरक्षितो दिवि ॥ ५५ ॥ मरीच्याद्यैर्महाभागैः सनकाद्यैश्च योगिभिः । तस्मा
न्न लंघयेत्संध्यां सायंप्रातर्द्विजः सदा ॥ ५६ ॥ उल्लंघयति यो मोहात्स याति नरकं ध्रुवं । सा
यंमंत्रवदाचम्य प्रोक्ष्य सूर्यस्य चांजलिं । दत्वा प्रदक्षिणं कृत्वा जलं स्पृष्ट्वा विशुध्यति
पूर्वां संध्यां सनक्षत्रामुपक्रम्य यथाविधि । गायत्रीमभ्यसेत्तावद्यावदर्कणि पश्यति
ततस्त्वावसथं प्राप्य होमं कुर्यात्स्वयं बुधः । संचित्य भृत्यवर्गस्य भरणार्थं विचक्षणः
ततः शिष्यहितार्थाय स्वाध्यायं किंचिदाचरेत् । ईश्वरं चैव रक्षार्थमभिगच्छेत् द्विजो

त्रमं: कुशपुष्पेंधनादीनिगत्वादूरात्समाहरेत् मध्याह्निकांक्रियांकुर्यात् शुचौ
देशेसमाहितः विधिंस्नानस्यवक्ष्यामिसमासात्पापनाशनं स्नात्वायेनविधानेनसद्यो
मुच्येतकिल्बिषात् सुधीःस्नानार्थमादायशुक्लांकुशतिलैःसह सुमनाश्चततोगच्छे
त्नदींशुद्धांमनोरमां नद्यांतुविद्यमानायांनस्नायादल्पवारिषु शुचौदेशेसमभ्युक्ष्यस्था
पयेत्कुशमृत्तिकां मन्त्रोयेनस्वकंदेहंमपिप्रक्षाल्ययत्नतः स्नानाङ्गरीरसंशोध्यकुर्या
दाश्रममंबुधः शनैर्जलंप्रविश्याथनमोवरुणमप्पति ६६ हरिमेवस्मरन्चित्तेनिमि
मज्जेच्चबहूदके ततःस्नानंसमासाद्यपश्चादाचम्यमंत्रतः प्रोक्षयेद्वरुणंदैवतैर्मंत्रै
ःपावमानीभिः कुशाग्रस्थेनतोयेनप्रोक्ष्यात्मानंप्रयत्नतः ६८ आलभेन्मृत्तिकांगा
त्रेइदंविष्णुरितित्रिधा ततोनारायणंदेवंसंस्मरन्प्रविशेज्जले ६९ निमज्यांतर्ज
र्ज्जलेसम्यक्त्रिपठेदघमर्षणं स्नात्वाकुशतिलैस्तद्वद्देवर्षीन्पितृभिःसह तर्प्य

यित्वाजलात्तस्मान्निःक्रम्यचसमाहितः जलतीरंसमासाद्यधौतेशुक्लेचवाससी परिधायोत्तरीयंचन
कुर्यात्केशधूननं नरक्तमुल्बणंवासोननीलंतत्प्रशस्यते ७२ मलाक्तंतुदशाहीनंवर्जयेदंबरंबुधः
ततःप्रक्षालयेत्पादौमृत्तोयेनविचक्षणः ७३ त्रिःपिबेद्वीक्षितंतोयंआस्यंद्विःपरिमार्जयेत् पादौशि
रश्चाभ्युक्ष्यत्रिराचम्यसंस्पृशेत् ७४ अंगुष्ठेनप्रदेशिन्यानासिकांसमुपस्पृशेत् अंगुष्ठकनिष्ठिका
भ्यांनाभिंहृदितलेनच ७५ शिरश्चांगुलिभिःसर्वैःबाहूचैवततःस्पृशेत् अनेनविधिनाचम्यब्रा
ह्मणःशुद्धमानसः ७६ दर्भेतुदर्भपाणिःस्यात्प्राङ्मुखःसुसमाहितः प्राणायामांस्तुकुर्वीतयथा
शास्त्रमतंद्रितः ७७ जपयज्ञंततःकुर्यात्गायत्रीवेदमातरं त्रिविधोजपयज्ञःस्यात्तस्यभेदंनिबोध
य ७८ वाचिकश्चउपांशुश्चमानसस्त्रिविधःस्मृतः त्रयाणांजपयज्ञानांश्रेयःस्यादुत्तरोत्तरं
यदुच्चनीचस्वरितैःशब्दस्पष्टपदाक्षरैः शब्दमुच्चारयेद्वाचाजपयज्ञःसवाचिकः ८० शनैरु
च्चारयेन्मंत्रंईषदोष्ठौप्रचालयेत् किंचिन्मंत्रंस्वयंविद्यादुपांशुःसजपःस्मृतः ८१ धियाय

दृष्टश्रेणो वर्णाद्वर्णं पदात्पदं ॥ शब्दार्थचिंतनं ध्यानं तदुक्तं मानसं जपं ॥ ८२ ॥ जपेन देवता नित्यं
स्तूयमाना प्रसीदति ॥ प्रसन्ना विपुलान्भोगान्दद्यान्मुक्तिं च शाश्वतीं ॥ यक्षरक्षपिशाचाश्च ग्रहाः सूर्या
दिदूषणाः ॥ जापिनं नोपसर्पंति दूराद्देवा पयांति ते ॥ ऋष्यादिकं परिज्ञाय जपयन्नमतंद्रितः ॥ जपेद
हरहः स्नात्वा सा विनीतमना द्विजः ॥ ८५ ॥ सहस्रपरमां देवीं शतमध्यां दशावरां ॥ गायत्रीं यो जपेन्नि
त्यं न स पापैर्न लिप्यते ॥ अथ पुष्पांजलिं दत्वा भानवे चोर्द्ध्वबाहुकं ॥ उदुत्यं च जपेन्मंत्रं चित्रं तच्चक्षु
रित्यपि ॥ ८७ ॥ प्रदक्षिणमुपावृत्य नमस्कुर्याद्दिवाकरं ॥ स्वेन तीर्थेन देवादीनद्भिः संतर्पयेद्बुध
॥ ८८ ॥ देवान्देवगणांश्चैव ऋषीनृषिगणांस्तथा ॥ पितॄन्पितृगणांश्चैव नित्यं संतर्पयेद्बुधः ॥ ८
९ ॥ स्नानवस्त्रं ततः पीड्य पुनराचमनं चरेत् ॥ दर्भेषु दर्भपाणिः स्याद्ब्रह्मयज्ञविधानतः ॥ प्राङ्मुखो
ब्रह्मयज्ञं तु कुर्याच्छुद्धिसमन्वितः ॥ ततोर्घ्यं भानवे दद्यात्तिलपुष्पजलान्वितं ॥ उत्थाय मूर्द्धप
र्यंतं हंसः शुचिषदित्यृचा ॥ जले देवं नमस्कृत्य ततो गृहगतः पुनः ॥ ९२ ॥ विधिना पुरुषसूक्तेन

तत्र विष्णुं समभ्यर्चयेत् ॥ वैश्वदेवं ततः कुर्याद्बलिकर्म यथाविधि ॥ ९३ ॥ गोदोहमात्रमतिथिं प्रति
वीक्षेत वै गृही ॥ अदृष्टपूर्वमतिथिं मागतं प्राक्समर्चयेत् ॥ ९४ ॥ आगत्य च पुनर्द्वारि प्रत्युत्थानेन सा
धुना ॥ स्वागतेनाग्नयस्तुष्टा भवंति गृहमेधिनं ॥ ९५ ॥ आसनेन तु दत्तेन प्रीतो भवति देवराट् ॥
पादशौचेन पितरः प्रीतिमायांति तस्य च ॥ ९६ ॥ अन्नाद्येन च दत्तेन तृप्यतीह प्रजापतिः ॥ तस्मा
दतिथये कार्यं पूजनं गृहमेधिना ॥ ९७ ॥ भक्त्या च शक्तिमान्नित्यं विष्णुमर्च्चां चिंतयेत् ॥ भिक्षां च भि
क्षवे दद्यात्परिव्राड्ब्रह्मचारिणे ॥ ९८ ॥ अकल्पितान्नाद्युद्धृत्य सर्वव्यंजनसंयुतं ॥ दद्याच्च मन
सो नित्यं भिक्षां भिक्षोः प्रयत्नतः ॥ ९९ ॥ अकृते वैश्वदेवे तु भिक्षार्थे गृहमागते ॥ अवश्यमेव दा
तव्यं स्वर्गसोपानकारकं ॥ १०० ॥ उद्धृत्य वैश्वदेवान्नं भिक्षां दत्वा विसर्जयेत् ॥ वैश्वदेवाकृतं दो
षं शक्तो भिक्षुर्व्यपोहितु ॥ १०१ ॥ सुवासिनी कुमारीश्च भोजयित्वातुराणपि ॥ बालवृद्धांस्ततः
शेषं स्वयं भुंजीत वै गृही ॥ २ ॥ प्राङ्मुखोदङ्मुखो वापि मौनी च मितभाषणः ॥ अन्नं पूर्वं नमस्कृ

न॰पु॰
१४७

न्नमप्रहृष्टेनांतरात्मना ३ पंचः प्राणाहुतीः कुर्यात्स्वमंत्रेण पृथक्पृथक् ततः स्वादुकरं चान्नं
भुंजीत सुसमाहितः ४ आचम्य देवताभीष्टां संस्मरेदुदरं स्पृशन् इतिहासपुराणाभ्यां कंचि
त्कालं यापयेद्बुधः ५ ततः संध्यामुपासीत बहिर्गत्वा विधानतः कृतहोमश्च भुंजीत रात्रौ वृ
त्तिपिमर्द्दयेत् ६ सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितं नांतराभोजनं कुर्यात् अग्निहो
त्रसमन्वितः ७ शिष्यानध्यापयेन्नित्यं अनाध्यायं विवर्जयेत् स्मृत्युक्तान्सकलान्
पूर्वपुराणोक्तानपि द्विजः ८ महानवम्यां द्वादश्यां भरण्यामपि चैव हि तथाक्षय्यतृतीयायां
शिष्यान्नाध्यापयेद्बुधः ९ माघमासे तु सप्तम्यां रथ्यामध्ययनं त्यजेत् अध्यापनमथाभ्यं
स्नानकाले विवर्जयेत् १० दानं च विधिना देयं गृहस्थेन हितैषिणा हिरण्यदानं गोदानं
भूमिदानं विशेषतः ११ एतानि यः प्रयुक्तेत श्रोत्रियो यो द्विजोत्तम सर्वपापविनिर्मुक्तः
स्वर्गलोके महीयते १२ मंगलाचारयुक्तस्य शुचिः श्रद्धापरो गृही श्राद्धं च श्रद्धया कुर्यात्तस्य

राम॰
१४७

नि ब्राह्मणः पदं १३ जातादुत्कर्षमाप्याप्य नरसिंहप्रसादतः स तस्मान्मुक्तिमाप्नोति ब्राह्मणैः
सहसत्तम १४ एवं हि विप्राः कथितो मया वः समासतः शाश्वतधर्मराशिः सम्यक् गृहस्थस्य स
तो हि धर्मः कुर्वन्प्रयत्नाद्धरिमेति युक्तः १२५ इति श्रीनरसिंहपुराणे गृहस्थधर्मः हा
रीत उवाच अतः परं प्रवक्ष्यामि वानप्रस्थस्य लक्षणं धर्मम् अग्र्यं महाभागाः कथ्यमानं नि
बोधत १ गृहस्थः पुत्रपौत्रादीन्दृष्ट्वा पलितमात्मनः स्वभार्यां तनये स्थाप्य स्वशिष्यैः प्रवि
शेद्वनं २ जटाकलापचीराणि नखगात्ररुहाणि च धारयन्जुहुयादग्नौ वैतानविधिना
स्थितः ३ नतर्पणैर्मसंभूतैर्नीवाराद्यैरतंद्रितः कंदमूलफलैर्वापि कुर्यान्नित्यस्थि
यां बुधः ४ त्रिकालस्नानयुक्तस्तु कुर्यात्तीव्रं तपः सदा पक्षांते वा अश्नीयान्मासांते
चापराकृत ५ चतुःकालेपि चाश्नीयात्कालेषु तत्परात्परे षष्ठकाले ह्यथवाथ
पवा वायुभक्षकः ६ ग्रीष्मे पंचाग्निमध्यस्थो धारावर्षास्तु वैनपात् हेमंतिके जले स्थित्वान

न॰पु॰
१४९

येष्वाचंतपश्चरन् ७ एवंस्वकर्मयोगेनकृत्वाशुद्धिमथात्मनः । अग्निंचात्मनिवेशंकृत्वाव्रजेद्वा
चोत्तरांदिशं ८ आदेहपाताद्वनगोमौनमास्थायतापसः । स्मरन्नतींद्रियंब्रह्मलोकेमहीयते ९
तपोहियःसेवतिकाननस्थोवसेन्महत्स्वसमाधियुक्तः । विमुक्तपापोहिमनःप्रशांतःप्रयाति
विष्णोःसदनंद्विजेंद्रः १० इतिश्रीनरसिंहपुराणेवानप्रस्थधर्मोनाम हारीतउवाच । अ
तऊर्ध्वंप्रवक्ष्यामियतिधर्ममनुत्तमं । श्रद्धयायदनुष्ठाययतिर्मुच्येतबंधनात् १ एवंवनाश्रमे
तिष्ठन्तपसादग्धकिल्बिषः । चतुर्थमाश्रमंगच्छेत्संन्यस्यविधिनाद्विजः २ दिव्यंकृषिभ्योदे
वेभ्यःस्वपितृभ्यश्चयत्नतः । दत्वाश्राद्धंऋषिभ्यश्चमनुजेभ्यस्तथात्मने ३ इष्टिंवैश्वानरींकृत्वा
प्राजापत्यमथापिवा । अग्निंचात्मनिसंस्थाप्यमंत्रवजेत्पुनः ४ ततःप्रभृतिपुत्रादौसुखलोभादि
वर्जयेत् दद्याद्वक्ष्मावुदकंसर्वभूताभयंकरं ५ त्रिदंडंवैणवंसम्यक्सत्वचंसमपर्वकं । वेष्टि
तंकृष्णगोवालरज्वातुचतुरंगुलं ६ आसनंदारुजंप्रोक्तंमहांतंचतुर्जलंतथा । ग्रंथिभिर्वात्रि

राम॰
१४९

निर्युक्तंवस्त्रपूतंजलंपिबेत् ७ कौपीनंनाच्छादनंवासःकंथांशीतनिवारिणीं । पादुकेचापिगृ
ह्णीयात्कुर्यान्नान्यस्यसंग्रहं ८ एतानितस्यलिंगानियतेःप्रोक्तानिधर्मतः । संगृह्यकृतसं
न्यासोगत्वातीर्थमनुत्तमं ९ स्नात्वाचाचम्यविधिवत्जलपूतेनशुक्लकेनवे । वारिणातर्प
यित्वातुमंत्रवद्भास्करंनमेत् १० आसीनःप्राङ्मुखोमौनीप्राणायामत्रयंचरेत् । गायत्रींच
यथाशक्तिजप्त्वाध्यायेत्परंपदं ११ स्थित्यर्थमात्मनोनित्यंभिक्षाटनमथाचरेत् । सायाह्न
कालेविप्राणांगृहाणिविचरेद्यतिः । स्यादल्पीयावतान्नेनतावद्भैक्षंसमाचरेत् । ततोनिवे
घतत्पात्रंअभ्युक्ष्याचम्यसंयमी १३ सूर्यादिदेवतेभ्योदत्वान्नंप्रोक्ष्यवारिणा । भुंजीतपर्णे
पुटकेपात्रेवावाग्यतोयतिः । वटकाश्वत्थपत्रेषुकुंभीतिंदुकपत्रयोः । कोविदारकरंजे
षुनभुंजीतकदाचन १५ भुक्त्वाचम्यनिरुद्धासुरुपतिष्ठेतभास्करं । जपध्यानेतिहासे
श्चदिनशेषंनयेद्यतिः १६ कृतसंध्यस्ततोरात्रिंनयेद्देवगृहादिषु । हृत्पुंडरीकनिलये

येध्यायन्नारायणंहरिं ॥ तत्पदंसमवाप्नोतिपश्चात्साप्यतनिवर्त्तते ॥ इतिपतिधर्मः ॥ मार्कं
डेयउवाच ॥ वर्णानामाश्रमाणांचकथितंलक्षणंवच ॥ भूयःकथितराजेंद्रतत्कथंपूजनंभ
वेत् ॥ यैर्मंत्रैरर्च्यतेविष्णुःयेषुस्थानेषुवैमुने ॥ तानिस्थानानितन्मंत्रंत्वमाचक्ष्वमहामुने ॥ ३ ॥ मार्कंडे
यउवाच ॥ अर्चनंसंप्रवक्ष्यामिविष्णोरमिततेजसः ॥ यत्कृत्वामुनयःसर्वेपरंनिर्वाणमाप्नुयात् ॥
४ ॥ अग्नौक्रियावतांदेवोहृदिदेवोमनीषिणां ॥ प्रतिमास्वल्पबुद्धीनांयोगिनांहृदयेहरिः ॥ ५ ॥ अ
स्वग्नौहृदयेसूर्येस्थंडिलेप्रतिमासुच ॥ एतेषुचहरेःसम्यगर्चनंमुनिभिःस्मृतं ॥ ६ ॥ तस्यसर्वम
यत्वाच्चस्थंडिलेभावितात्मनः ॥ आनुष्टुभस्यसूक्तस्यविष्णुस्तस्यचदेवता ॥ ७ ॥ पुरुषोयोजग
द्बीजंऋषिर्नारायणःस्मृतः ॥ दद्यात्पुरुषसूक्तेनयःपुष्पाण्यपएव ॥ ८ ॥ अर्चितंस्याज्जगत्स
र्वंतेनवैसचराचरं ॥ आद्ययावाहयेद्देवमृचातुपुरुषोत्तमं ॥ द्वितीययासनंदद्यात्पाद्यंदद्या
त्तृतीयया ॥ चतुर्थ्यार्घ्यंप्रदातव्यंपंचम्याचमनीयकं ॥ १० ॥ षष्ठ्यास्नानंप्रकुर्वीतसप्तम्याव

स्त्रमेवच ॥ यज्ञोपवीतमष्टम्यानवम्यागंधमेवच ॥ ११ ॥ दशम्यापुष्पदानंस्यात्एकादश्याचधूप
कं ॥ एकादश्याचतथादीपंत्रयोदश्यार्चनंतथा ॥ १२ ॥ चतुर्दश्यास्तुतिंकृत्वापंचदश्याप्रदक्षिणं
॥ षोडश्योद्वासनंकुर्यात्शेषकर्माणिपूर्ववत् ॥ १३ ॥ स्नानंवस्त्रंचनैवेद्यंदद्यादाचमनीयकं ॥ ष
ण्मासात्सिद्धिमाप्नोतिदेवदेवंसमर्च्चयन् ॥ १४ ॥ संवत्सरेणतेनैवसायुज्यमधिगच्छति ॥ हविषा
ग्नौजलेपुष्पैःध्यानेनहृदयेहरिः ॥ १५ ॥ अर्चयंतिसूरयोनित्यंजपेनरविमंडले ॥ आदित्यमंडे
लेदिव्यंदेवदेवमनामयं ॥ १६ ॥ शंखचक्रगदापाणिंध्यात्वाविष्णुमुपासते ॥ ध्येयःसदासवितृ
मंडलमध्यवर्तीनारायणःसरसिजासनसंनिविष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटी
हारीहिरण्मयवपुर्धृतशंखचक्रः ॥ एतत्तडन्केवजमेवस्तकंदिनेदिनेज्ञावितवितविष्णु
बुद्धिः ॥ ससर्वपापंप्रविहायवैत्स्वंपदंप्रयात्यच्युततुष्टिकृन्नरः ॥ पत्रेषुपुष्पेषुतोयेष्वक्री
ततमेषुसदैवसत्सुनत्सेकजन्मेपुरुषेपुराणे ॥ मुक्त्यैकिमर्थंक्रियतेनयत्नः ॥ इत्येव

न॰पु॰
१५०

मुक्तः पुरुषस्य विष्णोरर्च्चाविधिस्तेघनयान्पेन्र्‌ ॥ अनेन नित्यं कुरु विष्णुपूजां प्राप्स्यंतदिष्टं यदि वैष्ण
वं पदं ॥ २० ॥ इति श्रीनरसिंहपुराणे विष्णोरर्च्चाविधिः ॥ सहस्रानीक उवाच ॥ सम्यगुक्तं त्व
या ब्रह्मन्वैदिकः परमो विधिः ॥ विष्णोर्देवातिदेवस्य पूजनं प्रति मे धुना ॥ १ ॥ अनेन विधिना
ब्रह्मन्पूज्यते मधुसूदनः ॥ वेदमंत्रैर्व्रतान्यैस्तु तस्मात्सर्वहितं वद ॥ २ ॥ मार्कंडेय उ॰ ॥ अष्टा
क्षरेण देवेशं नरसिंहमनामयं ॥ गंधपुष्पादिभिर्नित्यं समर्च्चयेदच्युतं नरः ॥ ३ ॥ राजन्न
ष्टाक्षरो मंत्रः सर्वपापहरः परः ॥ समस्तयज्ञफलदः सर्वशांतिकरः शुभः ॥ ४ ॥ ॐ नमो नारा
यणाय गंधपुष्पादि सकलमतेनैव निवेदयेत् ॥ अनेनाभ्यर्चितो देवः प्रीतो भवति तत्
क्षणात् ॥ किं तस्य बहुभिर्मंत्रैः किं तस्य बहुभिर्व्रतैः ॥ ॐ नमो नारायणायेति मंत्रः सर्वार्थ राम॰ १५०
साधकः ॥ ६ ॥ इमं मंत्रं जपेद्यस्तु शुचिर्भूत्वा समाहितः ॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्य
माप्नुयात् ॥ ७ ॥ तस्मात्कुरु नृपश्रेष्ठ प्रतिष्ठां विष्णुवार्च्चनं ॥ दानानि विप्रमुख्येभ्यः प्र

यच्छ विधिना नृप ॥ ८ ॥ एवं कृतेन नृपश्रेष्ठ नरसिंहप्रसादतः ॥ प्राप्नोति वैष्णवं तेजो यत्कांक्षंति
मुमुक्षवः ॥ पुरा पुरंदरो राजन्स्त्रीत्वं प्राप्तोऽपधर्मतः ॥ तृणबिंदुमुनेः शापान्मुक्तो ह्यस्माद्धरा
कृपात् ॥ सहस्रानीक उवाच ॥ एतत्कथय नृदेवेंद्र देवेंद्रस्याघमोचनं ॥ कोऽपधर्मः कथं स्त्रीत्वं प्रा
प्तोमेव वद कारणं ॥ मार्कंडेय उवाच ॥ राजेंद्र महदाख्यानं शृणु कौतूहलान्वितं ॥ विष्णुभक्ति
प्रजननं स एव तां पठतामिदं ॥ १२ ॥ पुरा पुरंदरस्यैव देवराज्यं प्रकुर्वतः ॥ वैराग्यस्यापि जननं
संभूतं बाह्यवस्तुषु ॥ १३ ॥ इंद्रस्तदारान्द्विषमत्वभावो राज्येषु भोगेष्वपि सोऽप्यचिंतयत् ॥ ध्रुवं
विरागीकृतमानसानां स्वर्गस्य राज्यं न च किंचिदेव ॥ १४ ॥ राज्यस्य सारं विषयेषु भोगो भोगस्य चां
ते न च किंचिदस्ति ॥ विमृश्य चैतन्मुनयोऽप्यजस्रं मोक्षाधिकारं परिचिंतयंति ॥ १५ ॥ सदैव भोगा राम॰
यतः प्रवृत्तिः भोगावसाने हि तपो विनष्टं ॥ मैत्र्यादिसंयोगपरा सुखानां विमुक्तिमाजां न तपो
न भोगः ॥ १६ ॥ विमृश्य चैतत्स सुराधिनाथो विमानमारुह्य स किंकिणीकं ॥ नूनं हराराधनकार

एनकेनाशमप्येतिविमुक्तिकाम ।१७। सएकदामानसमागतःसन्संवीक्ष्यतेयन्नृपतेश्चकानां
समर्च्यंतीगिरिजांघ्रियुग्मंध्वजामिवानंगमहारथस्य ।१८। प्रधानजांबूनदशुद्धवर्णांतसंजयन्म
नोमनेत्रां सुश्लक्ष्णवस्त्रांतरदृश्यगात्रांनीहारमध्यादिवचंद्रलेखां ।१९। तांवीक्ष्यवीरणसहस्र
शरेणकामंकामांगमोहितमतिर्नृपयौवराज्ञी इराधवगंस्वगृहमेत्यसुसंविलाप्य स्वस्थोनतदासु
रपतिर्विषयाजितापी ।२०। पूर्वंवरस्यासुकुलेपिजन्मततोहिसर्वांगशरीररूपं ततोधनंउ
द्वितमेवपश्चात्धनाधिपत्वंसुकृतेनलब्धं स्वर्गाधिपत्यंचमयापलब्धंतथापिजोगायतचात्ति
नाप्यं यस्त्वंपरित्यज्यविमुक्तिकामत्तिस्त्रमिलउमैलिरत्तिचिन्ने ।२२। मोक्षोमुनामित्रकामनीयोमे
हृस्यकिंकारणमत्तिराजेहेत्रसुपक्षंपतिरुत्पद्वरेकोनामचारएष्यकृषिंकरोति ।२३। संसारदुः
खोपहतानरायेकर्तुंसमर्पानचकिंचिदेव स्वकर्मिणोनाप्यप्रविवर्जितात्रवांछंतितेमो
हृपपेविमूढाः एतद्विमश्यबहुधामतिमान्प्रवीरोरूपेणमोहितमनाधनदांगनायाः सर्वा

निचारकुलंपरिमुक्तधैर्यःसस्मारमारममराधिपचक्रवर्ती ।२५। समागतोसौपरिमंदमंदंका
मोतिकामाकुलचित्तवृत्तिः पुरामहेशानकृतांगनाशोधैर्यालयंगदतिकोविशंकः ।२६। स्वादि
श्यतांनाथयदस्तिकार्यंकोनामतेसंप्रतिशत्रुभूतः शीघ्रंसमादेशयमाविलंबंतस्यापदंसंप्रति
नोदिशामि ।२७। श्रुत्वातदातस्यवचोगिरामंमनोगतंतस्यरमंतुतोष निष्पन्नमर्थंसहसैव
मत्वाजगाद्वाक्यंसविहस्यवीरः ।२८। हतोपियेनाईशरीरमात्रश्चक्रेप्यनंगत्वमुपागतेना सो
दुसमर्थोपिपरोपिलोकेनामतेशत्रुविघातं ।२९। एकाग्रचित्तागिरिजार्चंतियासंमोहयत्वेवम
मात्रचित्तं रत्नामनंगायतलोचनास्यांमदंगसंगेकरतांविधेहि ।३०। एवमुक्तःसरवन्नभे
नत्वकार्यज्ञावाधिकगौरवेण संधायबाणंकुसुमायुधोपिसस्मारमारःपरिमोहनंसुधीः
३१ संमोहितापुष्पशरेणबालाकामोनकामंमदविह्वलांगी विहायपूजांहसतेसुरेशःकः
कामकोदंडरवंसहेता ।३२। विलोलनेत्रेण्वयिकासिबालेसंमोहयंतीवमनांसिपुंसां सुराधि

पोवाकामिदं जगाद कस्मे दकांतावस्युत्पन्नाजः ३३ उक्तापिबालामदविक्लांगीरोमांचसस्वे
दसकंपगात्री ऊतांऽजलीकामशालीमुखेनसगद्गदंवाक्यमुवाचमंदं ३४ कांताधुनेऽस्यच
यत्कन्याज्ञाज्ञाचगौरीचरणार्धनाय ब्रवीहिकार्यचतवास्तिनापकेस्त्वंवदतिप्ससिकामरूप
३५ इंद्रउवाच सात्वंसरमागच्छत्वंजनस्यमौविरात्मदंगसंगीसुकृतांवृताश्च त्वयाविनाजी
वितमप्यनल्पंस्वर्ग्यस्पराज्यंमनतिष्ठजंस्मात् ३६ शोकाचसैवंमधुरंचतेनकंदर्पसंतापितचारुदे
हा विमानमारुह्यवजत्सताकंसुरेशकंठग्रहणंचकार ३७ जगामशीघ्रंसहितानाकनाथःसाकं
तयामंदरकंदरासु अदृष्टदेवासुरसंचरासु विचित्ररत्नांकुरभासुरासु ३८ रेमेतयासाकमु
दारवीर्यःविचित्रसुरैश्वर्यगलादरोपि स्वयंचयस्यालघुपुष्पशय्यांचकारचातुर्यनिधिःस्मकामः
३९ जातःऊताश्चर्यमिदंनाथःसकामसंभोगेषुसदाविदग्धः मोहाधिकंस्नेहरसातिमग्नःपरांगना
लिंगनसंगसौख्यं ४० अथागतायक्षपतेःसमीपंनार्योनुवर्ग्यैश्चचित्रसेनां समंत्रमाःसंभ्र

मखिन्नगात्राःसगद्गदंप्रोचुरसाहसंज्ञाः ४१ नूनंसमाकर्णयचक्रनाथविमानमारोप्यजगा
मकश्चित् संवीक्ष्यमाणःकङ्कोपिकांतांविगृह्यवेगादिहसोपितस्करः ४२ वचोनिशम्यापथ
नाधिनाथोविषोपमंजातमनीषानिषण्णाननः जगादभूयोनचकिंचिदेवबभूववैदग्ध इवाग्नि
दग्धः ४३ विज्ञापितोथोविरकन्यकाभिःयाश्चित्रसेनासहचारिणीभिः मोहायनोदायमलिंद
धातःसकंठकुञ्जोपिसमाजगाम आत्मागतंवीक्ष्यसराजःउन्मीलिताक्षोवचनंजगाद विनि
श्वसन्गाढसकंपगात्रःस्वस्थंमनोप्याशुविधायदीनः तथौवनंयघुवतीविदोधनंतुचतुपस्व
जनोपयोगि तज्जीवितंयत्क्रियतेसुधर्मःतदाधिपत्यंयदिदुष्टविग्रहः ४६ धिग्मेधनंजीवित
मप्यनल्पंराज्यंदृढसंघतिगुह्यकानां विशामिचाग्निंनचवेदकश्चित्पराभवोस्तीतिचकोमता
नां ४७ पार्श्वस्थितस्यापिचजायतोमेगतातडागंगिरिजार्चनाय ऊताचकेनापिवयंनविद्यो
धुवंनतस्यास्तिजयंचमत्तो ४८ जगादवाक्यंसचकंठकुञ्जोमोहायनोदायविभ्रोःसमंवीक्ष्य

न·पु०
१५३

कर्णतोनापनचास्तियोग्यः कांतावियोगेनिजदेहघातः ४९ एकापुरामवधूर्हृताचनिशाचरेण
पिमतोनसोपि अनेकशःसंतितवात्रनार्यः कोनामचिन्नेक्रियतेविषादः ५० विमुंचशोकंकुरु
रुविक्रमेमतिंधैर्यंसमाजंबधयत्नराज त्वशंनजल्पंतिरुदंतिसाधवः पराभवंवाप्यकृतंसहंते
५१ त्वंतंहिकार्यंगुरुदर्शयंतिसहायवान्विन्नपकीलरोसिकिं सहायकार्यंकुरुतेहिसंवलिस्व
यंहियस्यावरजोविभीषणः ५२ धनदउ० विभीषणोमेपलिपत्तूक्तोदायादभावंनविमुंचतीति
ति एवंसंप्रसन्नानभवंतिउक्तेनाः कृतोपकाराहरिवत्तनिष्ठुराः ५३ नचोपकारैर्नगुणैर्नसौ
हृदैः प्रसादमायांतिमनोहितोत्तीराः उवाचवाक्यंसचकंठकुंडलोयुक्तंत्वयोक्तंचधनानिनाथ
परस्परंप्रतिचतेविरुद्धाः तथापिलोकेनपराभवोस्ति पराभवंनान्यकृतंसहतेतेनोत्तमंजलंक्षा राम०
लयतेतृणानि तस्मात्समागत्यधनाधिनाथपार्श्वेचवेगेनविभीषणस्यस्वबाहुवीर्यार्जितचित्तमो १५३
गीनांस्वबंधुवर्गेषुहिकोविरोधः इत्युक्तःसतदातेनकंठकुंडेनमंत्रिणा विभीषणस्यसामी

प्यंजगामाश्वविचारयन् ततोलंकाधिपःश्रुत्वाबांधवंपूर्वजंतदा प्रत्युत्थायजगामाशुविन
येनसमन्वितः ततोविभीषणोदृष्ट्वातदादीनंचबांधवं संतप्यमानसोभ्यजगादेदंवचोमहत्
५९ विभीषणउ० कथंदीनोसियक्षेशकिंकष्टंतवचेतसि निवेदयाधुनास्माकंनिश्चयात्मार्जयि
मितत् ६० तदैकांतंसमासाद्यकथयामासवेदतो गृहीताकिंस्वयंयातानिहताकेनविद्विषा
६१ भ्रातःकांतांनयस्यामिचित्रसेनांमनोरमां एतद्दुःखंमहत्कष्टंममनारीसमुद्भवं ६२ प्राणा
न्घातयिष्यामिवनासाधचवल्लभं विभीषणउवाच आनयिष्यामितेकांतांयत्रतत्रस्थितांवि
भो ६३ कःसमर्थोधुनास्माकंहर्तुंनाथगृहस्यच ततोविभीषणस्तत्रनाडीजंघांनिशाचरीं ६
४ त्वरोसंजल्पयामासनानामायागरीयसी धनदस्यवयाकांताचित्रसेनाभिधानतः ६५ साच
केनरुतालोकेमानसेसरसिस्थिता तांचजानीहिसंवीक्ष्यदेवराजादिवेश्मसु ततोनिशानिशा
चरीत्वपरूत्वामायामयंवपुः जगामत्रिदिवंशीघ्रंदेवराजादिवेश्मसु ६७ मयारुह्यागृहांदृष्टे

न॰पु॰
१५४

मोहंयास्यतिबोपलः ॥ यस्याःसमंध्रुवंरूपंविद्यतेसचराचरे ॥ ६८ ॥ एतस्मिन्नेवकालेचदेवराजो
पिपुत्रक ॥ संप्राप्तोमंदराकाग्रंप्रेरितश्चित्रसेनया ॥ ६९ ॥ गृहीतुंदिव्यपुष्पाणिनंदनस्थानिच
तत्रपश्यन्नतांतन्वीनिजस्थानेसमागतः ॥ ७० ॥ स्वलीबरूपसंपन्नांगीतगानपरायणां ॥ तांवी
क्ष्यदेवराजोपिसकामवशगोभवत् ॥ ७१ ॥ ततःसंप्रेरयामासदेववैद्यौसुराधिपः ॥ तस्याःपा
र्श्वेसमानेतुंध्रुवंचांतःपुरेतदा ॥ ७२ ॥ देववैद्यौतदागत्यजल्पतश्चाग्रतस्थितौ ॥ आगच्छभव
तन्वंगिदेवराजसमीपगा ॥ ७३ ॥ इत्युक्त्वासातदाताभ्यांजगादमधुराक्षरं ॥ नारीजंघाउवाच ॥
देवराजःस्वयंयन्मेपार्श्वेचत्रागमिष्यति ॥ ७४ ॥ तस्यस्वाच्छंचकर्त्तव्यंनान्यथासर्वथामया ॥ तौ
तदावासवंगत्वाऊचतुःस्तद्वचनंशुभं ॥ ७५ ॥ वासवउवाच ॥ समादेशयतन्वंगिकिंकर्त्तव्यंमया पद्म॰
धुना ॥ सर्वंदास्यसंततस्तेयाचसेतद्ददाम्यहं ॥ तन्वंग्युवाच ॥ याचितंयदिमेनाथदास्यसीतिन १५४
संशयः ॥ ततोहंवशगादेवभविष्यामिनसंशयः ॥ ऋद्यत्वंदर्शयास्माकंसर्वंकांतापरिग्रहं

ममरूपसमारामाकांतातेचास्तिवानवा ॥ ७८ ॥ तयाचोक्तेचवचनेसस्मयोवासवोवदत् ॥ दर्श
यिष्यामिसर्वंतेदेविकांतापरिग्रहं ॥ ७९ ॥ ससर्वंदर्शयामासवासवोंतःपुरंतदा ॥ ततोजगाद
नूयःसःकिंचिदिदंममास्तिते ॥ ८० ॥ विमुच्यैकांचपुत्रींसर्वंतेदर्शितंमया ॥ सारमेमंदरेचास्ति
न्नविज्ञातासुरासुरैः ॥ ८१ ॥ तांचतेदर्शयिष्यामिनाख्येयंकस्यचित्त्वया ॥ ततःसदेवराजोपि
तयासार्द्धंचपुत्रक ॥ ८२ ॥ गच्छत्येवांवरेभूपमंदरंपतिभूधरं ॥ तस्यवेगवमानस्यविमानेना
र्द्धवर्त्मसा ॥ दर्शननारदस्यापितस्यजातंतदांवरे ॥ तंवीक्ष्यनारदंवीरोजल्पयामासवासवः
नमस्तुत्यजगादेवैःक्वयास्यसिमहामुने ॥ ततःकृताशीःसमुनिरवदीत्त्रिदिवेश्वरं ॥ ८५ ॥ ग
च्छामिमानसंस्नातुंदेवराजसुखीभव ॥ नारीजंघेतिकुशलंराहसानांमहात्मनां ॥ विभीषणोपि
लंकातासुखीतिष्ठतिसर्वदा ॥ एवमुक्त्वाचमुनिनासाकूतवदनाभवत् ॥ ८६ ॥ विस्मृतोदेव
राजोपिजल्पितोऽनयानया ॥ नारदोपिगतःस्नातुंकैलासेमानसंसरः ॥ ८७ ॥ इदंस्त्वांहनुका

मोपित्वागरन्मंदराचलं तत्रश्रमोस्तिवैनूनंतस्य बिंदोर्महात्मनः तत्रैविश्रम्यतत्रैव वधत्वा के
शेषुराक्षसी हंतुमिच्छति देवेशो नाडीजंघा निशाचरी ९० तावत्तत्र समायातस्त्रण बिंदुर्नि
जाश्रमे धृताक्षं दृतिसा राजन् इंद्रेणापि निशाचरी नोमांरक्ष निपुणा त्माहंन्यमानां च सो
घतं तदागत्य मुनिश्रेष्ठस्त्रण बिंदुर्महातपाः जगाद पुरतः स्थित्वा मुंचेमां महितां च ने ज
घ्नत्येवमुनौ तस्मिन्नमहेंद्रेण निशाचरी वज्रेणाभिनिहता वस्म कोपयुक्तेन चेतसा सचुं
कोपमुनिश्रेष्ठो वेपमानो मुहुर्मुहुः यदेषा युवती दुष्ट निहता मे तपोवने ततस्त्वं मम शापे
न निश्चयात्स्त्रीत्वं विष्यति ९५ इंद्र उवाच एषानाथ महादुष्टा राक्षसी निहता मया स्व
हं स्वामी सुराणां च शापं मा देहि मेधुना ९६ मुनिरुवाच इत्युक्तोपि तदा चेंद्रो जातः स्त्रीत्वं नसं
शयः जगाम त्रिदिवं मात्र तपसो नाभवान्न निघ्नंति परस्परं ९७ इत्युक्तोपि तदा चेंद्रो जातस्त्री
त्वं न संशयः जगाम त्रिदिवं स्वप्रहत शक्तिपराक्रमः ९८ नासीनोहि न वत्स्येव सर्वदा देवसंसदि

देवाऊः खेदंसमापन्नाः दृष्ट्वा स्त्रीत्वं गतं हरिं ९९ ततो देवगणाः सर्वे वासवमन्विताः जग्मुश्च ब्रह्म
सदनं तत्पादीना शचीतदा १०० ब्रह्मात्मन समापिश्चतावत्तत्रैव संस्थितः देवा ऊचुश्च ते सर्वे वास
वे तस्समन्विताः १०१ तत्र बिंदोर्मुनेः शापान्पातः स्त्रीत्वं सुराधिपः समुनिः कोपवान् ब्रह्मन्
नैवगच्छत्वनुग्रहं पितामह ३० नमुनेरपराधस्यात्र एण बिंदोर्महात्मनः स्वकर्मणोपयातो
सौस्त्रीत्वं स्त्रीवधकारणात् चकार दुर्जयं देवा देवराजोपि दुर्मदः जहार चित्रसेनां च सुसु
ग्राधनदांगनां १०४ तपाजघान्य युवतीं न्यण बिंदोस्तपोनन तेन कर्मविपाकेन स्त्रीत्वमाव
वासवो गतः ५ देवा ऊ यदसौ कृतवान् शंभो दुर्नयं नाथ दुर्मतिः तत्सर्वं साधयिष्यामो
वयं शच्या समन्विताः ६ कांता धनाधिपितापस्य गूढा लिष्टा तया विज्ञो तां च तस्य प्रदास्या
मः सर्वे त्वत्प्रसादतः त्रयोदश्यां चतुर्दश्यां देवराजः शचीयुतः नंदने चार्वनं कृत्वा सर्व
दापहरहसा ८ ततः शची तदा गूढं चित्रसेनां विगृह्य च मुमोच यक्षभुवने प्रियकस्य तु

वर्त्तिना ९ एतस्मिन्नंतरे दूतोः कालेजंकोसमागतः धनेशेकथयामासचित्रसेनासमागमं १०
शय्यासाके समायानातवकांताधनाधिप सुखीत्वमतुलंप्राप्यचरितार्थाबभूवसा ११ धम
नेशोपिकृतार्थोभूत्जगामनिजवेश्मनि देवाऊचुः सर्वमेतत्कृतंब्रह्मन्प्रसादात्तेनसंशयः
पतिहीनायथानारीनाथहीनंयथाबलं गोकुलंकृष्णहीनंतुतथेद्रेणमरावती जपंक्रिया
तपोदानंस्नानंतीर्थंचवैष्णवो वासवस्यसमारभ्याहितेनःस्त्रीत्वादिमुच्यते १४ ब्रह्मोउ
वाच निहंतुंचमुनेःशापंनसमर्थोहंनशंकरः तीर्थंचान्यन्नपश्यामिमुक्त्वैकंविष्णु
पूजनं १५ अष्टाक्षरेणमंत्रेणमंत्रेपूजनंचयथाजयः करोतुविधिवच्छक्रः स्त्री
त्वोघेनप्रमुच्यते १६ एकाग्रमनसाशक्रःस्नात्वाश्रद्धासमन्वितः ॐनमोनारायणेतिज
पत्वमात्मशुद्धये १७ जप्तध्येलतेजाप्येस्त्रीभावान्मोच्यसेहरे इतिश्रुत्वातथाका
षीब्रह्मोक्तंवचनंहरिः १८ स्त्रीभावाच्चविनिर्मुक्तःसद्योविष्णोःप्रसादतः मार्कंडे

डेयउवाच इतितेकथितंसर्वंविष्णुमाहात्म्यमुत्तमं १९ मयान्यगुप्तिनियुक्तेनकुरुसर्वम
तंद्रितः सूतउ० इतिसंबोधितस्तेनमार्कंडेयेनपार्थिवः २० नरसिंहंसमाराध्यमा
प्तुयाद्वैष्णवंपदं एतत्तेकथितंसर्वंभरद्वाजमुनेमयाः २१ सहस्रानीकचरितंकिम
न्यत्कथयामिते कथामिमांयस्तुशृणोतिमानवःपुरातनींसर्वविमुक्तिदांच संप्राप्य
सज्ज्ञानमतीवनिर्मलंतेनैवविष्णुंप्रतिपद्यतेजनः २२ इतिश्रीनरसिंहपुराणेसहस्रा
नीकचरित्रेऽष्टाक्षरमंत्रकथनंनाम श्रीभरद्वाजउवाच सत्यंकेचित्प्रशंसंतितपःशौ
चंतथापरे सांख्यंकेचित्प्रशंसंतियोगमन्येप्रचक्षते १ ज्ञानंकेचित्प्रशंसंतिसमलोष्टा
श्मकांचनाः क्षमांकेचित्प्रशंसंतितथैवचदयार्जवं २ केचिद्दानंप्रशंसंतिकेचिदाहुः
परंश्रुतं सम्यक्ज्ञानंपरंकेचिद्वैराग्यमुत्तमं ३ अग्निष्टोमादिकर्माणितथाकेचि
त्परंविदुः आत्मध्यानंपरंकेचित्सांख्यतत्वार्थवेदिनः ४ धर्मार्थकाममोक्षाणांचतुर्णां

मिहकेवलं उपायो पापनाशेन बहुधैवं प्रकल्पित ५ एवं व्यवस्थिते लोके त्वस्मात्तत्वविधौ नराः
व्यामोहमेव गच्छंति विमुक्ताः पापकर्मभिः ६ यदेतेषु परं तत्वं त्वनुष्ठेयं महात्मभिः ब्रूहि तु
मह्यमिसर्वज्ञं मम सर्वार्थसाधकं ७ सूत उवाच श्रूयतामिदमत्यंतं गूढं संसारमोचनं त्व
त्रैवोदाहरंतीममितिहासं पुरातनं ८ पुंडरीकस्य संवादं देवर्षेर्नारदस्य च ब्राह्मणः श्रुत
संपन्नः पुंडरीको महामतिः ९ आश्रमे प्रथमे तिष्ठन् गुरूणां वशगः सदा जितेंद्रियो जि
तक्रोधः संध्योपासनतत्परः १० वेदवेदांगनिपुणः शास्त्रेषु च विचक्षणः समिद्भिः सा
धुयत्नेन सायंप्रातर्हुताशनं ११ ध्यात्वा यजन्पतिं विष्णुं समाराधयन्द्विजः तपःस्वाध्याय
निरतः साक्षाद्ब्रह्मसुतो यथा १२ उदकेंधनपुष्पाद्यैरसकृन्नर्पयन्गुरून् मातापित्रोश्च
शुश्रूषुः मिताहारी जनप्रियः ब्रह्मविद्यामधीयानः प्राणायामपरायणः तस्य सर्वार्थत
तस्य संसारे त्यंतनिस्पृहः बुद्धिरासीन्महाराज संसारार्णवतारणी पितरं मातरं चैव भ्रा

तॄन्प्रपितामहान् १५ पितृव्यान्मातुलांश्चैव सखीन्संबंधिबांधवान् परित्यज्य महो
दारस्तृणानीव यथा सुखं विचचार महीमेतां शाकमूलफलाशनः अनित्यं यौवनं रूप
मायुष्यं द्रव्यसंचयः १७ इति संचिंत्यमानेन त्रैलोक्यं लोष्टवन्मतं पुराणोदितमार्गेण
सर्वतीर्थानि वैमुने १८ गमिष्यामि यथाकालमिति निश्चितमानसः गंगां च यमुनां चै
व गोमतीं मथुरां तु कां १९ शतद्रूं च पयोष्णीं च सरयूं च सरस्वतीं प्रयागं नर्मदां चैव महा
नद्यो नदानपि २० गयां च वंध्यतीर्थानि हिमवत्पर्वतानि च अन्यानि च महातेजा तीर्था
नि स महाव्रतः २१ संचचार महाबाहुर्यथाकालं यथाविधि कदाचित्स प्रवान्धीरः शा
लिग्रामं तपोधनः २२ पुंडरीको महाभागः पुण्यकर्मवशानुगः आसेव्यमानमृषिभिस्त
त्वविद्भिस्तपोधनैः २३ मुनीनामाश्रमं रम्यं पुराणेषु च विश्रुतं भूषितं चक्रनद्या श्व
चक्रांकितशिलातलं २४ रम्यं विविक्तं विस्तीर्णं सदा चित्तप्रसादकं केचिच्चक्रांकितास्त

ना॰पु॰
१५८

स्मिन्प्रागितः पुण्यदर्शनाः ॥ २५ ॥ विचरंति यथाकामं पुण्यतीर्थप्रसंगिनः ॥ तस्मिन्क्षेत्रे
महापुण्ये शालिग्रामे महामतिः ॥ २६ ॥ पुंडरीकः प्रसन्नात्मा तीर्थानि समसेवत ॥ स्ना
त्वा देवह्रदे तीर्थे सरस्वत्यां च सुव्रतः ॥ २७ ॥ जातिस्मर्यां चक्रकुंडे चक्रनद्यास्तते थपि
तथान्यानपि तीर्थानि तस्मिन्क्षेत्रे चचार सः ॥ २८ ॥ ततः क्षेत्रप्रभावेन तीर्थानां चैव तेजसा म
नःप्रसादमगमत्तस्य तस्मिन्महात्मनः ॥ सोपि तीर्थे विशुद्धात्मा ध्यानयोगपरायणः ॥ तत्रैव सिद्धि
माकांक्षन्समाराध्य जगत्पतिं ॥ ३० ॥ शास्त्रोक्तेन विधानेन भक्त्या परमया युतः ॥ उवास चिरमेका
की निर्द्वंद्वः संयतेंद्रियः ॥ ३१ ॥ शाकमूलफलाहारः संतुष्टः समदर्शनः ॥ यमैश्च नियमैश्चैव तत्र
था चासनबंधनैः ॥ प्राणायामैः सुतीक्ष्णैश्च प्रत्याहारैश्च संततैः ॥ धारणाभिस्तथा ध्यानैः समाधि
भिरतंद्रितः ॥ ३२ ॥ योगाभ्यासं ततः सम्यक्चक्रे विगतकल्मषः ॥ आराध्य देवदेवेशं ततस्तेनांतरा
त्मना ॥ ३४ ॥ पुंडरीको महाभागः पुरुषार्थविशारदः ॥ प्रसादं परमाकांक्षन्विष्णोस्तत्गतमानसः ॥

राम॰
१५८

३५ तस्य तस्मिन्निवसतः शालिग्रामे महात्मनः ॥ पुंडरीकस्य राजेंद्र कालो गच्छेन्महांस्ततः ॥ ३६ ॥ मु
नेकदाचित्तं देशं नारदः परमार्थवित् ॥ जगाम सुमहातेजाः साक्षादादित्यसंनिभः ॥ ३७ ॥ तं दृष्ट्वा कायो देव
र्षिः पुंडरीकं तपोनिधिं ॥ विस्मयन्किं परीतात्मा वैष्णवानां हितेरतः ॥ ३८ ॥ स दृष्ट्वा नारदं प्राप्तं सर्व
तेजसमन्वितं ॥ महामतिं महाप्राज्ञं सर्वागमविशारदं ॥ ३९ ॥ प्रांजलिः प्रणतो भूत्वा प्रहृष्टेनांतरा
त्मना ॥ अर्घ्यं दत्वा यथायोग्यं प्रणाममकरोत्तमः ॥ ४० ॥ कोयमत्यद्भुताकारस्तेजस्वी रूपवेषधृक्
प्रीतो ग्रहस्थः सुमुखो जटामंडलभूषणः ॥ ४१ ॥ विवस्वानथवा वह्निरिंद्रो वरुण एव वा ॥ इति सं
चिंतयन्विप्रः पप्रच्छ परमद्युतिं ॥ पुंडरीक उवाच ॥ कोभवानिह संप्राप्तः कुतो वा परमद्युते ॥ त्वद्दर्श
नं ह्यपुण्यानां प्रायेणात्र विदुर्लभं ॥ नारद उवाच ॥ नारदोहमनुप्राप्तस्त्वद्दर्शनकुतूहलात् ॥ पुंड
रीक हरेर्भक्तास्त्वादृशाः सततं द्विजः ॥ स्मृतः संभाषितो वापि पूजितो वा द्विजोत्तम ॥ पुनाति भगवद्भक्त
श्चंडालोपि यदृच्छया ॥ ४५ ॥ दासोहं वासुदेवस्य देवदेवस्य शार्ङ्गिणः ॥ इत्युक्तो नारदेनासौ भक्तिपर्याकु

आत्मना ४६ ॥ श्रीवाच मधुरं विश्वस्त दृशानिस्तु विस्मितः ॥ पुंडरीक उ० ॥ धन्योहं देहिनामद्य सुपूज्योहं सु
रैरपि ४७ कृतार्थाः पितरो मेद्य संशप्तं जन्मनः फलं ॥ अनुगृह्णीष्व देवर्षे त्वज्ञस्य विशेषतः ४
८ किं किं करोम्यहं विद्वन् त्राप्यमाणः स्वकर्मभिः ॥ कर्तव्यं परमं गुह्यं उपदेष्टुं त्वमर्हसि त्वं ग
तिः सर्वलोकेषु वै खवानां विशेषतः ॥ नारद उवाच ॥ अनेकानीह शास्त्राणि कर्माणि च तथा
द्विज ॥ धर्ममार्गाश्च बहवः स्तथैव प्राणिनः स्मृताः ॥ वैलक्षण्यं च जगतस्तस्माद्देवद्विजोत्तम ५१
अव्यक्ताजाः पठंते सर्वे सर्वात्मकमिदं जगत् ॥ इत्येवं प्राकृरपरे तत्रैव लयमेव च ५२ आत्मनो
बहवः प्रोक्ताः नित्याः सर्वगतास्तथा ॥ अन्ये मे तिमतां श्रेष्ठ तत्वालोकनतत्परैः ५३ एवमा-
धनु संचिंत्य यथा ज्ञाति यथा श्रुतं ॥ वदंति ऋषयः सर्वे नानामतविशारदाः ५४ नारद उवाच
शृणु साधवहितो ब्रह्मन् कथयामि तवानघ ॥ परमार्थमिदं गुह्यं घोरसंसारमोचनं ५५ अना
गतमतीतं च विप्रब्रह्म स्मतीवयत् ॥ न गच्छति नरेणंद्र स्थिर्वर्त्तमानार्थ निश्चिते ५६ शृणु सा

वहितस्तात कथयामि तवानघ ॥ यत्प्रोक्तं ब्रह्मणा पूर्वं पृच्छतो मम सुव्रत ५७ कदाचिद्ब्रह्मलोकस्थं
पद्मयोनिपितामहं ॥ प्रणिपत्य यथान्यायं पृष्टवानहमव्ययं ५८ किं तत्ज्ञानं परं देव कश्च योगः प
रस्तथा ॥ एतन्मे तत्वतः सर्वं त्वमाचक्ष्व पितामह ॥ ब्रह्मा उवाच ५९ यः परः प्रकृतेः प्रोक्तः पुरुषः पंच
विंशकः ॥ स एव सर्वभूतानां नर इत्यभिधीयते ६० नराज्जातानि तत्वानि नाराणीति ततो विदुः ॥
तान्येव चायनं तस्य तेन नारायणः स्मृतः ६१ नारायणाज्जगत्सर्वं सर्गकाले प्रजायते ॥ तस्मिन्नेव
पुनस्तच्च प्रलये संप्रलीयते ६२ नारायणः परं ब्रह्म तत्वं नारायणः परं ॥ नारायणः परं ज्योतिरात्मा
नारायणः परः ६३ परादपि परश्चासौ तस्मान्नास्ति परं मुने ॥ यच्च किंचिज्जगत्यस्मिन् दृश्यते श्रू
यतेपि वा ६४ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥ एवं विदित्वा तं देवं साकारं व्या
हरन्मुहुः ६५ नमो नारायणायेति ध्यात्वा चानन्यमानसः ॥ किं तस्य दानैः किं तीर्थैः किं तपोभि
ः किमध्वरैः ६६ यो नित्यं ध्यायते देवं नारायणमनन्यधीः ॥ एतत्ज्ञानं परं तात योगश्चैव परस्तथा

ना॰पु॰ १६० ६७ परस्परविरुद्धार्थैः किमन्यैः शास्त्रविस्तरैः ॥ बहवोपि यथा मार्गा विशंत्येकं महत्पुरं ॥ तथा ज्ञानानि
सर्वाणि प्रविशंति तमीश्वरं ॥ स हि सर्वगतो देवः सूक्ष्मोऽव्यक्तः सनातनः ॥ जगदादिरनाद्यंतः स्वयं
भूर्भूतभावनः ॥ विष्णुर्जिष्णुरचिंत्यात्मा नित्यः सदसदात्मकः ॥ वासुदेवो जगद्वासः पुराणः कवि
रव्ययः ॥ यस्मात्प्रानंछितिं ह्यलंत्रैलोकं सनैचराचरं ॥ तस्मात्स भगवान्देवो विष्णुरित्यभिधीयते
स यस्माद्वासर्वभूतानां तत्वाधानां युगक्षये ७२ तस्मिन्निवासः संसर्गे वासुदेवस्ततस्तु सः ॥ तम
ाहुः पुरुषं केचित्केचिदीश्वरमव्ययं ॥ विज्ञानमात्रं केचिच्च केचिद्ब्रह्मपरं तथा ॥ केचित्काल
मनाद्यंतं केचिज्जीवं सनातनं ७३ केचिच्च परमात्मानं केचिच्चैवमनामयं ॥ केचित्क्षेत्रज्ञमित्या
हुः केचित्सद्विंशकं तथा ७४ अंगुष्ठमात्रं केचिच्च केचित्पद्मरजोपमं ॥ एते चान्ये च मुनिभिः ॥ राम॰
संज्ञाभेदाः पृथग्विधाः ॥ शास्त्रेषु कथिता विष्णोर्लोकव्यामोहकारकाः ॥ एकं यदि भवेच्छास्त्रं ज्ञा १६०
नं निःसंशयं भवेत् ॥ बहुत्वादिह शास्त्राणां ज्ञानतत्त्वं सुदुर्लभं ॥ आलोड्य सर्वशास्त्राणि विचा

र्य च पुनः पुनः ॥ इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥ त्यक्त्वा व्यासीमोहनान्सर्वान् तस्माच्छा
स्त्रार्थविस्तरात् ७८ अनन्यचेतसा ध्यायस्व नारायणमतंद्रितः ॥ एवं ज्ञात्वा तु सततं देवदेवं तम
व्ययं ७९ हि ध्यायस्वपस्नितन्न वसायुज्यं नात्र संशयः ॥ श्रुत्वेदं ब्रह्मणा प्रोक्तं ज्ञानयोगं सुदुर्ल
भं ८० ततोहमासं विप्रेंद्र नारायणपरायणः ॥ नमो नारायणायेति ये विदुर्ब्रह्म शाश्वतं ॥ ८१
अंतकाले जपन्नेति तद्विष्णोः परमं पदं ॥ तस्मान्नारायणात्तात परमात्मा सनातनः ॥ ८२ अ
अनन्यमनसा नित्यं ध्यायेत्तत्वविचिंतकः ॥ नारायणो जगद्व्यापी परमात्मा सनातनः ॥
८३ जगतां सृष्टिसंहारपरिपालनतत्परः ॥ श्रवणात्पठनाच्चैव निदिध्यासनतस्तथा ८
४ आराध्यः सर्वथा ब्रह्मन् पुरुषेण हितैषिणा ॥ निःस्पृहा नित्यसंतुष्टा ज्ञानिनः संयतेंद्रि
याः ॥ निर्ममा निरहंकारा रागद्वेषविवर्जिताः ॥ अपक्षपतिताः शांताः सर्वसंकल्पवर्जिता
ः ॥ ध्यानयोगपरा ब्रह्मन् ते पश्यंति जगत्पतिं ॥ त्यक्त्वा त्वपा महात्मानो वासुदेवं हरिं गुरुं ८५

कीर्तयंति जगन्नाथं ते पश्यंति जगत्पतिं ॥ तस्मात्त्वमपि विप्रेंद्र नारायणपरो भव ॥ ८८ ॥ तदन्नः को
मलोदारः प्रार्थितं दातुमीश्वरः ॥ हे जयाकीर्तितो यो वै स्वं पदं दिशति द्विज ॥ ८९ ॥ अग्निकार्यं
जपः स्नानं तपः स्वाध्यायमेव च ॥ तमेवोद्दिश्य देवेशं कुरु नित्यमतंद्रितः ॥ ९० ॥ किं तत्र ब
हुभिर्मंत्रैः किं तत्र बहुभिर्व्रतैः ॥ नमो नारायणायेति मंत्रः सर्वार्थसाधकः ॥ ९१ ॥ चीरवा
सा जटी वापि त्रिदंडी मुंडमेव च ॥ भूषितो वा द्विजश्रेष्ठ न लिंगं धर्मकारणं ॥ ९२ ॥ ये नृशंसा दु
रात्मानः पापाचाररताः सदा ॥ तेपि यांति परं स्थानं नरा नारायणाश्रयाः ॥ ९३ ॥ जन्मांतरस
हस्रेषु यस्य स्याद्बुद्धिरीदृशी ॥ दासोहं वासुदेवस्य देवदेवस्य शार्ङ्गिणः ॥ ९४ ॥ प्रयाति वि
ष्णुसालोक्यं पुरुषो नात्र संशयः ॥ किं पुनस्तद्गतप्राणः पुरुषः संयतेंद्रियः ॥ ९५ ॥ सूत उवा
च ॥ इत्युक्त्वा तस्य देवर्षिस्तत्रैवांतरधीयत ॥ परोपकारनिरतस्त्रैलोक्यस्यैकभूषणः ॥ पुंडरी
कोपि धर्मात्मा नारायणपरायणः ॥ नमोस्तु केशवायेति पुनः पुनरुदीरयन् ॥ ९८ ॥ प्रसी

द स्व महायोगिन्निदमुच्चार्य सर्वदा ॥ रुत्पुंडरीके गोविंदं प्रतिश्रय्य जनार्दनं ॥ ९९ ॥ तपः सि
द्धिकरे रण्ये शालिग्रामे तपोधनः ॥ उवास चिरमेकाकी पुरुषार्थविचक्षणः ॥ १०० ॥ स्वप्नेपि
केशवादन्यन्न पश्यति महातपाः ॥ निरूपितस्य नैवासीत्पुरुषार्थविरोधिनी ॥ १ ॥ तपसा
ब्रह्मचर्येण शौचेन च विशेषतः ॥ जन्मजन्मांतरारूढसंस्कारेण च स द्विजः ॥ २ ॥ प्रसादाद्देव
देवस्य सर्वलोकैकसाक्षिणः ॥ अवाप परमां सिद्धिं वेत्ति वीवीतकल्मषः ॥ ३ ॥ सिंहव्याघ्राल
यान्येपि मृगाः प्राणिविहिंसकाः ॥ विरोधं सहजं हित्वा समेतास्तस्य संनिधौ ॥ ४ ॥ निवसंति
द्विजश्रेष्ठ प्रशांतेंद्रियवृत्तयः ॥ ततः कदाचिद्भगवान्पुंडरिकस्य धीमतः ॥ ५ ॥ प्रादुरासी
ज्जगन्नाथः पुंडरीकायतेक्षणः ॥ शंखचक्रगदापाणिः पीतवासश्चतुर्भुजः ॥ ६ ॥ श्रीवत्सव
क्षाः श्रीवासः कौस्तुभेन विभूषितः ॥ आरुह्य गरुडं श्रीमान्नंजनाचलसंनिभः ॥ ७ ॥ मेरु
शृंगमिवारूढः कालमेघस्तडिद्युतिः ॥ राजते नातपत्रेण मुक्तादामविलंबिना ॥ ८ ॥ विरा

जमानो देवेशश्चामरव्रजनादिभिः ॥ तं दृष्ट्वा देवदेवेशं पुंडरीकः कृतांजलिः ९ ॥ पपात शि
रसा भूमौ साध्वसावनतो द्विजः ॥ पिबन्निव हृषीकेशं नयनाभ्यां समाकुलः ॥ १० ॥ जगाम महत
तीं नन्ति पुंडरीकस्तदानघ ॥ तमेवालोकयन्वीरश्चिरं चार्पितदर्शनं ॥ ११ ॥ ततस्तमाह भग
वान्प्रपन्नार्तिविक्रमः ॥ प्रीतोस्मि वत्स भद्रं ते पुंडरीक महामते ॥ १२ ॥ वरं वृणीष्व दा
स्यामि यत्ते मनसि वर्त्तते ॥ सूत उवाच ॥ एतच्छ्रुत्वा तु वचनं देवदेवेन भाषितं ॥ १३ ॥ इदं
विज्ञापयामास पुंडरीको महामतिः ॥ पुंडरीक उवाच ॥ क्वाहमत्यंतदुर्बुद्धिः क्व चात्महित
वीक्षणं ॥ १४ ॥ यद्धितं मम देवेश तदाज्ञापय माधव ॥ एवमुक्तोथ भगवान्सुप्रीतः पुनरब्र
वीत् ॥ १५ ॥ पुंडरीनिकं महाभागं कृत्वांजलिमुपस्थितं ॥ आगच्छ राजंते स्तु मयैव समस्तु
व्रतः ॥ १६ ॥ मद्रूपधारी नित्यात्मा ममैव पार्षदो भव ॥ सूत उवाच ॥ एवमुक्ते वति प्रीतात्मा श्रीध
रे भक्तवत्सले ॥ देवदुंदुभयो नेदुः पुष्पवृष्टिः पपात च ॥ देवाः सेंद्रास्तथा सिद्धाः साधु साध्विति

प्राब्रुवन् ॥ जगुश्च सिद्धगंधर्वाः किंनराश्च विशेषतः ॥ अथैनं समुपादाय वासुदेवो जगत्पतिः ॥ १९
जगाम गरुडारूढः सर्वदेवनमस्कृतः ॥ तस्मात्त्वमपि विप्रेंद्र विष्णुभक्तिसमन्वितः ॥ २० ॥ तद्धित्त
ऋतप्राणस्तद्भक्तानां हितेरतः ॥ अर्च्चयित्वा यथायोग्यं भजस्व पुरुषोत्तमं ॥ २१ ॥ शृणु ध्वतत्कथाः
पुण्याः सर्वपापप्रनाशिनी ॥ येनोपायेन राजेंद्र विष्णुः सर्वेश्वरेश्वरः ॥ २२ ॥ प्रीतो भवति विश्वात्मा त
त्कुरुष्व सुविस्तरं ॥ अश्वमेधसहस्रेण वाजपेयशतैरपि ॥ २३ ॥ नाप्नुवंति गतिं पुण्यां नारायण
पराङ्मुखाः ॥ अजरममरमेकं ध्येयमाद्यं वशून्यं सगुणविगुणमाद्यं स्थूलमत्यंतसूक्ष्मं निरुपम
मुपमेयं योगिनां ज्ञानगम्यं त्रिभुवनगुरुमीशं त्वां प्रपन्नोस्मि विष्णो ॥ १२४ ॥ ॥ इति श्रीनर
सिंहपुराणे पुंडरीकनारदसंवादे ॥ श्री सूत उवाच ॥ एतत्ते द्विजाः समाख्यातं पुराणं नरसिं
हकं ॥ सर्वपापहरं पुण्यं सर्वदुःखनिवारणं ॥ १ ॥ समस्तपुण्यफलदं सर्वयज्ञफलप्रदं ॥ ये पठं
त्यपि शृण्वंति श्लोकार्द्धमेव वा ॥ न तेषां पापबंधस्तु कदाचिदपि जायते ॥ विष्णवर्पितमिदं पु

न॰पु॰
१६३

एयंपुराणंसर्वकामदं ३ नन्माचवद्दतामेतत्‌शृणुध्वंतांचफलंशृणुततजन्मार्जितैःपापैःसद्यएव
विमोचिताः ४ सहस्रकुलसंयुक्ताःप्रयांतिपरमंपदं किंतीर्थैर्गोप्रदानैर्वातपोभिर्वाकिमध्वरैः ५
अहन्यहनिगोविंदंतत्परत्वेनशृण्वतां यःपठेत्प्रातरुत्थाययदस्यश्लोकविंशतिं ६ ज्योति
ष्टोमफलंप्राप्यविष्णुलोकेमहीयते एतत्पवित्रमारोग्यंनवाच्यंत्वकृतात्मनां ७ द्विजानांविष्णु
भक्तानांश्राव्यमेतन्नसंशयः एतत्पुराणश्रवणमिहामुत्रसुखप्रदं ८ वदतांशृण्वतांसद्यः
सर्वपापप्रणाशनं बहुनात्रकिमुक्तेनभूयोमुनीश्वराः ९ श्रद्धयाश्रद्धयावापिश्रोतव्यमिद
मुत्तमं भारद्वाजमुखाःसर्वेकृतकृत्याद्विजोत्तमाः १० सूतंहृष्टाःप्रपूज्याथसर्वेस्वंस्वाश्रमंययुः
११ इतिश्रीनरसिंहपुराणेसूतभारद्वाजादिसंवादेसर्वदुःखौघहरंश्रीसमाप्तंनरसिंहपुराणं
श्रीरस्तुः ॥ ॥श्रीकल्याणमस्तुः ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

घनश्यामस्य जडियोपह्वृतेः विलंबीवर्षीषाढ

राम॰
१६३